Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकशब्दार्थविचारः

लेखकः

डॉ० रामनाथः वेदालंकारः

एम. ए., पी-एच. डी.

(भूतपूर्वः प्राध्यापकः अध्यक्षश्च)

ASG
R
१.२
३१:२

महर्षिदयानन्दवैदिकानुसन्धानपीठम्,

पंजाब-विश्वविद्यालयः, चण्डीगढ़म्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R
१२
३१:२
९७७९०

पुस्तकालय

गुरुकुल कांगड़ी विश्वविद्यालय

विषय संख्या ..... आगत नं० .....

लेखक राजगोपालंकार

शीर्षक वैदिक शब्दार्थ विचार

.....

दिनांक	सदस्य संख्या	दिनाँक	सदस्य संख्या

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिनांक	सदस्य संख्या	दिनाँक	सदस्य संख्या

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

97790

R
9.2
37:2

गुरुकुल कांगड़ी विश्वविद्यालय
कृपया पुस्तक के ऊपर कोई निशान आदि
न लगायें।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

बर्ग संख्या... R 1:2 / 31:2 आगत संख्या... 97790

पुस्तक—वितरण की तिथि नीचे अंकित है। इस तिथि सहित २० वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए। अन्यथा १० पैसे के हिसाब से विलम्ब-दण्ड लगेगा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकशब्दार्थविचारः

97790

लेखकः

डॉ० रामनाथः वेदालंकारः

एम. ए., पी-एच. डी.

(भूतपूर्वः प्राध्यापकः अध्यक्षश्च)

महर्षिदयानन्दवैदिकानुसन्धानपीठम्,

पंजाब-विश्वविद्यालयः, चण्डीगढ़म्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

© सर्वेऽधिकाराः सुरक्षिताः

प्रथमं संस्करणम्—विक्रमाब्दः २०३८, शकाब्दः १९०३

R
१.२
३१:२

मुद्रक : वैदिक-यन्त्रालय, अजमेर

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रथ प्रास्ताविकम्

सन्ति खलु वैदिकशब्दा लोकशब्देभ्यो विलक्षणाः। येऽर्थाः कस्यचिच्छब्दस्य लोके त एव वेदेऽपीति नियमो नास्ति। अद्रिगिरिपर्वतशब्दा लोके शैलवाचकाः प्रसिद्धाः, परं वेदे मेघवज्रादिवाचका अपि। अप्छब्दो लोके जलनदीवाचकः, परं वेदेऽन्तरिक्षकर्मवाचकोऽपि। अभीशुगभस्तिदीधितिशब्दा लोके प्रग्रहरश्मिवाचकाः, परं वेदेऽङ्गुलिवाचका अपि। अमृतशब्दो लोके जलपीयूषवाचकः, परं वेदे हिरण्यवाचकोऽपि। अम्बरशब्दो लोकेऽन्तरिक्षवाचकः, परं वेदेऽन्तिकवाचकोऽपि। अवनिशब्दो लोके भूमिवाचकः, परं वेदेऽङ्गुलिवाचकोऽपि। अहिशब्दो लोके सर्पवाचकः, परं वेदे जलमेघपापपापिवाचकोऽपि। आयुधशब्दो लोके शस्त्रवाचकः, परं वेदे जलवाचकोऽपि। इन्दुशब्दो लोके चन्द्रवाचकः, परं वेदे जलयज्ञवाचकोऽपि। ऊधःशब्दो लोके धेनोरापीनवाचकः, परं वेदे रात्रिवाचकोऽपि। ऋतशब्दो लोके सत्यवाचकः, परं वेदे जलधनयज्ञवाचकोऽपि। कृत्तिशब्दो लोके गजचर्मकन्थावाचकः, परं वेदे गृहयशोऽन्नवाचकोऽपि। क्षत्रशब्दो लोके क्षात्रधर्मवाचकः, परं वेदे जलधनवाचकोऽपि। क्षितिशब्दो लोके भूवाचकः, परं वेदे मनुष्यवाचकोऽपि। घृतशब्दो लोके सर्पिर्वाचकः, परं वेदे जलज्योतिर्वाचकोऽपि। जगच्छब्दो लोके संसारवाचकः, परं वेदे मनुष्यवाचकोऽपि। तेजःशब्दो लोके ज्योतिर्वाचकः, परं वेदे जलवाचकोऽपि। धीशब्दो लोके प्रज्ञावाचकः, परं वेदे कर्मवाचकोऽपि। नभःशब्दो लोकेऽन्तरिक्षवाचकः, परं वेदे जलसूर्यद्युलोकवाचकोऽपि। नमःशब्दो लोके नमस्कारवाचकः, परं वेदे वज्रान्नवाचकोऽपि। नरशब्दो लोके मनुष्यवाचकः, परं वेदेऽश्ववाचकोऽपि। पयःशब्दो लोके जलदुग्धवाचकः, परं वेदे ज्योतिरन्नरात्रिवाचकोऽपि। पाथःशब्दो लोके जलवाचकः, परं वेदेऽन्तरिक्षवाचकोऽपि। बर्हिःशब्दो लोके वह्निकुशवाचकः, परं वेदेऽन्तरिक्षजलयज्ञवाचकोऽपि। ब्रह्मशब्दो लोके परमेशवाचकः, परं वेदेऽन्नधनजलवाचकोऽपि। मरुच्छब्दो लोके देववायुप्राणवाचकः, परं वेदे रूपसुवर्णऋत्विग्वाचकोऽपि। महच्छब्दो लोके विशालवाचकः, परं वेदे जलवाचकोऽपि। महीशब्दो लोके पृथिवीवाचकः, परं वेदे वाग्वेनुद्यावापृथिवीवाचकोऽपि। यशःशब्दो लोके कीर्तिवाचकः, परं वेदे जलधनान्नवाचकोऽपि। वधूशब्दो लोके जायास्नुषावाचकः, परं वेदे नदीवाचकोऽपि। वनशब्दो लोकेऽरण्यजलवाचकः, परं वेदे रश्मिवाचकोऽपि। वपुःशब्दो लोके रूपदेहवाचकः, परं वेदे जलवाचकोऽपि। वसुशब्दो लोके धनवाचकः, परं वेदेऽन्नरश्मिवाचकोऽपि। विवस्वच्छब्दो लोके सूर्यवाचकः, परं वेदे मनुष्यवाचकोऽपि। व्योमशब्दो लोकेऽन्तरिक्षवाचकः, परं वेदे जलदिग्वाचकोऽपि। सद्मशब्दो लोके गृहवाचकः, परं वेदे जलयुद्धवाचकोऽपि। समुद्रशब्दो लोके सागरवाचकः, परं वेदेऽन्त-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिक्षवाचकोऽपि । सरःशब्दो लोके तडागवाचकः, परं वेदे जलवाग्वाचकोऽपि । सलिल-शब्दो लोके जलवाचकः, परं वेदे बहुवाचकोऽपि । सूनृताशब्दो लोके प्रियसत्यात्मक-वाग्वाचकः, परं वेदे उषोऽन्नवाचकोऽपि । हेमशब्दो लोके हिरण्यावाचकः, परं वेदे जलवाचकोऽपि । एतत्सर्वं प्रायेण वैदिकनिघण्टुकोशाभिप्रायेणोक्तम् । वस्तुतस्त्वेतेषां शब्दानां वेदे यथायथं ज्योतिर्मनःप्राणजीवात्मपरमात्मप्रभृतयोऽन्येऽप्यर्थाः संभवन्ति ।

एतेन ज्ञायते यद् वेदाध्ययनकाले यदि कश्चिद् वेदशब्दानां लोकप्रसिद्धानेवार्थान् गृह्णाति तर्हि नायं साधुन्यायः । अतो वैदिकशब्दानामर्थपरीक्षा खल्वावश्यकी । अत एव निरुक्तकारो महता प्रयासेन सनिर्वचनं वेदमन्त्रोद्धरणपुरस्सरं बहूनां वैदिकशब्दा-नामर्थान् मीमांसते । तद्यथा—

अकूपारः—**विद्याम तस्य ते वयमकूपारस्य दावने (ऋग् 5.39.2) । विद्याम तस्य ते वयम् अकुपरणस्य दानस्य । आदित्योऽप्यकूपार उच्यते, अकूपारो भवति दूरपारः । समुद्रोऽप्यकूपार उच्यते, अकूपारो भवति महापारः । कच्छपोऽप्यकूपार उच्यते, अकूपारो न कूपमृच्छतीति** (निरु. 4.18) ।

अध्रिगुः—**अध्रिगुर्मन्त्रो भवति गव्यधिकृतत्वात् । अपि वा प्रशासनमेवाभिप्रेतं स्यात् तच्छब्दवत्त्वात् 'अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वंमध्रिगो** (ऐ. ब्रा. 2.1.6)' इति । **अग्निरप्यध्रिगुरुच्यते—'तुभ्यं श्चोतन्त्यध्रिगो शचीवः** (ऋग् 3.21.4),' **अधृत-गमनकर्मवत् । इन्द्रोऽप्यध्रिगुरुच्यते, 'अध्रिगव ओहमिन्द्राय** (ऋग् 3.61.1)' **इत्यपि निगमो भवति** (निरु. 5.11) ।

अर्कः—**अर्को देवो भवति, यदेनमर्चन्ति । अर्को मन्त्रो भवति, यदनेनार्चन्ति । अर्कमन्नं भवति, अर्चति भूतानि । अर्को वृक्षो भवति, संवृक्तः कटकिम्ना** (निरु. 5.5) ।

काष्ठाः—**काष्ठा दिशो भवन्ति, क्रान्त्वा स्थिता भवन्ति । काष्ठा उपदिशो भवन्ति, इतरेतरं क्रान्त्वा स्थिता भवन्ति । आदित्योऽपि काष्ठा उच्यते, क्रान्वा स्थितो भवति । आज्यन्तोऽपि काष्ठा उच्यते, क्रान्त्वा स्थितो भवति । आपोऽपि काष्ठा उच्यन्ते, क्रान्त्वा स्थिता भवन्तीति** (निरु. 2.15) ।

पवित्रम्—**पवित्रं पुनातेः । मन्त्रः पवित्रमुच्यते—'येन देवाः पवित्रेणात्मानं पुनते सदा** (साम 1302)' **इत्यपि निगमो भवति । रश्मयः पवित्रमुच्यन्ते—'गभस्तिपूतः** (यज 6.2),' **'गभस्तिपूतो नृभिरद्रिभिः सुतः** (ऋग् 9.86.34)' **इत्यपि निगमौ भवतः । आपः पवित्रमुच्यन्ते—'शतपवित्राः स्वधया मदन्तीः** (ऋग् 7.47.3)' **बहूदकाः । अग्निः पवित्रमुच्यते । वायुः पवित्रमुच्यते । सोमः पवित्रमुच्यते । सूर्यः पवित्रमुच्यते । इन्द्रः**

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पवित्रमुच्यते। अग्निः पवित्रं स मा पुनातु वायुः सोमः सूर्य इन्द्रः पवित्रं ते मा पुनन्तु' इत्यपि निगमो भवति (निरु. 5.6)।

एवमेव गो-निचुम्पुण-रजः-हरः-शुन्ध्युप्रभृतीनां शब्दानां दय-वीप्रभृतीना धातूनां चाप्यनेकार्थान् परीक्षया निर्धारयति निरुक्तकारः। तामेतां निरुक्तशैलीमेवानुसृत्यास्माभिः 'अजः, असुरः, उक्षवृषभौ, गन्धर्वाप्सरसः, पतङ्गः, महिषः, वराहः, सुरा, हंसः, हरिः' इत्येते शब्दा ग्रन्थेऽस्मिन् व्याख्यातास्तदर्थाश्च विचारिताः।

निरुक्ते तावद् अजशब्दविषये **'अजा अजनाः** (निरु. 4.25)' एतावन्मात्रमुक्तम्। असुरशब्दस्य मनुष्यनामप्रकरणे पञ्चजनव्याख्यानावसरे निरुक्तिमात्रं प्रदर्शितम् (निरु. 3.7)। 'उक्षन्' शब्दो वृषाकपायीज्ञब्दप्रस्तारे **'घसत्त इन्द्र उक्षणः** (ऋग् 10.86.13)' इति मन्त्रव्याख्याने पंक्तिद्वयमात्रेण व्याख्यातः (निरु.12.9)। वृषभशब्दः पृथिवीस्थाने युद्धोपकरणेषु परिगणितः केवलमेकमन्त्रप्रामाण्येन व्याख्यातः (निरु. 9.21)। गन्धर्वशब्दस्तु सर्वथा न विचारितः, केवलं पञ्चजनप्रकरणे **'गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके** (निरु. 3.7)' इति नाम्ना कीर्तितः। अप्सरःशब्द उर्वशीप्रकरणे निर्वचनमात्रेण दर्शितः (निरु. 5.13)। पतङ्गशब्दो निघण्टौ अश्ववाचिषु पठितो निरुक्ते नामतोऽपि न प्रोक्तः। महिषशब्दो हविष्पान्तीयसूक्तस्य **'अपामुपस्थे महिषा अगृभ्णत** (ऋग् 7.8.4)' इति मन्त्रव्याख्याने प्रसङ्गत एव **'महत्यन्तरिक्षलोक आसीना महान्त इति वा अगृह्णत माध्यमिका देवगणाः** (निरु. 7.26)' इत्येतावन्मात्रं चर्चितः। वराहशब्दो नैगयकाण्डे सनिर्वचनं विचारितः तस्य मेघः, शूकरः, अङ्गिरसः, माध्यमिका देवगणाः इत्यर्थाश्च प्रतिपादिताः (निरु. 5.4)। सुराशब्दो निघण्टौ जलार्थे पठितः (निघं. 1.12), निरुक्ते च निपातप्रसङ्गे **'सुरा सुनोतेः'** इत्येतावन्मात्रं वर्णितः (निरु. 1.10)। हंसशब्दो निघण्टौ अश्ववाचिष्वाम्नातः (निघं. 1.14), निरुक्ते च **'ईर्मान्तासः'** इति शब्दप्रस्तावे **'हंसा इव श्रेणिशो यतन्ते** (ऋग् 1.163,10) इति मन्त्रव्याख्याने **हंसा हन्तेः, घनन्त्यध्वानम्'** इत्येतावन्मात्रमुदीरितः (निरु. 4.13)। हरिशब्दो निघण्टौ मनुष्यवाचिषु परिगणितः (निघं. 2.3), हरी च इन्द्रस्याश्वौ वर्णितौ (निघं 1.15), निरुक्ते तु नैगमकाण्डे वाशीशब्दप्रसङ्गे **'आ तु षिञ्च हरिमीं द्रोरुपस्थे** (ऋग्. 10.-101.10) इति मन्त्रव्याख्याने **'हरिः सोमो हरितवर्णः अयमपीतरो हरिरेतस्मादेव।'** इत्येतन्मात्रं प्रावोचि (निरु. 4.19)।

एतेन स्पष्टं यन्निरुक्तकारेण शब्दार्थविचारणायां प्रस्तुतायां दिङ्मात्रं निरूपितम्। निर्वचनशास्त्रप्रतिपादनं तस्य मुख्योद्देश्यम्। अध्यात्म-अधिदैवत-अधियज्ञ-अधिभूतादिप्रक्रियाः समाश्रित्य वैदिकशब्दानां भूयांसोऽर्थाः प्रपद्यन्ते। ब्राह्मणग्रन्थेषु यज्ञव्याख्यानप्रसङ्गे निरुक्ताद् भिन्ना अपि केचनार्थाः प्रतिपादिताः। अस्माभिर्व्याकरण-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरुक्तब्राह्मणग्रन्थादीनां विविधवेदभाष्याणां च साहाय्येन, वेदानामन्तःसाक्ष्याधारेण, अध्यात्माधिदैवतादिप्रक्रियासमाश्रयेण, महर्षिदयानन्दप्रदर्शितमार्गानुसरणेन च वैदिकशब्दार्थविचारोऽयं संदुग्धः। तदिदं शास्त्रं स्वार्थसाधकं निरुक्तस्य कात्स्न्यं चेति प्रतिपद्यामहे।

वैदिकशब्दार्थाध्ययनप्रसङ्गेन केचिन्महत्त्वपूर्णा वैदिकविषया अप्यत्र मीमांसिताः। यथा—अजपाकः, उक्षपाकः, वृषभपाकः, उक्षण्णाम् आहुतिः इत्येते वेदवर्णिता विषयाः केषांचिन्मते पशुपाकं पशूनामग्नौ होमं च समर्थयन्ति, तन्न वेदाभिमतमिति सप्रमाणं निरूप्य सत्यर्थोऽस्माभिराविष्कृतः। गन्धर्वाप्सरसां विषये मिथ्या धारणेयं प्रचलिता यदन्तरिक्षलोकवर्तिजातिविशेषा गन्धर्वा अप्सरसश्च, ते ताश्च प्रजापीडनार्थं तत आगच्छन्ति, स्त्रीपुंसौ वशीकृत्य प्रोद्वेजयन्ति च। अस्याभिरेतेषां वैदिकशब्दानां सत्यार्था निरूपिताः। इन्द्रद्वारा वृषभभक्षणस्य महिषभक्षणस्यापि च तात्पर्यमस्याभिर्विशदीकृतम्। वराहावतारेण पृथिवीधारणकथाया अपि मूलं तात्पर्यं च विचारितम्। वेदेषु यज्ञे सोमरसेन संमेल्य यदिरायाः पानस्य विधानमिति केचिल्लपन्ति, तदपि सुराशब्दविचारे परिहृतम्। तदेवमस्मिन् ग्रन्थे वैदिकशब्दार्थविचारमुखेन सुतरां वैदिकविषयविचारोऽपि प्रवृत्तः। चत्वारिंशदुत्तरैकशतवेदमन्त्राणामनेकेषां मन्त्रखण्डानां च भाष्यमप्यत्र संजातम्।

तदिदं 'वैदिकशब्दार्थविचारशास्त्रं वेदार्थप्रियाणां पाठकानामुपयोगाय सदसद्विचारचणानां विपश्चितां विचाराय च पुरतो निधीयते। ग्रन्थोऽयं चण्डीगढ़स्थपंजाबविश्वविद्यालये प्रतिष्ठितस्य महर्षिदयानन्दवैदिकानुसन्धानपीठस्याचार्यपदे तदध्यक्षत्वे च कार्यं कुर्वता मया तत्पीठस्यानुसन्धानशृंखलायामुपनिबद्धः। साम्प्रतमहं तद्विश्वविद्यालयात् सेवाविनिवृत्तः। एतद्ग्रन्थाय विषयसामग्रीसंचयनादौ दयानन्दपीठस्य तदानीं शोधच्छात्रौ साम्प्रतं च पी-एच. डी. विरुदभाजौ मदीयशिष्यौ श्रीविक्रमकुमारः श्री आनन्दकुमारश्च साहाय्यं व्यतनुतामिति ताभ्यां मङ्गलमुदीर्यते। महर्षिदयानन्दपीठस्य वर्तमानोऽध्यक्षः डॉ. भवानीलालभारतीयः खलु मद्धन्यवादार्हो यस्य कार्यकाले ग्रन्थोऽयं मुद्रितः।

पंजाबविश्वविद्यालयस्य कुलपतिवरेण्याः श्रीरामचन्दपालमहाभागाः किल विलसन्ति यशोभाजो येषां शुभाशंसाभिर्ग्रन्थोऽयं प्राकाश्यमधिगच्छति।

पन्तनगरम् (नैनीतालः)
1 अगस्त, 1981

विदुषां वशंवदः
रामनाथः वेदालंकारः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणिका

विषयाः पृष्ठानि

१. अजः (१-१४)

परब्रह्म, जीवात्मा, आदित्यः, अजः एकपात्, अग्निः, पूष्णो वाहनाः, छागः, योद्धारः, प्रेरकः, अजपाकः, अजदानम्, अश्वमेधीयः अजः, अजा, उपसंहारः ।

२. असुरः (१५-३१)

प्रशस्तार्थे—इन्द्रः, वरुणः, अग्निः, सविता, रुद्रः, सोमः, पर्जन्यः, मित्रावरुणौ, तनूनपात्, पूषा, वायुः, मरुतः, द्यौः, स्वनयः, व्यरुणः, हवः, वीरः, परब्रह्मार्थे, जीवात्मार्थे, त्वष्ट्रर्थे, सूर्यार्थे, ऋत्विगर्थे, सोमार्थे, संवत्सरार्थे, राजार्थे, काष्ठार्थे, इतरेष्वर्थेषु । निन्दितार्थे—ऋग्वेदे, यजुर्वेदे, सामवेदे, अथर्ववेदे । उपसंहारः ।

३. उक्षा वृषभश्च (३२-४७)

अग्निः, इन्द्रः, सोमः, पर्जन्यः, वायुः, आदित्यश्च, बृहस्पतिः, रुद्रः, मरुतश्च, इतरेऽर्थाः, कश्चिद् अद्भुतो वृषभः, उक्षपाकः, वृषभपाकः, उक्ष्णाम्, आहुतिः, उपसंहारः ।

४. गन्धर्वाप्सरसः (४८-७२)

गन्धर्वः—परमात्मा, जीवात्मा, प्राणः, मनः, सूर्यः, सूर्यरश्मयः, चन्द्रः, मेघः, वायुः, अग्निः, यज्ञः, इन्द्रः, सोमः, नक्षत्राणि, विद्वान्, पतिः, राष्ट्रभृतः, कर्षकः, गायकः । अप्सरस्ताभिर्गन्धर्वाणां सम्बन्धश्च—मरीचयः, ओषधयः, विद्युतः, आपः, आधयः, उषसः, सेनाः, राष्ट्र-संस्थाः, स्त्रियः, । अप्सरोभिः उन्मादचिकित्सा । गन्धर्वाप्सरसां साहचर्यम् । यजुर्वेदे ऽप्सरसां नामानि । निन्दितार्थे गन्धर्वाप्सरसः । उपसंहारः ।

५. पतङ्गः (७३-८०)

आत्मा प्राणश्च सूर्यः अग्निः भूमण्डलं जीवात्मपरमात्मानौ च, सूर्यः पक्षी च, जलस्थलान्तरिक्षयानम्, मेघाः, अश्वाः विस्फुलिङ्गाः, पिशाचाः, शलभः, उपसंहारः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयाः पृष्ठानि

६. महिषः (८१-९४)

इन्द्रः, अग्निः, सोमः, सविता, सूर्यः, आत्मा, प्राणाः, मरुतः, माध्यमिका देवगणाः, वेनः, तन्यतुः, कण्वः, यज्ञः, यजमानाः, ऋत्विजः, मनुष्या, पशुः, मेघः, इन्द्रस्य महिषभक्षणम् । महिषी–भार्या, अरणिः, पशुः । उपसंहारः ।

७. वराहः (९५-१०४)

शूकरः, मेघः पर्वतो वा, सोमः, असुरः, अंगिरसः मरुतो वा, रुद्रः, वराहेण संविदाना पृथिवी, धनापहर्ता चौरः । वराहुः ।

८. सुरा (१०५-११५)

सौत्रामण्यां सुरापानम्, पशुबन्धनं सुरासोमपानं च, सुरासोमयोः अपरोऽर्थः, सुरानिर्माणविधिः, सुरासोमपानमन्त्रः, उदकं सुरा, लक्ष्मीः सुरा, फलादीनां रसः सुरा, निन्दिता सुरा, उपसंहारः ।

९. हंसः (११६-१२४)

हंसपक्षी, आदित्यः, आदित्यरश्मयः, अश्वाः, रथः, वायुः प्राणश्च, जीवात्मा परमात्मा च ।

१०. हरिः (१२५-१३९)

इन्द्रः, इन्द्रस्याश्वाः, सोमः, अद्रयः, वज्रः सूर्यः, सूर्यस्याश्वाः, आदित्यरश्मयः, अग्नयः वायोः अश्वाः, चन्द्रः, पर्जन्यः, अश्वः, परमात्मा, जीवात्मा, इन्द्रियाणि, मनुष्याः, इतरेऽर्थाः,

संक्षेप–सूची

मन्त्रानुक्रमणिका

मन्त्रांशानुक्रमणिका

1.2,31:2
97790

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. अजः

'अज' शब्दः शब्दार्थकोषेषु ब्रह्म-विष्णु-महेश-कामदेव-रघुपुत्र-छागार्थेषु परिगणितः[1]। न जायते इत्यजः, **'अन्येष्वपि दृश्यते** (पा. 3. 2. 101)' इति डः, यद्वा अजति गच्छतीत्यजः, पचादेराकृतिगणत्वाद् **'नन्दिग्रहि** (पा. 3. 1. 134)' इत्यच्। तदेवम् अनादिः शीघ्रगन्ता चेति मूलार्थद्वयं व्याकरणव्युत्पत्त्या सूच्यते। श्वेताश्वतरोपनिषदि वर्णितायां प्रहेलिकायाम् अजशब्दः ईश्वर-जीव-प्रकृत्यर्थे[2] प्रयुक्त इति प्रसिद्धम्—

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां मुक्तभोगामजोऽन्यः॥

श्वेता 4.5

वैदिकसंहितासु शब्दोऽयं छागातिरिक्तं परब्रह्म-जीव-प्रकृति-सूर्य-वह्नि-पवनाद्यर्थेषु भाष्यकारैरभिमतः।

परब्रह्म

परब्रह्म अज उच्यते। अजन्मत्वात्, सर्वगतत्वात् कामादिरिपूणां दुर्जनानां वा प्रक्षेपकत्वाच्च। तस्यैषा भवति—

अचिकित्वाञ्चिकितुषश्चिदत्र कवीन् पृच्छामि विद्मने न विद्वान्।
वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम्॥

ऋग् 1. 164. 6,
अथर्व 9. 14. 7

जिज्ञासुः कश्चित् पृच्छति। अचिकित्वान् वस्तुतत्त्वमजानन्नहम् अत्र विद्वत्सभायां चिकितुषः विदितवेदितव्यान् कवीन् विदुषः पृच्छामि प्रश्नं करोमि। कुतः? विद्मने परमार्थज्ञानाय। न विद्वान् न खल्वधिगतपरमार्थः परीक्षायै पृच्छामि। कोऽसौ प्रश्नः?

---

1. "अजश्छागे वरे विष्णौ रघुजे वेधसि स्मरे" इत्यनेकार्थसंग्रह 2.66; "अजा विष्णुहरच्छागाः इत्यमरः 3.30।

2. द्रष्टव्यः स्वामिदयानन्दकृतसत्यार्थप्रकाशेऽष्टमसमुल्लासः। लोहितशुक्लकृष्णा अजा रजःसत्त्वतमसां साम्यावस्थापन्नाऽनादिर्नित्या प्रकृतिः, सा स्वगर्भाद् बह्वीः प्रजाः सृजति, अजः अनादिर्नित्यो जीवस्तां भुङ्क्ते, अजः अजन्मा नित्यः परमात्मा न भुङ्क्ते किन्तु साक्षितया केवलं पश्यतीत्याशयः। शंकरमते तु-'अजां प्रकृतिं लोहितशुक्लकृष्णां तेजोऽबन्नलक्षणाम्.... अजो ह्येको विज्ञानात्मानादिकामकर्मविनाशितः स्वयमात्मानं मन्यमानो जुषमाणः सेवमानोऽनुशेते भजते। अन्य आचार्योपदेशप्रकाशावसादितविद्यान्धकारो जहाति त्यजति।'

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमपि स्विद् एकं वस्तु अजस्य रूपे विद्यते । तस्मिन्नजे किं वैशिष्ट्यमिति चेत् ? श्रूयताम्, यः अजः इमा इमानि षड् रजांसि, **लोका रजांसि उच्यन्ते**, निरु. 4.19, षड् लोकान्, पंच भूतानि प्रकृतिश्चेति षड्, यद्वा पंच ज्ञानेन्द्रियाणि मनश्चेति षड्, यद्वा अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्चेति[3] षट् तान्, यद्वा षड् ऋतून्[4] अथवा त्रिविधान् भूलोकान् द्युलोकांश्च **तिस्रो भूमीर्धारयन् त्रीरुत द्यून्**, ऋग् 2. 27. 8[5] इति निगमात्, वि तस्तम्भ विशेषेणाधारयत् । यद्वा षड् रजांसि कामादीन् षड् रिपून्[6] वि तस्तम्भ विशेषेण अवरुरोध । कोऽयम् अजः ? इति प्रश्नः । नहि सामान्यश्छागोऽयं भवतुमर्हति, तस्य षड्लोकधारणेऽसमर्थत्वात् । अयम् अजः जननादिरहितः परमात्मैव[6] ।

तस्यैषाऽपरा भवति—

तमिद् गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः ॥

ऋग् 10. 82. 6, यजु 17. 30

आपः व्याप्ताः प्रकृतिरूपाः समत्वमापन्नाः सत्त्वरजस्तमोगुणाः तमित् तमेव गर्भं कारणावस्थायां निगूढं प्रथमं प्राग् दध्रे दधिरे स्वाभ्यन्तरे धारयामासुः यत्र यस्मिन् गर्भे विश्वे देवाः सर्वे महदहंकारपंचतन्मात्रप्रभृतयः समगच्छन्त संगता बभूवुः । एकं कारणे एकीभूतं तत् अजस्य जन्मरहितस्य नित्यस्य परमात्मनः नाभौ अर्पितं, यथा नाभ्या सम्बद्धा गर्भा जायन्ते तथा तेन परमात्मना सम्बद्धमित्यर्थः, यस्मिन्नेकरूपे विश्वानि भुवनानि सर्वाणि भूतजातानि तस्थुः स्थिता आसन्निति सर्गविचारः[7] ।

अथाप्याह—

समुद्रोऽसि विश्वव्यचा अजोऽस्येकपादहिरसि
बुध्न्यो वागस्यैन्द्रमसि सदोऽस्यृतस्य द्वारौ ।
मा मा सन्ताप्तमध्वनामध्वपते प्र मा तिर
स्वस्ति मेऽस्मिन् पथि देवयाने भूयात् ॥

यजु 5. 33

---

3. बृ. उप. 3. 9. 7
4. षट् इमान् ऋतून् इति वेंकटः । यद्वा षड् रजांसि विलक्षणाः षड् ऋतवः इति सायणः ।
5. "इमा इमानि प्रसिद्धानि कामादीनि षट् रजांसि मलानि रजोगुणकार्याणि" इत्यात्मानन्दः ।
6. अजस्य जननादिरहितस्य चतुर्मुखस्य ब्रह्मणः इति सायणः ।
7. अजस्य जन्मरहितस्य परमेश्वरस्य नाभावधि नाभिस्थानीयस्य स्वरूपस्य मध्ये एकमविभक्तमनन्यभूतं किंचिद् बीजं गर्भरूपमर्पितं स्थापितमिति महीधरः । अजस्य जन्मरहितस्य ब्रह्मणः इति सायणः । The Unborn Aja, seems here to be identified with Visvakarman-Griffith.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निर्देवता । परमात्माग्निः प्रार्थ्यते । हे परमात्मन्, त्वं समुद्रोऽसि समुद्रवन्ति भूतानि येन निमित्तकारणेन प्रकृत्युपादानात् स समुद्रः ज्ञानपारावारो[8] वा तथाविधः असि । विश्वव्यचाः विश्वस्मिन् व्यचो व्याप्तिर्यस्यास्ति सः, तादृशोऽसि । अजः असि न जायते इत्यजः एकपाद् एकस्मिन् पादे विश्वं यस्य तादृशश्च असि, "पादोऽस्य विश्वा भूतानि" ऋग् 10,90,3 इति श्रुतेः । अहिः असि बुध्न्यः, अहिः समस्तविद्यासु व्यापनशीलः इति दयानन्दः, न हीयते इत्यहिरिति महीधरः, बुध्न्यः बुध्नम् अन्तरिक्षं मस्तिष्कं हृदयं वा तत्र निवासाद् बुध्न्यः तादृशः असि । यद् वा बुध्न्यः अन्तरिक्षस्थो अहिः मेघः त्वमसि, मेघवज्जीवनप्रदोऽसीत्यर्थः, त्वं वाग् असि वेदवाचामुपदेष्टाऽसि, ऐन्द्रम् असि इन्द्रस्य जीवात्मनो बलमसि । ऋतस्य सत्यस्य द्वारौ द्वारभूतौ हे परमात्मजीवात्मानौ, युवां मा मां,मा सन्ताप्तं न सन्तापयतम् । हे अध्वनाम् अध्वपते सर्वेषां जीवनमार्गाणां रक्षक परमात्मन्, मा मां प्र तिर जीवनमार्गेषु प्रकर्षेण तारय वर्धय वा । अस्मिन् देवयाने पथि देवाः सदाचारिणो विद्वांसो यान्ति यस्मिन् स देवयानः पन्थाः तस्मिन् मे मम स्वस्ति कल्याणं भूयाद् इत्याशंसा ।

अथाप्येषा भवति—

अजो न क्षां दाधार पृथिवीं
तस्तम्भ द्यां मन्त्रेभिः सत्यैः ॥

ऋग् 1. 67. 3.

अग्निर्देवता । अजो[9] न जन्मरहितः परमात्मेव अयम् अग्निः सूर्यः क्षां क्षियन्त्यस्यां प्राणिन इति क्षा तां पृथिवीं भूमिं दाधार धारयति । किं च सत्येभिः मन्त्रैः दृढैर्नियमैः द्यां द्युलोकमपि तस्तम्भ स्तभ्नाति ।

जीवात्मा

जीवोऽप्यज उच्यते । न जायते नित्यत्वाद्, अजति गच्छति शरीराणि कर्मफलभोगाय, अजति कर्माणि करोतीति वा, शत्रून् प्रक्षिपतीति वा । तस्यैषा भवति—

अजो भागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः ।
यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकम् ॥

ऋग् 10, 16, 4

अन्त्येष्टिकर्मणि विनियोगः । जीवितशरीरे द्वौ भागौ—अजो भागः नित्य आत्मा एकः, पांचभौतिको देहो द्वितीयः । अजभागविषये प्रार्थ्यते । हे जातवेदः

---

8. समुद्र इवागाधो ज्ञानेन—महीधरः ।
9. "अजातत्वात् अजः प्रजापतिः"—स्कन्दः । "अजो न जन्मरहितः स्वयंभूरिव—कपाली शास्त्री । सूर्य इवेति वेंकटः । अजो न, अजति गच्छतीत्यजः सूर्यः, यद्वा न जायते इत्यजः जन्मरहित इत्यर्थः इति सायणः । अजः न अजति गच्छतीति अजः सूर्यः इति मुद्गलः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणिनां जातानि सम्पन्नानि कर्माणि शुभाशुभानि वेत्तीति तादृश हे परमात्मन्, मृतकस्य यः अजो[10] भागः जीवात्मरूपः यो हि मृताच्छरीरान्निर्गत्य शरीरान्तरं पुनर्जन्मलाभाय व्रजति, तं त्वं तपस्व परिपक्वं फलपाकोन्मुखं विधेहि । ते शोचिः पवित्रन्यायशक्तिः तं तपतु फलपाकोन्मुखं करोतु, ते अर्चिः प्रदीप्ता क्रियाशक्तिः तं तपतु । याः ते शिवाः तन्वः यानि तव सुखप्रदायकानि स्वरूपाणि ये च तव न्यायकरा गुणकर्मस्वभावाः सन्ति ताभिः तैः एनं मृतकस्य जीवात्मानं सुकृतां पुण्यकारिणां लोकं गृहं वह प्रापय । "जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ऋग् 1, 164.30" इति स्मरणात् । मृतस्य अमर्त्यः अमरणधर्मा जीवः मर्त्येन मरणधर्मकेण शरीरेण सयोनिः योनिर्गृहं सगृहः सन् स्वधाभिः भोगेच्छाभिः चरतीति भावः ।

तस्यैषाऽपरा भवति—

आनयतमौ रभस्व सुकृतां लोकमपि गच्छतु प्रजानन् ।
तीर्त्वा तमांसि बहुधा महान्त्यजो नाकमाक्रमतां तृतीयम् ॥

अथर्व 9. 5. 1

अजो देवता । सायणेन तु—**"अस्मिन् सूक्ते पंचौदने नाम सवे हूयमानस्याजस्य जीवतो मारितस्य च प्रशंसा । आपराजिताया आनीयमानोऽजः प्रोक्तप्रकारेण हतः संस्कृतश्च इन्द्रं तर्पयित्वा तृतीयनाके नाम स्वर्गभागे यद्वा सुकृतां पुण्यलोके गच्छति[11] ।"** इति हन्त छागस्य पशोरग्नौ हूयमानस्य स्वर्गगमनं स्वीकृतमिति विचित्रोऽयं पन्थाः । वस्तुतस्तु, अजोऽत्र जीवात्मा, अनादिरनश्वरः, तृतीयो नाकश्च मोक्षलोकः "यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त । यजु 32. 10" इति स्मरणात् ।

अथ मन्त्रार्थः । एतम् अजम् अजन्मस्वरूपं नित्यं देहविशिष्टं जीवात्मानं मोक्षार्थिनम् आनयत ज्ञानकर्मयोगस्थलं प्रापयत । हे अज जीवात्मन्, त्वम् आरभस्व ज्ञानकर्मयोगं प्रारभस्व । अयम् अजः जीवात्वा प्रजानन् शुभज्ञानसंग्रहं शुभकर्मसंग्रहं च कर्तुं जानानः सुकृतां सुकृतकारिणां लोकं मोक्षम् अपि गच्छतु प्राप्नोतु । अयम् अजः जीवात्मा बहुधा बहुप्रकारेण महान्ति तमांसि निविडान् अज्ञानमोहाद्यन्धकारान् तीर्त्वा संतीर्य तृतीयं नाकं ब्रह्मानन्दैकस्वरूपं मोक्षम् आक्रमताम् अधितिष्ठतु । भौतिकसुखं प्रथमो नाकः, अध्यात्मसुखं द्वितीयो नाकः, मोक्षसुखं तृतीयो नाकः[12] ।

---

10. अजः जननरहितः शरीरेन्द्रियादिभागव्यतिरिक्तोऽन्तरपुरुषलक्षणो यः भागः अस्ति इति सायणः । ग्रिफिथस्तु छागार्थं गृह्णातीति चिन्त्यम्—Thy portion is the goat. The goat : that was slaughtered and laid limb by limb on the corpse."

11. तुलनीयम् : The Victim (the Goat) sacrificed to the Gods goes immediately to heaven—Griffith.

12. आत्मपक्षे सम्पूर्णसूक्तस्यार्थसंगत्यै द्रष्टव्यं श्रीपाददामोदरसातवलेकरकृतम् अथर्ववेदसुबोधभाष्यम्, पारडी (बलसाड) स्थस्वाध्यायमण्डलात् प्रकाशितम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदित्य :

आदित्योऽप्यज उच्यते । अजति गच्छति निरन्तरं स्वधुरि, यद्वा अजति तमांसि प्रक्षिपतीत्यज आदित्यः । तस्यैषा भवति—

यः श्वेताँ अधिनिर्णिजश्चक्रे कृष्णाँ अनु व्रता ।
स धामं पूर्व्यं ममे यः स्कम्भेन वि रोदसी
अजो न द्यामधारयन्नभन्तामन्यके समे ॥

ऋग् 8. 41. 10

वरुणो देवता । **वरुणो वृणोतीति सतः** इति यास्कः (निरु. 10.3) **यः सर्वान् शिष्टान् मुमुक्षून् धर्मात्मनो वृणोति, अथवा यः शिष्टैर्मुमुक्षुभिर्धर्मात्मभिर्व्रियते वर्यते वा स वरुणः परमेश्वरः, अथवा वरुणो नाम वरः श्रेष्ठः**[13] इति दयानन्दः । यो वरुणः परमेश्वरः व्रता व्रतानि कर्माणि अनु कर्मानुकूलम् अधिनिर्णिजः अधिगतरूपान, **निर्णिगिति रूपनाम नि०** 3. 7, श्वेतान् दिवसे श्वेतप्रभान् पदार्थान् रात्रौ कृष्णाभान् चक्रे करोति, स वरुणः स्कम्भेन मानेनेव पूर्व्यं धाम अन्तरिक्षं रोदसी द्यावापृथिव्यौ च विममे परिच्छिनत्ति, **"मानेनेव तस्थिवा अन्तरिक्षे वि यो ममे पृथिवीं सूर्येण,** ऋग् 5. 85. 5" इति वचनात् । किं च सः अजो[14] न अजनः आदित्य इव द्यां द्युलोकम् अधारयत् । स एव वरुणोऽस्माकमनुशासिता भवतु,। येन अन्यके समे परे सर्वे कामक्रोधाद्याः शत्रवः नभन्तां हिंस्यन्ताम्, नभतिर्हिंसाकर्मा ।

तस्यैषाऽपरा भवति—

अजो ह्यग्नेरजनिष्ट शोकात् सो अपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्र आयंस्तेन रोहान् रुरुहुर्मेध्यासः ॥

अथर्व 4. 14. 1

अजः आदित्यः अग्नेः शोकात् अग्नितत्त्वस्य तापाद् अजनिष्ट समुत्पन्नः, अग्निप्रधानत्वात् तस्य । जातः सः अग्रे संमुखं जनितारम् उत्पादकं परमेश्वरम् अपश्यत् ददर्श । तेन अजेन आदित्येन देवाः तत्तेजसा प्रकाशमानाः सोममङ्गलबुधगुरुशुक्रपृथिव्यादयो ग्रहोपग्रहाः अग्रे आदित एव देवतां देवत्वं दीप्यमानत्वम् आयन् प्रापुः । मेध्यासः मेधार्हाः जगद्यज्ञसम्पादकास्त एव देवा दीप्यमाना ग्रहोपग्रहाः तेन आदित्येनैवाकृष्टाः स्वस्वपरिधौ स्थापिताः सन्तो रोहान् रुरुहुः गगनमण्डले आरोहणं चक्रुः । यद्वा मेध्यासः पवित्रान्तःकरणाः याज्ञिकजनाः तेन अजेन आदित्येन साकं रोहान् रुरुहुः क्रमशः सवनारोहणं चक्रुः, यथा खल्वादित्यः प्रातः प्राच्यामुदितो मध्याह्नकाले दिवं

13. सत्यार्थप्रकाशे प्रथमसमुल्लासे ।

14. "अजो न यथा आदित्यः द्यां धारयति" इति सायणः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सायं च प्रतीचीमारोहति तथा ते प्रातःसवनं माध्यन्दिनसवनं सायंसवनं च कुर्वन्तीत्यर्थः। यद्वा यथाऽऽदित्यः पृथिव्या अन्तरिक्षम्, अन्तरिक्षाद् दिवं चारूढो दिवोऽपि परभागे तिष्ठति तथा मेध्यासः पवित्रचेतसो जनाः क्रमशः सोपानात् सोपानमधिरुह्य मोक्षाख्यं स्वर्ज्योतिरधिगच्छन्ति[15]। स एवाधिरोहणप्रकारः परस्मिन् मन्त्रे समुद्दिष्ट :—

"पृष्ठात् पृथिव्या अहमन्तरिक्षमारुहमन्तरिक्षाद् दिवमारुहम्।
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम् इति॥"

अथर्व 4. 14. 3

अजः एकपात्

अजः एकपाद् निरुक्ते द्युस्थानासु देवतासु परिगणितः। **"अज एकपाद् अजन एकःपादः, एकेन पादेन पातीति वा, एकेन पादेन पिबतीति वा, एकोऽस्य पाद इति वा"**, 12. 3 इति निरुक्तम्। आदित्य एव अज एकपादुच्यते। स खलु कीलके भ्रमन् भ्रमरक इव स्वकीयधुरि भ्रमति, अत एकपादुक्तः। यथा द्वाभ्यां पादाभ्यां चतुर्भिः पादैर्वा कश्चिच्चलति, न तथा सूर्यः। यद् वा यो गतिमान् सन् एकेन निजरश्मिजालेन सर्वान् पाति रक्षति, अथवा एकेन रश्मिजालेन रसान् पिबति स सूर्यः अज एकपादिति नाम्ना प्रथितः। अथात्र तैत्तिरीयब्राह्मणमपि भवति, **"अज एकपादुदगात् पुरस्तात्.... तं सूर्यं देवमजमेकपादम्** (3. 1. 2. 8)" इति। परमेश्वरो[16]ऽपि अज एकपादुच्यते, यः कदाचिन्न जायते, एकश्च पादो जगति यस्य सः **"पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि,** ऋग् 10. 90. 3" इति स्मरणात्। वायुरप्यज एकपादुच्यते, यद्यपि निरुक्ते मध्यमस्थाने नाऽऽम्नातः। अजः अजनः वेगशीलः, आकाशरूपे चैकस्मिन् पादे प्रतिष्ठितः[17]। केषांचिन्मते चन्द्रमा मेघो वा एकपाद् अज इति कीर्तितः।[18] तस्यैष निपातो भवति बहुदेवतायामृचि—

---

15. अस्मिन् मन्त्रे अजः अग्निर्जीवात्मा चापि व्याख्यातुं शक्यते। अजः अजनज्वालः पार्थिवोऽग्निः अग्नेः शोकात् सूर्यस्य तापात् अजनिष्ट समुत्पन्न उति। अजो ऽीवात्मापि अग्नेः परमात्मनः शोकात् तपसः अजनिष्ट देहे जन्म लभते।

16. द्रष्टव्यं दयानन्दभाष्यम्, ऋग् 6.50.14, 7.35.13, यजु 5.33

17. वायुरेकपात् तस्याकाशं पादः। गो. ब्रा., पू. 2.9

18. Roth, with whom Grassmann agrees, regards Aja ekapad as genius of the storm, translating the name as the 'one footed Driver or Stormer' Bloomfield and Victor Henry think he represents a solar deity. Hardy believes that 'the goat who goes alone' is the moon. Bergaigne, interpreting the name as 'the unborn (a–ja) who has only one foot' thinks it means he who inhabits the one isolated mysterious world. I another conjecture may be added, the name meaning 'the one footed goat', was originally a

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"शं नो अज एकपाद् देवो अस्तु ।
शं नोऽहिर्बुध्न्यः शं समुद्रः ॥" इति

ऋग् 7.35.13

अग्नि :

अग्निरप्यज उच्यते[19], अजति गच्छति ज्वालाभिः, प्रक्षिपति च तमोरोगादीनि । तस्यैषा भवति—

अजमनज्मि पयसा घृतेन दिव्यं सुपर्णं पयसं बृहन्तम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभिनाकमुत्तमम् ॥

अथर्व 4. 14. 6

अहं दिव्यं देदीप्यमानं सुपर्णं शोभनज्वालारूपपक्षोपेतं पयसं वृष्टिकर्तारं बृहन्तं महान्तम् अजं यज्ञाग्निं[20] पयसा पयोविकारेण घृतेन सर्पिषा अनज्मि प्रज्वालयामि । तेन तद्द्वारा वयं सुकृतस्य पुण्यस्य फलभूतं लोकं गेष्म गच्छेम । तदेवोच्यते—स्वः आनन्दस्वरूपं परमेश्वरम् आरोहन्तः आरुह्य प्राप्नुवन्तः उत्तमं नाकं सुखमयम् उत्कृष्टतमं मोक्षम् अभि गेष्म गच्छेम । यज्ञस्यैतत् फलं मन्त्रान्तरेऽप्युक्तम्—

स्वर्यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरे ॥ इति

यजु 17. 68, अथर्व 4. 14. 4

अजोऽयम् आत्मपरतयापि व्याख्यातुं सुशकः । अजं जीवात्मानम् अहं पयसा माधुर्येण, दिव्यानन्दरसेन घृतेन तेजसा व अनज्मि प्रकाशयामीति ।

पूष्णो वाहनाः

पूष्णो देवस्य वाहना अपि अजाः । तथा च निघण्टुः, **"अजाः पूष्णः** 1. 15" इति । तेषामेषा भवति—

आ ते रथस्य पूषन्नजा धुरं ववृत्युः ।
विश्वस्यार्थिनः सखा सनोजा अनपच्युतः ॥

ऋग् 10. 26. 8

हे पूषन् हे परिपुष्ट जीवात्मन्, ते तव रथस्य शरीरशकटस्य धुरम् अजाः अजनाः गतिमयाः प्राणाः ववृत्युः आवर्तयन्ति । त्वं विश्वस्य सर्वस्य अर्थिनः याचकस्य सखा

---

figurative designation of lightning, the 'goat' alluding to its agile swiftness in the cloud-mountains, and the one foot to the single streak which strikes the earth. Vedic Mythology, Motilal Banarsidass 1971, PP 73-74.

19. "अजति आहवनीयरूपेण यज्ञप्रदेशे गच्छतीत्यजः" इति 5. 33 यजुर्भाष्ये महीधरः ।

20. सायणमते तु अजोऽयं छागपशुरेव । उक्तं च तेन—"अजम् अनज्मि" इत्यनया अजौदनसवे दर्भेषूद्धृतं पाशुकं हविः आज्येनाभ्यञ्ज्यात् । सूत्रितं हि-उद्धृतम् "अजमनज्मि" इत्याज्येनानक्ति कौ. सू. 64. 17 इति । ग्रिफिथादयोऽपि मन्त्रमेतं छागबलिपरमेव मन्यन्ते ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिलषितशक्तिप्रदातृत्वात् मित्रभूतः, सनोजाः सनातनः, अनपच्युतः अपराजितश्च असि । यद्वा, हे पूषन् सर्वतः परिपुष्ट परमात्मन्, ते रथस्य ब्रह्माण्डशकटस्य धुरम् अजाः अजन्मानो जीवाः, अजाः अजनाः अग्निवायुजलविद्युत्पर्जन्यभूमिसूर्यादयश्च ववृत्युः वहन्ति । शिष्टं पूर्ववत् । इत्यध्यात्मम् ।

हे पूषन् सूर्य, **"अथ यद् रश्मिपोषं पुष्यति तत् पूषा भवति** (12.18) इति निरुक्तम् । **"असौ वै पूषा योऽसौ (सूर्यः) तपति"** इति[21] च ब्राह्मणम् । ते रथस्य धुरम् अजाः अजनाः रश्मयः ववृत्युः वहन्ति । तथा च स्मर्यते—"उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥(ऋग् 1.50.1)" इति । शिष्टं समानम् । अथ वातोऽपि पूषा भवति, सर्वेषां पोषकत्वात् । **"अयं वै पूषा योऽयं (वातः) पवते । एष हीदं सर्वं पुष्यति"** इति हि ब्राह्मणम्[22] । हे पूषन् पोषक वात, ते रथस्य धुरम् अजाः अजनाः नित्यनियुक्ताः अश्वाः ववृत्युः वहन्ति इत्यधिदैवतम् । वातस्य सततप्रवृत्तत्वात् तद्रथं सततगतिमन्तोऽश्वा वहन्तीति कविकल्पना । वातरथश्चैवं वर्णितः कविना—

वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्नस्य घोषः ।
दिविस्पृग् यात्यरुणानि कृण्वन्नुतो एति पृथिव्या रेणुमस्यन् ॥

ऋग् 10.168.1

छागः

अजशब्दो यथा लोके तथा वेदे छागपशुवाचकोऽपि । अजति गच्छति गृह्णाति द्वौ पादावुपरि कृत्वा वृक्षशाखादिकम् इत्यजः छागः । तस्यैषा भवति—

दीर्घं ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः ।
पूर्वेण मघवन् पदाजो वयां यथा यमो
देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ॥

ऋग् 10.134.6

इन्द्रो देवता । सेनापतिरुद्बोध्यते । हे मन्तुमः सैन्यविद्याभिज्ञ सेनाध्यक्ष त्वं हि यथा दीर्घम् अंकुशं सृणिं बिभर्षि धारयसि तथा शक्तिं शत्रुपराजयकारिबलमपि बिभर्षि । अन्यथा निःशक्तिकस्य किमङ्कुशेन । हे मघवन् शस्त्रास्त्रादिविभवसम्पन्न, यथा अजः छागः पूर्वेण देहस्य पूर्वभागे विद्यमानेन पदा पादेन वयां शाखां, **"वयाः शाखाः वेतेः, वातायना भवन्ति** (1.4)" इति निरुक्तम्, आकर्षति तथा यमः शत्रून् नियच्छ । त्वां देवी जनित्री दिव्या माता अजीजनत् उत्पादयामास, भद्रा जनित्री भद्रा माता अजीजनत् उत्पादयाञ्चक्रे इत्यतः ।

---

21 कौ. ब्रा. 5. 2, गो. ब्रा., उ. 1. 20

22 श. ब्रा. 14. 2. 1. 9

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योद्धारः

योद्धारोऽप्यजा उच्यन्ते, अजन्ति गच्छन्ति शत्रून् प्रति, यद्वा अजन्ति प्रक्षिपन्ति शस्त्रास्त्राणि ते । तेषामेषा भवति—

आवदिन्द्रं यमुना तृत्सवश्च प्रात्रं भेदं सर्वताता मुषायत् ।
अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि ॥

ऋग् 7. 18. 19

इन्द्रो नाम सैन्याध्यक्षः । **"इन्द्रः—इन्दन् शत्रूणां दारयिता वा द्रावयिता वा** (10. 8.)" इति निरुक्तम् । यमुना सेना, नियच्छति शत्रूनिति । सा इन्द्रं सैन्याध्यक्षम् आवत् गच्छति, अव गत्यादिषु, तृत्सवः हिंसका अन्ये वीराश्च, तृदिर् हिंसानादरयोः, आवन् प्राप्नुवन्ति । ततः अत्र सर्वताता सर्वतातौ युद्धे स इन्द्रः भेदं विदारकं शत्रुं प्र मुषायत् प्र मुष्णाति प्रकर्षेण हन्ति । अजासः शस्त्रास्त्रप्रक्षेपकाः, शिग्रवः अव्यक्तशब्दकर्तारः, शिजिधातोरौणादिको रुक् प्रत्ययः, यक्षवः संगंतारश्च भटाः युद्धे अश्व्यानि अश्वसंबन्धीनि शीर्षाणि शिरांसि बलिं जभ्रुः बलिमुपहरन्ति[23] ।

प्रेरक :

अज धातोर्गत्यर्थात् अजः प्रेरकः इत्यर्थेऽपि वेदे दृश्यते । यथा—

वृत्रखादो वलंरुजः पुरां दर्मो अपामजः ।
स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृळहा चिदारुजः ॥

ऋग् 3. 45. 2

इन्द्रो देवता । इन्द्रः सेनापतिः वृत्रखादः शत्रुभक्षकः, वलंरुजः न्यायादेरावरकस्य दुष्टस्य भञ्जकः, पुरां रिपुनगरीणां दर्मः विदारकः, दृ विदारणे, अपां स्वकीयप्रजानाम् अजः प्रेरकः, यद्वा अपां नदीकुल्यादीनाम् अजः प्रेरकः कर्षकाणां कृष्यर्थमित्याशयः, अभिस्वरे अभिस्वरन्ति शब्दायन्ते विजयघोषं हाहाकारं वा कुर्वन्ति जना यत्र तादृशे

---

23. अत्र तृत्सवः, अजासः, शिग्रवः, यक्षवः एतेषां शब्दानां यौगिकार्था महर्षिदयानन्दभाष्याद् गृहीताः । सायणेन अजाः शिग्रवः यक्षवश्च जनपदविशेषा अङ्गीकृताः । "वैदिक इण्डैक्स ग्रन्थे च सुदासो राज्ञः सहयोगिभिः तृत्सुभिः पराजिता एते शत्रुविशेषा अभिमताः—"The Ajas are named in one verse of the Rigveda as having been defeated by the Trtsus under Sudas. They are there mentioned with the Yaksus and Sigrus, and Zimmer conjectures that they formed part of a confederacy under Bheda against Sudas. The name has been regarded as a sign of totemism, but this is very uncertain, and it is impossible to say ifthey were or were not Aryans.—Vedic Index.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संग्रामे हर्योः अश्वयोः रथस्य स्यन्दस्य स्थाता, दृढा चित् दृढानामपि शत्रूणाम् आरुजः समन्ताद् भङ्क्ता च भवति ।

अजपाकः

अथर्ववेदे पञ्चौदनस्य अजस्य पाको वर्णितः[24] । छागः पशुरेव तत्र विशस्यते पच्यते वह्नौ हूयते चेति केषांचिदाशयः । कौशिकसूत्रप्रामाण्यमनुसरन् भाष्यकृत् सायणस्तथैव स्वीकरोति । ह्विटने-ग्रिफिथप्रभृतयो वैदेशिका विद्वांसोऽपि तमेव पन्थानमनुधावन्ति । परम् अजोऽयं यः कोऽपि भवेत्, छागः पशुर्नास्तीति स्वयं मन्त्रवर्णा एव ज्ञापयन्ति । मन्त्रवर्णितः 'अजः' अग्नेः शोकात् जन्म लभते, लब्धजन्मनस्तस्य पृथिवी उरः, द्यौः पृष्ठम्, अन्तरिक्षं मध्यं, दिशः पार्श्वे, समुद्रौ कुक्षी, सत्यं च ऋतं च चक्षुषी, विश्वं सत्यं, श्रद्धा प्राणः, विराट् शिरः[25]। कथं नाम सर्वमेतत् पशौ छागे संगच्छेत ।

तर्हि कोऽयमजः अध्यात्मदृशा जीवात्मा अजः, पञ्च प्राणा वा, पञ्च ज्ञानेन्द्रियाणि वा तस्य पञ्चौदनानि । स हि अग्नेः परमात्मनः शोकात् तपसः[26] जन्म लभते । अजन्मनोऽपि तस्य जन्मवर्णनं शरीरलाभाशयेन । स्वात्मानं स्वयमेव वर्णयति—

सूर्यो मे चक्षुर्वातः प्राणोऽन्तरिक्षमात्मा पृथिवी शरीरम् ।
अस्तृतो नामाहमयमस्मि स आत्मानं निदधे द्यावापृथिवीभ्यां गोपीथाय ॥

अथर्व 5. 9. 7

स हि जीवात्मा मोक्षार्थी सन्नात्मानं परिपचति । अपरिपक्वो हि न पूर्णतां लभते । वेदेषु परिपक्वताया महान् महिमा । यो हि पाकशंसः[27] पाकस्थामा[28] स आर्यः, यश्च अपाकः स राक्षसः । अपाकात् समाजस्य व्यक्तेश्च रक्षाऽभिप्रेता भवति[29] । पाकश्च पूज्यते[30] । पाकेन मनसा चरन्तं न कश्चन रिपुरुद्वेजयितुमीष्टे—

यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।
आप इव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ॥

ऋग् 7. 104. 8

---

24. अथर्व. 4. 15.. 9.5
25. अथर्व 9.5.20, 21
26. यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः । तस्मादेतद् ब्रह्म नामरुपमन्नं च जायते ॥ मु. उप. 1.9
27. ऋग् 7.104.9
28. ऋग् 8.3.21
29. अपाकाच्चिद् यमवति । ऋग् 8.2.35
30. पाकत्रा स्थन देवाः । ऋग् 8.18.15

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्माद् अजनामधेयस्य जीवात्मनः परिपाक उपदिष्टः। परिपक्वश्च स नाकमुद्गच्छति। तस्यैते भवतः—

शृतमजं शृतया प्रोर्णुहि त्वचा सर्वैरङ्गैः संभृतं विश्वरूपम्।
स उत् तिष्ठतो अभि नाकमुत्तमं पद्भिश्चतुर्भिः प्रतितिष्ठ दिक्षु॥

अथर्व 4. 15. 9

शृतं यमनियमादियोगाङ्गानुष्ठानात् परिपक्वम् अजं जीवात्मानं शृतया तपसा परिपक्वया त्वचा त्वगुपलक्षितेन शरीरेण प्रोर्णुहि आच्छादय। कीदृशम् अजम्? सर्वैः अङ्गैः संभृतं सर्वाङ्गसंपूर्णं षोडशकलं, विश्वरूपं विश्वस्मिन् स्वकीयं रूपं पश्यन्तम् अखिलगुणगणसमन्वितं वा। स तद्वैशिष्ट्योपेतस्त्वं हे अज जीवात्मन्, जीवन्मुक्तिदशायां चतुर्भिः पद्भिः धर्मार्थकाममोक्षैः साकं दिक्षु प्रतितिष्ठ प्रतिष्ठितो भव, किं च देहत्यागानन्तरम् इतः अस्माल्लोकात् उत्तमं नाकं सर्वोत्कृष्टं मोक्षलोकम् उत् तिष्ठ उद्गच्छ।

प्र पदोऽवं नेनेग्धि दुश्चरितं यच्चचार शुद्धैः शफैराक्रमतां प्रजानन्।
तीर्त्वा तमांसि बहुधा विपश्यन् अजो नाकमाक्रमतां तृतीयम्॥

अथर्व 9. 5. 3

नहि कश्चिद् दुश्चरित्रमलिनो मोक्षमवाप्तुमर्हतीति मालिन्यमपाकर्तुमुपदिश्यते। हे अज जीवात्मन्, त्वं जीवने यद् दुश्चरितं पापकर्म चचार आचरितवान् ततः मलिनान् पदः पादान् दूषितं स्वरूपमित्यर्थः अवनेनेग्धि सदुपदेशश्रवणादिभिरुपायैः शोधय। प्रजानन् प्रकृष्टज्ञानसम्पन्नोऽयं जीवः शुद्धैः शफैः निर्दुष्टैः स्वरूपैः आक्रमतां मोक्षाय प्रयतताम्। बहुधा श्रवणमननिदिध्यासनशमदमतितिक्षादिभिर्बहुभिरुपायैः, तमांसि मोहाज्ञानान्धकारान् तीर्त्वा संतीर्य विपश्यन् परब्रह्मस्वरूपं साक्षात्कुर्वन् अयम् अजः जीवात्मा तृतीयं नाकं मोक्षलोकम् आक्रमताम् अधिरोहतु। **"परोक्षप्रिया वै देवाः प्रत्यक्षद्विषः"** इति न्यायेन प्रहेलिकारूपमाधातुं जीवात्मा छागपशुवाचकेन अजशब्देनाभिधीयते, तत्र शफाद्यारोपश्च क्रियते कविना। अतिशयोक्तिरलङ्कारः।

इत्यध्यात्मम्। अथाधिदैवतम्। अजो हि गगने विद्यमानो मेषराशिः। पृथिवी खलु परिक्राम्यन्ती यस्य राशेः संमुखीना जायते स एव दृष्टिपथमारोहति। मेषराशिरूपोऽयम् अजः पूर्वं पृथिव्याः क्षितिजे समुदेति, शनैः शनैराकाशं समारोहति। प्राक् प्रथमं नाकं, ततो द्वितीयं नाकं, तदुत्तरं तृतीयं नाकम्। तदेवोच्यते "अजो नाकमाक्रमतां तृतीय" मिति। अजराशौ विद्यमानस्तारकपुञ्जो यदा तीव्रप्रकाशयुक्तो भवति तदासौ शृतः परिपक्वो वा स्मर्यते। परिपक्वः सन्नसौ अजः पद्भिश्चतुर्भिर्नाकमुत्तिष्ठतीति दिक्।

अजदानम्

अजदानस्यापि महत् सुफलमुदीरितमाथर्वणवेदे—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजो अग्निरजमु ज्योतिराहुरजं जीवता ब्रह्मणे देयमाहुः ।
अजस्तमांस्यप हन्ति दूरमस्मिल्लोके श्रद्दधानेन दत्तः ॥

अथर्व 9. 5. 7

आत्मैवायम् अजः । तस्य परमात्मने दानं समर्पणं वा महच्छ्रेयस्करम् । अजो जीवात्मा किल अग्निः, अजम् उ ज्योतिः आहुः निगदन्ति सन्तः । ब्रह्मैकं ज्योतिः, जीवात्मा द्वितीयं ज्योतिः । जीवात्मज्योतिषः परब्रह्मज्योतिषा मेलनमभीष्टम् । अत एवोच्यते जीवता पुरुषेण अजं जीवात्मानं ब्रह्मणे परमेश्वराय देयं समर्पयितुमुचितम् आहुः । अस्मिन् लोके श्रद्दधानेन श्रद्धालुना जनेन दत्तः परमेश्वराय समर्पितः अजः जीवात्मा तमांसि तमोगुणान् दूरम् अपहन्ति अपहत्य सुदूरं प्रक्षिपति । स्वात्मानं परब्रह्मणि समर्प्य जीवोऽविद्यादिजन्युसमस्ततमोजालं निर्बाधमपहत्य ब्रह्मानन्दसरोवरे कृतावगाहः परमसन्तोषमनुभवतीत्यर्थः ।

पञ्च रुक्मा पञ्च नवानि वस्त्रा पञ्चास्मै धेनवः कामदुघा भवन्ति ।
यो ३जं पञ्चौदनं दक्षिणाज्योतिषं ददाति ॥

अथर्व 9. 5. 25

यो दक्षिणाज्योतिषं दक्षिणा त्यागे श्रद्धा एव ज्योतिः शक्तिर्यस्य तादृशं पंचौदनं पञ्चप्राणसहचरितम् अजं जीवात्मानं ददाति परब्रह्मणे समर्पयति तस्मै पञ्च रुक्माः पञ्च यमाः पञ्च नियमा वा, पञ्च नवानि वस्त्रा वस्त्राणि वस्त्रवदाच्छादकाः अन्नमय-प्राणमय-मनोमय-विज्ञानमय-आनन्दमयसंज्ञिताः पञ्च कोशाः, पञ्च धेनवः पञ्च ज्ञानेन्द्रियाणि च कामदुघाः अभिलाषपूर्तिकराः भवन्ति ।

लोके तावद् अजपशोर्दानमप्येतेन संसूच्यते । न केवलमेकाकिनस्तस्य दानं स्यात् परं वस्त्राणां हिरण्यादीनां चापि भवेत्—

अमोतं वासो दद्याद्धिरण्यमपि दक्षिणाम् ।
तथा लोकान्त्समाप्नोति ये दिव्या ये च पार्थिवाः ॥

अथर्व 9. 5. 14

अश्वमेधीयः अजः

अश्वमेधे हि अश्वविशसनकाले अजः पुरो नीयते—

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात् कवयो यन्ति रेभाः ॥

ऋग् 1. 163. 12

कोऽयमश्वो यस्य वधः क्रियते ? वैदिकसाहित्ये अहिवृत्रशम्बरप्रभृतिभिर्नामभिर्मेघस्य वधः प्रसिद्धः । मेघोऽयमश्वनाम्नापि स्मर्यते—"प्र पिन्वतु वृष्णो अश्वस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारा:, ऋग् 5.82.6" इति पर्जन्यसूक्ते यथा। अत्रमेघेऽपि तस्यैव मेघरूपस्याश्वस्य विशसनमभिप्रेतं भवेत् "तव शरीरं पतयिष्ण्वर्वन् तव चित्तं वात इव ध्रजीमान्। तव शृङ्माणि विष्ठिता पुरुत्रारण्येषुजर्भुराणा चरन्ति, ऋग् 1. 163.11" इत्यादिरूपोऽश्वस्य परिचयो मेघमेव सूचयति। मेघस्यैव शरीरम् पक्षिवदुत्पतनशीलं चेतनत्वारोपे तस्यै चित्तं वायुवद् गतिशीलम्। तस्यैव शृङ्गाणि शृङ्गोपलक्षिता अवयवाः जर्भुराणा त्रुटिताः सन्तः अरण्येषु काननेषु पुरुत्रा बहुत्र विष्ठिता विविधं स्थिताः चरन्ति प्रवहन्ति।

अथ मन्त्रार्थः। अर्वा अरणवान् ऋ गतौ, गतिमान् अयं वाजी बलवान् मेघः देवद्रीचा[31] देवं पर्जन्यम् अञ्वति गच्छतीति तेन पर्जन्याभिलाषुकेण मनसा दीध्यानः जनैश्चिन्त्यमानः—अयं मेघो वर्षेदिति विभाव्यमानः सन् शसनं वधम् उपप्रागात् प्राप्नोति। अजः अजनः आदित्यः अस्य पुरो नीयते, यो हि अस्य नाभिः अनेन सम्बन्धभाक्, णह बन्धने। यदा हि मेघो वधमवाप्तः सन् भूमौ पतति, तदा सूर्यस्तत्संमुखमागच्छति तदुपरि प्रकाशते इति तात्पर्यम्। पाश्चात् रेभाः स्तोतारः कवयो मेधाविनः तम् सूर्यम् अनुयन्ति अनुसरन्ति। तेऽप्यागत्य "बहु वृष्टं, साधु वृष्टं, महदुपकृतम्" इत्यादिप्रकारेण स्तुतिं प्रयोजयन्तीति भावः।

अजा

अजशब्दस्य स्त्रियाम् 'अजा' इति प्रयुज्यते। लोकवद् वेदेऽपि छागी अजा। यथा—

कर्णगृह्या मघवा शौरदेव्यो वत्सं नस्त्रिभ्य आनयत्।
अजां सूरिर्न धातवे॥ ऋग् 8.70.15

गावो हि शत्रुभिरपहृत्य वत्सेभ्यो वियोजिताः, ततश्च इन्द्रः शत्रून् पराजित्य ताः प्रत्यानयत वत्सैश्च संगमयामासेति कथाऽत्रानुसन्धेया। मघवा विभवसम्पन्नो राजा त्रिभ्यो नः परिवारे माता पिता सन्ततिश्चेति त्रयः तेभ्यः तेषां पयःपानार्थमित्यर्थः शौरदेव्यः "**शूराश्च ते देवाश्च शूरदेवाः, तेषां हितं शौरदेवं युद्धं, तत्सम्बन्धिन्यो गाः, युद्धे शत्रून् हत्वा तत्सम्बन्धिन्य इत्यर्थः**" इति सायणः। ताः कर्णगृह्य कर्णे गृहीत्वा वत्सम् आनयत् तद्वत्सेन संयोजयति। तत्रोपमा अजां सूरिर्न धातवे इति। धातवे दुग्धपानाय सूरिः न प्रेरकः स्वामी यथा अजां छागीमानयति। यद्वा "**अजामेकां लोहितशुक्लकृष्णाम्**" इत्युपनिषत्प्रामाण्याद् अजा प्रकृतिः, तां सूरिः परमेश्वरः धातवे जगद् रचयितुं यथा आनयति तथा।

तस्या एषा अपरा भवति—

अजारे पिशंगिला श्वावित् कुरुपिशंगिला।
शश आस्कन्दमर्षत्यहिः पन्थां विसर्पति॥

यजु 23.56

31. विष्वग्देवयोश्च टेरद्रयञ्चतौ व प्रत्यये पा. 6.3.92 इति देवशब्दस्य टेरद्रिरादेशः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"का ईमरे पिशंगिला" इति प्रश्नस्योत्तरमिदम्—"**अजारे पिशंगिला**" इति। "**अरे अध्वर्यो, अजा पिशंगिला, अजा नित्या माया रात्रिर्वा पिशंगिला पिशं रूपं गिलति भक्षयति पिशंगिला, माया विश्वं ग्रस्ते, रात्रावपि रूपाणि न प्रतीयन्ते तमसा**" इति महीधरः। "**अजा जन्मरहिता प्रकृतिः। पिशंगिला रूपावरणकारिणी। अजा प्रकृतिः सर्वकार्यप्रलयाधिकारिणी कार्यकारणाख्या स्वकार्यं स्वस्मिन् प्रलापयति**" इति दयानन्दः।

उपसंहार :

तदेवं वैदिकसंहितास्वजशब्दस्यार्थाः परीक्षिताः। छागपशुव्यतिरिक्तम् अजशब्दवाच्यत्वेन वेदेषु परब्रह्म, जीवात्मा, आदित्यः, अग्निः, वायुः, प्राणः, मेघः, चन्द्रमाः, गतिमन्तः पृथिव्यादयो लोकाः, प्रकृतिः, योद्धारः, प्रेरकः इत्यादयोऽर्था अपि भवन्तीति सप्रमाणमस्माभिरुदीरितम्। यत्र कुत्रापि वेदेष्वजशब्दं निरीक्ष्य सहसा छागः पशुरित्यर्थो गृह्यते चेन्नायं साध्वाचरितः पन्थाः। विवेकबुद्ध्यैव वेदार्थे प्रवृत्तिः साधीयसी। अन्यथा "बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति" इत्युक्तिरस्मासु चरितार्था भवेत्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२ असुरः

संस्कृतसाहित्येः 'असुर' शब्दो दैत्यार्थे प्रसिद्धः । वैयाकरणसम्प्रदाये **'असेरुरन् 1.42'** इत्युणादिसूत्रेण असु क्षेपणे इति धातोरुरन्प्रत्यये कृते शब्दोऽयं सिध्यति । प्रत्ययस्य नित्करणमाद्युदात्तस्वरार्थम् । असु धातोरस्य निष्पत्तिर्वेदेऽपि सूचिता, यदुक्तं **'येनासुरां अभि देवा असाम** । ऋग् 10.53.4' इति । वैदिकसंहितासु शब्दोऽयं बहुशः प्रयुक्तः ।

यद्यपि लौकिकसंस्कृते 'असुर' शब्दश्रवणसमकालमेव दैत्यो, राक्षसः, पिशाचो, देवद्वेषी, अधार्मिको, दुरात्मा इत्यादयोऽर्थाः स्फुरन्ति, तथापि वेदेषु नायं सर्वत्र तदर्थे प्रयुक्तः । अनेकेषु स्थलेषु तावदिन्द्राग्निरुद्रवरुणादिदेवानां विलेषणत्वेनायं समागच्छति । वेदेषु शब्दोऽयम् एकतः परब्रह्मादिरूपं परमगौरवास्पदम् अर्थजातम्, अपरतश्च लोकवद् दस्युदैत्यराक्षसादिपरम् अर्थं द्योतयति । वेदभाष्यकारैरेतच्छब्दसिद्ध्यर्थं केचन विकल्पाः प्रस्तुताः । तद् यथा—

प्रशस्तार्थे

1. उणादिपद्धत्या असेरुरन् प्रत्ययः । असुरः क्षेप्ता पापिनां निग्रहीता, शत्रूणां निरसिता, धनानां निरसिता दानशीलः इत्यादि[1] ।
2. असून् प्राणान् राति ददातीत्यसुरः । रा दाने इति धातोः **'आतोऽनुपसर्गे** कः पा. 3.2.3' इति कः प्रत्ययः ।[2]
3. असुः प्राणो बलं वा तद्वान् । रो मत्वर्थीयः ।[3] असुरिति प्रज्ञानाम तद्वन्तः ।[4]
4. असुरा वसुराः वसुमन्तः । वकारलोपः ।[5]
5. यः असुषु रमते सः ।[6]
6. अविद्यमाना सुरा मद्यपानं यस्य ।[7]

---

1. सा. भा. अथर्व 1.10. 1, ऋग् 1.54.3, 1.126.2
2. सा. भा. ऋग् 1.35.7, 1.54.3, अथर्व 2.3.3, 4.8.2, उ. म. भा. यजु 34.26, द. भा. ऋग् 1.35.10
3. सा. भा. ऋग् 1.54.3 अथर्व 19.56·1, स्क. भा. ऋग् 1.108.6, 1.110.3, उ. म. भा. यजु 27.12
4. निरु. 10.34
5. अपि वा असुरत्वमादिलुप्तम् निरु. 10.34, असुरः वसुरः धनवान्, अस्मिन् पक्षे आदिलोपः, उ. भा. यजु 27.12
6. द. भा. ऋग् 1.35.7, 7.30.3
7. द. भा. ऋग् 2.27.10

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निन्दितार्थे

7. न सुरा असुराः, सुरविरोधिनः ।[8]
8, असून् प्राणान् लान्ति आददते अपहरन्तीति असुराः ।[9]
9. अस्यन्ति शरीरं क्षिपन्ति पातयन्तति असुरा व्याधयो राक्षसा वा ।
'असेरुरन् (उ. 1.42) इति उरन् प्रत्ययः ।[10] अस्ताः स्थानेभ्यः ।[11]
10. असुराः अ-सु-रताः स्थानेषु ।[12]
11. न सुष्ठु शोभनम् इत्यसु, तद्वन्तः असुराः अशोभनयुक्ताः ।[13]

प्रशस्तार्थे

अथेदं विचार्यते प्रशस्तेषु के तावदसुरनामभाज इति ।

इन्द्रः

इन्द्रोऽसुर उच्यते । तस्यैषा भवति—

तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे ।
महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥

ऋग् 8. 91. 6, साम 1412

हे असुर बलवन् प्राणवन् अधार्मिकाणाम् उच्छेत्तः इन्द्र परमेश्वर, प्रचेतसं प्रकृष्टज्ञानं तम् उ त्वा वयं भागमिव स्वात्मार्थे नियतमंशमिव राधः आध्यात्मिकम् ऐश्वर्यम् ईमहे याचामहे । हे इन्द्र महीव कृत्तिः यथा तव महद् यशः सर्वत्र प्रसरद् वर्तते तथा ते शरणा तव शरणमपि सुमहद् विद्यते, **'कृत्तिः कृन्ततेः यशो वा अन्नं वा'** 5.22 इति निरुक्तम् । ते सुम्ना सुम्नानि सुखानि नः अस्मान् प्र अश्नवन् प्रकर्षेण व्याप्नुवन्तु ।

तस्यैषापरा भवति—[14]

त्वं राजेन्द्र ये च देवा रक्षा नृन् पाह्यसुर त्वमस्मान् ।
त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहोदाः ॥

ऋग् 1.174.1

---

8. सा. भा. अथर्व 4.23.5, 6.86.3, 6,100.3, 11.7.7, 19.13.1
9. सा. भा. अथर्व 2.3.3
10. तदेव
11. निरु. 3.8
12. तदेव
13. 'सोर्देवानसृजत तत्सुराणां सुरत्वम् असोरसुरानसृजत तदसुराणामसुरत्वमिति विज्ञायते ।' तदेव
14. इन्द्रस्यासुरत्वप्रतिपादका एतेऽपि मन्त्रा द्रष्टव्याः—
ऋग् 1.54.3, 3.3.4, 3.39.4, 10.96.11, 10.99.12, अथर्व 20.32.1

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे इन्द्र, परमैश्वर्यवन्, राष्ट्रस्य राजा त्वं नॄन् प्रजाजनान् रक्ष पालय, ये च देवाः त्वन्नियुक्ताः सद्गुणिनो धर्मात्मानो विद्वांसो राज्याधिकारिणः सन्ति तेऽपि नॄन् रक्षन्तु । हे असुर[15] शत्रूणां निरसितः, बलवन्, प्राणवन्, प्राणप्रद, मेघ इव वर्तमान वा राजन्, त्वम् अस्मान् पाहि । त्वं सत्पतिः सतां सत्पुरुषाणां पालकः, मघवा परमपूजित-धनयुक्तः नः अस्माकं तरुत्रः दुःखात् पापाद् वा तारयिता असि, सत्यः सत्यनिष्ठः वसवानः स्वतेजसा सर्वं छादयन् वसूनि वा कुर्वन्, सहोदाः बलप्रदश्च असि ।

वरुणः

वरुणोऽप्यसुर उच्यते । तस्यैषा भवति—

अस्तभ्नाद् द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः ।
आसीदद् विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥

ऋग् 8.42.1, यजु 4.30 तै. सं. 1.2.8. ।

असुरः अस्यति क्षिपति ग्रहोपग्रहनक्षत्रादिकं यथास्थानं यस्तादृशः, विश्ववेदाः विश्ववित् सर्वज्ञः वरुणः सर्वोत्कृष्टः परमेश्वरः द्याम् द्युलोकम् अस्तभ्नात् नियमितवान् । स एव पृथिव्याः वरिमाणं विशालपरिमाणम् अमिमीत इयत्तया निश्चिकाय । स एव सम्राड् भूत्वा विश्वा विश्वानि भुवनानि लोकान्तराणि आसीदत् अध्यतिष्ठत् । तानि विश्वा विश्वान्येव वरुणस्य तस्य जगदीश्वरस्य व्रतानि कर्माणि सन्ति ।

तस्यैषापरा भवति[16]—

त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ।
शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा ॥

ऋग् 2.27.10

हे वरुण वरतम, असुर दुष्टानां प्रक्षेप्तः प्रज्ञाप्राणयुक्त प्रज्ञाप्राणप्रदातः अमद्यप[17], त्वं ये च देवाः विद्वांसः सभासदः ये च मर्ताः मनुष्याः प्रजाजनाः सन्ति तेषां विश्वेषां राजा असि । विचक्षे विविधदर्शनाय नः शतं शरदः शरदृतून् रास्व देहि । वयं पूर्वा पूर्णानि सुधितानि सुष्ठु हितानि शतसंवत्सरलक्षणानि ततोऽप्यधिकानि वा आयूंषि अश्याम प्राप्नुयाम ।

अग्निः

अग्निरप्यसुर उच्यते । तस्यैषा भवति[18]—

---

15. 'असुर शत्रूणां निरसितः'—सायणः । 'बलवन्'—वेङ्कटः । 'मेघ इव वर्तमान—दयानन्दः ।
16. एतेऽपि मन्त्रा द्रष्टव्याः —ऋग् 1.24.14,2.29.7,9.42.1,10.132.4, अथर्व 1.10.1 असुरः क्षेप्ता पापिनां निग्रहीता इति सायणः ।
17. अविद्यमाना सुरा मद्यपानं यस्य तत्सम्बुध्दौ इति दयानन्दः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।
इळावाँ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान् ॥

ऋग् 4.2.5 तै. सं. 1.6.6.4,3.1.11.1

हे असुर व्याधीनाम् आलस्यनिस्तेजस्कत्वादीनां वा निरसितः प्राणप्रदायक अग्ने यज्ञाग्ने, यज्ञः यज्ञकर्ता यजमानः गोमान् गोभिः भूमिभिरन्तः प्रकाशकिरणैरिन्द्रियैर्वा समुपेतः, अविमान् अविभिरुपेतः, अश्वी अश्वैः प्राणैर्वा युक्तः नृवत्सखा नृवन्तः पौरुषोपेताः सखायो यस्य सः, सदमित् सदैव अप्रमृष्यः अप्रधृष्यः, इडावान् अन्नवान्, प्रजावान् प्रशस्तसन्तानोपेतः, पृथुबुध्नः विशालमस्तिष्कः, सभावान्, सभासु प्रशंसितश्च जायते ।

अग्निर्हि विपश्चितां विदुषाम् असुरः बलप्रदः प्राणप्रदो वा उक्तः—**"पिता यज्ञानामसुरो विपश्चिताम्, ऋग्, 2.3.4"** ।

सविता

सविताऽप्यसुर उच्यते । तस्यैषा भवति[19]—

वि सुपर्णो अन्तरिक्षाण्यख्यद् गभीरवेपा असुरः सुनीथः ।
क्वेदानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥

ऋग् 1.35.7

सुपर्णः शोभनरश्म्युपेतः गभीरवेपाः गम्भीरकम्पनः असुरः राह्यन्धकारस्य प्रक्षेप्ता, सर्वेभ्यः प्राणदश्च **'प्राणः प्रजानामुदयत्येष सूर्यः,** प्रश्न उ. 1.8' इति स्मरणात्, सुनीथः सुनयनः मार्गप्रकाशनेन अभीष्टदेशं प्रापयिता सविता सूर्यः अन्तरिक्षाणि अख्यत् प्रकाशयति । तादृशः सूर्यः इदानीं रात्रौ क्व विद्यते इति कश्चिकेत को जनाति । अस्य रश्मिः कतमां द्याम् कतमत् खगोलार्द्धम् आततान व्याप्तवान् । यद्यप्यस्मिन् खगोलार्द्धे रात्रिर्वर्तते तथाप्यपरं खगोलार्द्धं रश्मिरस्य प्रकाशयतीत्यर्थः । तदुक्तम्—**'स वा एष न कदाचनास्तमेति नोदेति, तं यदस्तमेतीति मन्यन्तेऽह्न एव तदन्तमित्वाऽथात्मानं विपर्यस्यते रात्रिमेवावस्तात् कुरुतेऽहः परस्तादथ यदेनं प्रातरुदेतीति मन्यन्ते रात्रेरेव तदन्तमित्वाऽथात्मानं विपर्यस्यतेऽहरेवावस्तात् कुरुते रात्रिं परस्तात्, स वा एष न कदाचन निम्रोचति** (ऐ. ब्रा. 3. 44)'

रुद्र :

रुद्रोऽप्यसुर उच्यते । तस्यैषा भवति[20]—

---

18. एता ऋचोऽपि द्रष्टव्याः—ऋग् 5.12.1, 5.15.1, 7.2.3, 7.6.1, 7.30.3, 10.11.6 ।
19. अन्ये मन्त्राः—ऋग् 1.35.10, 4.53.1, वा. यजुः 34.26 ।
20. ऋग् 1.122.1 अपि द्रष्टव्यम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥

ऋग् 5.42.11

हे स्तोतः, त्वं तमु तमेव रुद्रं परमात्मानं स्तुहि आराधय यः स्विषुः तीक्ष्णबाणः सुधन्वा सुचापश्च वर्तते, इषुचापौ तस्य दण्डप्रदानशक्तिं सूचयतः, यश्च विश्वस्य भेषजस्य शारीरमानसव्याधिप्रशमनहेतोरौषधस्य क्षयति ईश्वरो भवति । किं च महे महते सौमनसाय सुमनस्त्वाय तमेव रुद्रं रोगाभिद्रावकं परमेश्वरं यक्ष्व पूजय, नमोभिर्नमस्कारैश्च तम् असुरं प्राणदातारं देवं द्योतनात्मकं जगदीश्वरं दुवस्य परिचर ।

सोमः

सोमोऽप्सुर उच्यते । तस्यैषा भवति—

त्रीन्त्स मूर्घ्नो असुरश्चक्र आरभे ।
सत्यस्य नावः सुकृतमपीपरन् ॥

ऋग् 9.73.1

असुरः प्राणप्रदः स सोमः परमेश्वरो मूर्घ्नः समुच्छ्रितान् त्रीन् लोकान् आरभे आरम्भणाय मनुष्यतिर्यग्ग्रहनक्षत्रादीनां संचरणाय चक्रे । किं च सत्यस्य सत्यस्वरूपस्य तस्य नावः वेदवाग्रूपाः सुकृतं पुण्यकर्तारम् अपीपरन् भवसागरात् पारयन्ति ।

तस्यैषाऽपरा भवति[21]—

'सोमो मीढ्वां असुरो वेदु भूमनः ऋग् 9.74.7' । असुरः प्राज्ञः मीढ्वान् वृष्टिसेक्ता सोमः परमेश्वरः भूमनः जगतो विशालान् लोकान् वेद जानाति ।

पर्जन्यः

पर्जन्योऽप्सुर उच्यते । तथा च निघण्टौ मेघनामसु पठितः (नि. 1.10) ।

तस्यैषा भवति[22]—

दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।
अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥

ऋग् 5.83.6, तै. 3.1.11.7

हे मरुतः जलभरिता पवनाः, यूयं दिवः आकाशात् नः अस्मभ्यं वृष्टिं ररीध्वं प्रयच्छत । वृष्णः वर्षकस्य अश्वस्य अन्तरिक्षे व्याप्तस्य मेघस्य धाराः प्रपिन्वत प्र सिञ्चत । हे पर्जन्य, असुरः प्राणप्रदः नः पिता पालकस्त्वम् अपो वृष्ट्युदकानि निषिञ्चन् एतेन स्तनयित्नुना विद्युता सह अर्वाङ् अस्मदभिमुखम् एहि आगच्छ ।

---

21. ऋग् 9.99.1, साम 551 अपि द्रष्टव्ये ।
22. ऋग् 10.92.6 मन्त्रोऽपि द्रष्टव्यः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्रावरुणौ

मित्रावरुणावप्यसुरावुच्येते । तयोरेषा भवति—

प्र सा क्षितिरसुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत् ।
युवं दिवो बृहतो दक्षमाभुवं गां न धुर्युप युञ्जाथे अपः ॥

ऋग् 1.151.4

हे असुरा प्राणप्रदौ ऋतावानौ सत्याचरणप्रवृत्तौ मित्रावरुणौ वृष्टिकारकौ शीतोष्णपवनौ, तथा चोक्तं **'मित्रावरुणौ वृष्ट्याधिपती,** अथर्व 5.24.5' इति । सा क्षितिः भूमिः युष्मत्कृतेन वर्षणेन आर्द्रा भवतु, या महि अत्यधिकं प्रिया प्रियसम्पादिकास्ति । युवाम् बृहत् प्रभूतम् ऋतं वृष्ट्युदकम् **ऋतमित्युदकनाम** (नि. 1.12) आघोषथः विद्युद्गर्जनपूर्वकं प्रयच्छतः । युवं युवाम् बृहतो दिवोऽन्तरिक्षात् दक्षं बलप्रदम् आभुवं सर्वतो भवनशीलम् अपः मेघे वर्तमानम् उदकम् उपयुञ्जाथे भूमौघे वर्षणेन कृष्यादिषूपयोगं कुरुथः । तत्र दृष्टान्तः, गां न वृषभं यथा धुरि रथस्य धुरि कश्चिद् उपयुङ्क्ते

तनूनपात्

तनूनपादप्यसुर उच्यते । तस्यैषा भवति—

तनूनपादसुरो विश्ववेदा देवो देवेषु देवः ।
पथो अनक्तु मध्वा घृतेन ॥

यजु 27.12

यस्तनूषु शरीरेषु न पतति सः[23] अकाय इत्यर्थः, यदुक्तम् **'स पर्यगाच्छुक्रमकायमव्रणम्** यजुः 40,8', असुरः आत्मनः सकाशात् पापादीनां प्रक्षेप्ता प्राणवन् प्राणप्रदश्च, देवः कमनीयः, देवेषु द्योतमानेषु सूर्यविद्युदादिष्वपि देवः अधिकप्रकाशवान् प्रकाशयिता वा, तथा चोक्तं **'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति** (कठ 5,15) इति, मध्वा मधुना दिव्यानन्देन घृतेन तेजसा च, यद्वा मधुघृतादिसमृद्धया पथः जीवनमार्गान् अनक्तु ।

यद्वा, तनूनपाद् अग्निः । तथा च **"देवोऽग्निः मध्वा मधुना मधुरेण घृतेन पथो यज्ञमार्गान् अनक्तु ।··· यज्ञे बहु घृतमस्तु, येन मार्गा घृताभ्यक्ताः स्युरिति भावः । कोदृशो देवः ? तनूनपात् तनूनामपां नपात् पौत्रः अद्भ्यो वृक्षा जायन्ते तेभ्योऽग्निरित्यपां पौत्रः । असुरः असवोऽस्य सन्ति प्राणवान्, रो मत्वर्थः । विश्ववेदाः सर्वधनः देवेषु अपि देवः दीप्तिमान् श्रेष्ठः"** इति महीधरः ।

पूषा

---

23. निर्वचनमिदं दयानन्दभाष्ये कृतम् । परं तत्र तनूनपाद् वायुर्गृहीतः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूषाऽप्यसुर उच्यते । यथा 'स्वस्ति पूषा असुरो दधातु नः, ऋग् 5.51.11' । असुरः प्राणप्रदः पूषा मध्याह्नकालात् प्राग्भवः सूर्यः, तदुक्तम् **"अथ यद् रश्मिपोषं पुष्यति तत् पूषा भवति** (निरु. 12,17)" इति, **अदन्तकः पूषा** (श. ब्रा. 1.7.4.7) इति च ।मध्याह्ने आदित्यस्य दन्ता जायन्ते तत्काले रश्मीनां प्रखरत्वात् ततः पूर्वं पूषाऽदन्तकः । स नः स्वस्ति दधातु ।

वायुः

97790

वायुरप्यसुर उच्यते । यथा—

पृषद्योनिः पञ्चहोता शृणोतुअतूर्तपन्था असुरो मयोभुः ॥

ऋग् 5.42.1

"पृषद्योनिः पृषद्वर्णान्तरिक्षस्थः पञ्चहोता पञ्चविधस्य प्राणापानादिहोमस्य साधको वायुः, यद् वा पञ्चहोतेति वायोर्नाम 'वायुः पञ्चहोता स प्राणः' इति हि श्रुतेः । स च अतूर्तपन्थाः अहिंसितगतिः प्राणस्य दाता, मयोभुः सुखस्यास्पदभूतः । एवमुक्तलक्षणो वायुः शृणोतु स्तोत्रमिति" सायणः[24] ।

मरुतः

मरुतोऽप्यसुरा उच्यन्ते । तेषामेषा भवति—

ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः ॥

ऋग् 1.64.2

ते मरुतो जलभरिताः पवनाः अन्तरिक्षात् जज्ञिरे जायन्ते । कीदृशा मरुतः ? ऋष्वासः दर्शनीयाः, उक्षणः वृष्टेः सेक्तारः, रुद्रस्य सूत्रात्मकस्य वायोः मर्याः पुत्राः, असुराः दुर्भिक्षादेः निरसितारः प्राणप्रदातारो वा, अरेपसः मालिन्यरहिताः शुद्धाः इत्यधिदैवतम् । अध्यात्मपक्षे मरुतः प्राणाः ।

द्यौः—

द्यौरप्यसुर उच्यते । यथा 'इन्द्राय हि द्यौरसुरो अनम्नत, ऋग् 1.131.1' । असुरः भूलोकाद् दूरं प्रक्षिप्तः यद्वा तमसो निरसनशीलः प्राणप्रदो वा द्यौः द्युलोकः इन्द्राय परमैश्वर्यवते परमात्मने अनम्नत प्रह्वो भवति ।

स्वनयः

स्वनयस्य दानस्तुतिप्रसङ्गे स्वनयोऽप्यसुर इत्युक्तः । तथाहि—

---

24. असुरः प्रकाशावरको मेघः इति दयानन्दः । ग्रिफिथस्तु वरुणः पञ्चहोतेत्याह—The Five Priests Lord: apparently Varuna, the five priests who serve him being five Adityas. According to Sayana vayu is meant—Griffith.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतं राज्ञो नाधमानस्य निष्काञ्छतमश्वान् प्रयतान् सद्य आदम् ।
शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥

ऋग् 1.126.2

दानस्य प्रतिग्रहीता कक्षीवान् ब्रूते । **कक्षीवान् कक्ष्यावान्** (निरु. 10.10) बद्धपरिकरः सदैव धर्मोपदेशादिकर्मसु निरतः । स्वनयो दाता, स्वनयः पुनः स्वकीयं वित्तं परत्र नयतीति तादृशः । कक्षीवान् अहं नाधमानस्य प्राप्तैश्वर्यस्य, नाथृ नाधृ याञ्चोपतापैश्वर्यादिषु, असुरस्य धनानां निरसितुर्दानशीलस्य राज्ञः शतं निष्कान् स्वर्णाभरणविशेषान् शतम् प्रयतान् सुशिक्षितान् अश्वांश्च गोनां दोग्ध्रीणां गवां च शतम् सद्य आदम् स्वीकरोमि । एवं स्वकीयदानेन असौ राजा दिवि द्युलोके अजरं श्रवः अक्षयां कीर्तिम् आ ततान विस्तारयतीति नैरुक्तपक्षः । ऐतिहासिकपक्षे तु स्वनयो नाम कश्चिद् राजा दाता, कक्षीवान् ऋषिश्च प्रतिग्रहीता ।

त्र्यरुणः

एवमेव त्र्यरुणस्य दानस्तुतौ सोऽप्यसुर उक्तः । यथा—

अनस्वन्ता सत्पतिर्मामहे मे गावा चेतिष्ठो असुरो मघोनः ।
त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर त्र्यरुणश्चिकेत ॥

ऋग् 5.27.1

'अत्र राजर्षीणां दानमग्नेःपुरतोऽनेन सूक्तेनावर्णयत् । हे वैश्वानर विश्वेषां नराणां नेतः अग्ने, सत्पतिः सतां पालयिता चेतिष्ठः ज्ञातृतमः असुरः बलवान् मघोनः मघवा धनवान् प्रथमार्थे ङसिः, त्रैवृष्णः त्रिवृष्णपुत्रः त्र्यरुणः त्र्यरुण इत्येतन्नामा राजर्षिः अनस्वन्ता अनस्वन्तौ अनसा शकटेन संयुक्तौ गावा गावावनड्वाहौ गवां हिरण्यानां वा दशभिः सहस्रैः सह मे मह्यं ममहे ददौ । महि दाने । स राजर्षिः चिकेत सर्वैर्जनैरनेन दानेन ज्ञायते' इति सायणः । नैरुक्तपक्षे तु **'त्रैवृष्णः यस्त्रिषु वर्षति स एव, त्र्यरुणः त्रयोऽरुणा गुणा यस्य सः'** इति दयानन्दः ।

हवः

हवस्य विशेषणत्वेनाप्यसुरशब्दः प्रयुक्तः । यथा 'हवं एषामसुरो नक्षतु द्याम्, ऋग् 10.74.2' इति । **"एषाम् अनुष्ठातृणामङ्गिरसां हवः आह्वानशब्दः असुरः इन्द्रस्य प्रेरकः द्यां दिवं नक्षत व्याप्नोत** इति सायणः ।

वीरः

वीरस्य विशेषणत्वेनाप्ययं व्यवहृतः । यथा **'अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता,** ऋग् 7.56.24' । हे मरुतः, अस्मे अस्माकं वीरः पुत्रः शुष्मी बलवान् असुरः शत्रूणां निरसिता प्राणवान् प्राणदः प्रज्ञावान् ज्ञानप्रदश्च भवतु. यो हि जनानां सत्पुरुषाणां विधर्ता विधारकः स्यात् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमुपर्युक्तानां शोभनपदार्थानां विशेषणत्वेनासुरशब्दो वैदिकसंहितास्वभिहितः। क्वचित्तु विशेषणत्वं विना स्वतन्त्ररूपेण केवलोऽपि प्रयुज्यते। तत्र तत्र च स भाष्यकारैर्विभिन्नार्थेषु गृहीतः तद्यथा—

परब्रह्मार्थे :

'पतङ्गमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः, '

ऋग् 10.177.1

अत्र असुरस्य असनकुशलस्य सर्वोपाधिविहीनस्य परब्रह्मणः इति सायणः।

जीवात्मार्थे

'यमस्य लोकादध्यावभूविथ प्रमदा मर्त्यान् प्र युनक्षि धीरः।
एकाकिना सरथं यासि विद्वान्त्स्वप्नं मिमानो असुरस्य योनौ ॥'

अथर्व 19.56.1

'हे दुःस्वप्नाभिमानिन् क्रूर पिशाच, त्वं यमस्य लोकात्, अधिः पञ्चम्यर्थानुवादी, आ बभूविथ आगतोऽसि। भूलोकं कर्म। आगत्य च धीरः धृष्टः कस्मादपि न भीतस्त्वं प्रमदाः स्त्रियः मर्त्यान् मरणधर्मणः पुरुषांश्च प्र युनक्षि स्वात्मना संयोजयसि, भूलोकनिष्ठान् स्त्रीपुंसान् प्रति मृत्युसूचकदुःस्वप्नं करोषीत्यर्थः। अथ विद्वान् देहिनाम् आयुर्वृद्ध्यवृद्धी जानन् त्वम् असुरस्य, असुः प्राणः रो मत्वर्थीयः, प्राणवत आत्मनो योनौ उपलब्धिस्थाने हृदये स्वप्नम् कष्टम् अनिष्टफलं मिमानः निर्मिमाणः कुर्वन् एकाकिना त्यक्तपुत्रकलत्रबन्धनादिकेन दृष्टदुःस्वप्नेन म्रियमाणेन पुरुषेण एकाकिना असहायेन सरथम् समानो रथो रंहणसाधनं यस्मिन् कर्मणि तथा यासि गच्छसि। दुःस्वप्नदर्शिनम् एकं पुरुषं यमलोकं प्रापयसीति यावत्।' इति सायणः।

त्वष्ट्रर्थे

'त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम्, '

ऋग् 1.110.3'।

हे ऋभवः आदित्यरश्मयः, **'आदित्यरश्मयोऽप्यृभव उच्यन्ते'** इति निरुक्तम् (11.14)। यूयम् असुरस्य प्राणात्मकस्य प्राणप्रदस्य त्वष्टुः सूर्यस्य सम्बन्धिनं तेन निर्मितमित्यर्थः, भक्षणं भोजनोत्पत्तिनिमित्तं त्यं चित् चमसं मेघम् एकं सन्तम् एकधापि वर्तमानं वर्षणानन्तरं चतुर्वयं चतुर्दिक्षु विद्यमानं चतुःशाखम् अकृणुत कृतवन्तः। अत्र स्कन्दः **"असुरस्य भक्षणम् असुरिति प्राणनाम तद्वानसुरः। को सौ ? त्वष्टा। कुत एतत् ? उत त्यं चमसम् (ऋग् 1.20.6) इति मन्त्रान्तरदर्शनात्। प्राणवत-स्त्वष्टुर्भक्षणम्"** इति [25]।

---

25. ग्रिफिथस्तु प्रहेलिकामिमाम् एवं समाधत्ते—This Chalice appears to be the moon which contains the Amrta or nectar of the Gods. The legend seems to

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्यार्थे

"यदो घृतेभिराहुतो वाशीमग्निर्भरत उच्चावं च ।
असुर इव निर्णिजम् ॥" ऋग् 8.19.23

अत्र 'असुर इव रश्मीनां क्षेप्ता सूर्यो यथा निर्णिजम् आत्मीयं रूपमुपरितनेषु लोकेषु प्रकाशतयोद्गमयति अधस्तनेषु चावाङ्मुखं गमयति' इति, तथैव "द्विधा सूनवोऽसुर स्वर्विदमास्थापयन्त तृतीयेन कर्मणा । ऋग् 10.56.6." इत्यत्र 'असुरं बलवन्तं स्वर्विदं सर्वज्ञं स्वर्गस्य लम्भकं वाऽऽदित्यम्' इति [26] । अथ च 'अपो निषिञ्चन्नसुरः पिता नः, अथर्व 4.15. 12 इत्यत्र 'असुरः मेघानां क्षेप्ता, यद्वा असवः प्राणास्तान् रातीत्यसुरः, वृष्टिजलेन प्राणप्रद इत्यर्थः नः अस्माकं पिता उत्पादयिता सूर्यः इति सायणः ।

ऋत्विगर्थे—

"अयं सोमो असुरैर्नो विहव्यः, ऋग् 1.108.6" । अत्र असुरः इति प्राणनाम, तद्वन्तोऽसुरा ऋत्विजस्तैः" इति स्कन्दः । 'प्राज्ञैर्ऋत्विग्भिः' इति वेंकटः । 'असुरैः हविषां प्रक्षेपकैर्ऋत्विग्भिः' इति मुद्गलसायणौ ।[27]

सोमार्थे—

'इन्द्रश्च मरुतश्च कृपायोपेत्थापितो सुरः पूण्यमानो मित्रः, यजुः 8.55' इत्यस्य व्याख्याने 'क्रीयमाणः सोमो सुरो भवति, असुराय स्वाहेति तदा जुहुयात्' इति महीधरः ।

संवत्सरार्थे—

'त्रिरुत्तमा दूणशा रोचनानि त्रयो राजन्त्यसुरस्य वीराः, ऋग् 3.56.8' । 'दूणशा दुर्नशा केनापि विनाशयितुमशक्यानि रोचनानि दीप्यमानानि त्रिः त्रीण्युत्तमानि स्थानानि सन्ति । एतेषु त्रिषु स्थानेषु असुरस्य अस्यति क्षिपति सर्वमित्यसुरः कालात्मा संवत्सरः, तस्य वीराः पुत्राः त्रयः अग्निवायुसूर्यरूपाः राजन्ति शोभन्ते' इति सायणः ।

---

mean that Tvastar as God of the year created it uniformly bright and that the Rbhus as Gods of the seasons made it fourfold or diversified with four phases—Griffith.

26. अत्र, सूनवः अमृतमयस्य जगदीश्वरस्य पुत्रा मानवाः स्वर्विदं ज्ञानप्रकाशस्य लम्भकम् असुरं प्राणप्रदातारं परमात्मानं तृतीयेन कर्मणा मनो वाक् कर्म इति त्रयं, तत्र तृतीयेन कर्मणा द्विधा द्विप्रकारेण स्वकीयव्यक्तिगतजीवने सामाजिकजीवने च अधारयन्त स्थापयन्तीत्यर्थोऽपि सुकरः ।

27. असुरैः विद्याविहीनैर्मनुष्यैः नः अस्माकं विहव्यः विविधतया ग्रहीतुं योग्यः इति दयानन्दः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजार्थे—

अथर्ववेदीयराजसूयप्रकरणे **'महत् तद् वृष्णो असुरस्य नाम,** अथर्व 4.8.3' इत्यत्र **'असुरस्य शत्रूणां निरसितुः, यद्वा असून् प्राणान् राति प्रयच्छति पादाक्रान्तानां द्विषाम् इति असुरः। ईदृशस्य तस्याभिषिक्तस्य राज्ञः तन्नामभि अभिषेकसमये कृतं सुन्दरपाण्ड्वादिकं नाम महः महत् अधिकं यन्नामश्रवणाद् भीताः शत्रवः पलायन्ते तादृशम्'** इति सायणः।

काष्ठार्थे

अग्निगर्भम् अरणीरूपं काष्ठमप्यसुरशब्देनोक्तम्। यथा— **'न निमिषति सुरणो दिवेदिवे यदसुरस्य जठरादजायत,** ऋग् 3.29.14'। अग्निर्देवता **सुष्ठु रणयति शब्दयतीति सुरणः, सर्वैः कमनीयतया दृश्यमानः सन् दिवेदिवे प्रतिदिनं न निमिषति न निद्राति, किन्तु सर्वदा यज्ञार्थं जागर्त्येव। यत् यस्मात् असुरस्य अग्नेः प्रेरकस्यारणीरूपस्य काष्ठस्य[28] जठरात् उदरात् अजायत कर्मार्थमुदपद्यत'** इति सायणः।

इतरेष्वर्थेषु

'दिवस्पुत्रासो असुरस्य वीराः, ऋग् 3.53.7' इत्यत्र रुद्रार्थे सेनान्यर्थे वा[29]; **'उत वा दिवो असुराय मन्म,** ऋग् 5.41.3' इत्यत्र रुद्रार्थे, सूर्यार्थे, वाय्वर्थे मेघार्थे वा[30]; **'असुरस्य वेधसः,** ऋग् 8.20.17' इत्यत्र मेघार्थे वृष्टिजलार्थे वा[31]; **'यद्वाभिपित्वे असुरा ऋतं यते,** ऋग् 8.27.20' इत्यत्र देवार्थे[32]; **'अस्य सनीळा असुरस्य योनौ,** ऋग् 10.31.6' इत्यत्र च स्वात्मार्थे[33]।

---

28. असुरस्य रूपरहितस्य वायोः जठरात् मध्यात् अजायत जायते इति दयानन्दः।
The Asura's body : the Asura is, apparently, Dyaus.—Griffith.

29. दिवः असुरस्य देवेभ्योऽपि बलवतो रुद्रस्येति सायणः। असुरस्य शत्रूणां प्रक्षेपकस्य वीराः व्याप्तयुद्धविद्याः इति दयानन्दः।

30. असुराय प्राणापहर्त्रे रुद्राय, यद्वा द्युलोकसम्बन्धिनेऽसुराय प्राणदात्रे सूर्याय वायवे वा—इति सायणः। मेघाय इति दयानन्दः।

31. असुरस्य उदकानां क्षेप्तुर्मेघस्य वेधसः विधातारः। यद् वा असवः प्राणाः तान् राति ददातीत्यसुरं वृष्टिजलम् इति सायणः।

32. असुराः प्राज्ञाः संग्राम आयुधानां क्षेप्तारो वा देवाः इति सायणः। ऋग् 3.55 सूक्ते च 'महद् देवानामसुरत्वमेकम्' इत्युक्तम्।

33, असुरस्य प्रज्ञारूपबलवतः, अस्य ममेति सायणः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निन्दितार्थे

इतो यावत् प्रशस्तार्थेषु केष्वसुरशब्दो वैदिकसंहितासु प्रयुक्त इति निरुपितम् । अथ केषु निन्दितार्थेषु दैत्यराक्षसपिशाचदुर्जनाद्येषु तत्रैव प्रयुज्यत इति निर्वर्णयामः । येष्वेव वेदेषु प्रशस्तार्थे प्रयुक्तस्तेष्वेव निन्दितार्थेऽपीति विचित्रा खलु शब्दप्रयोगरीतिः ।

ऋग्वेदे

ऋग्वेदे योऽग्निः स्वयम् असुर इत्युक्तः स एव 'असुरहा' अपि ।

प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वम् ।
भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनाम् ॥

ऋग् 7.13.1

परमात्माग्निः असुराणां धृतपदानां कामक्रोधलोभमोहादिराक्षसानां हन्ता, यज्ञाग्निरपि तेषामेव यद्वा रोगपिशाचानां हन्ता, राजाग्निः राष्ट्रे असुराणां दुष्टशत्रूणां हन्ता, तस्मै असुरघ्ने, विश्वशुचे विश्वप्रदीपकाय, धियंधे धियः प्रज्ञाः कर्माणि च दधाति स्थापयतीति तस्मै अग्नये मन्म मननीयं स्तोत्रं धीतिं कर्म च प्र भरध्वं सम्पादयतेत्यर्थः ।

ननु कया रीत्या, 'असुर' शब्दोऽयम् अप्रशस्तार्थप्रतिपादक इति चेद् ब्रूमः । असुरस्य मूलार्थः प्राणवान् बलवान्, प्रज्ञावांश्चेति प्राक् प्रतिपादितमेव । यो ह्यतिशयबलप्राणप्रज्ञासम्पन्नः सन् स्वबलादिकं लोकहिताय विनियुङ्क्ते स प्रशस्तोऽसुरः, यश्च तदेव परपीडनायोपयुङ्क्ते स निन्दितोऽसुरो दैत्य इति यावत् । भवन्ति किल प्रशंसायां निन्दायां चापि मतुबादयः[34] । एवं निन्दायामत्र मत्वर्थीयो रः । यो हि निन्दितबलप्राणप्रज्ञावान् सोऽसुरो दैत्यो राक्षसो दुर्जन इति । यद् वा अस्यति सज्जनेषु स्वकोपं, शस्त्रं वा, अस्यति प्रक्षिपति दूरं सज्जनानेव वा सोऽसुरः । अथ च भाष्यकारानानुसृत्य पूर्वनिर्दिष्टा व्युत्पत्तयोऽपि ग्राह्याः । परं तत्रेदमवधेयं यत् सुरशब्दो वैदिकसंहितासु न प्रयुक्तः अतस्तत्र 'न सुरः असुरः' इति विग्रहश्चिन्त्य एव । संहितोत्तरसाहित्ये देववाचकः सुरशब्दः संभवतः असुरस्य विपरीतार्थवाचकशब्दतया पश्चात् कल्पितः ।

इन्द्रोऽप्यसुरहा वर्णितः[35] । बृहस्पतिरिन्द्रोऽसुरस्य वीरान् हिनस्ति ।

बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान् ।
यथा जघन्थ धृषता पुरा चिद् एवा जहि शत्रुमस्माकमिन्द्र ॥

ऋग् 2.30.4

---

34. भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवति मतुबादयः ।

35. ऋग् 6.21.4, अथर्व 20.36.4

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे बृहस्पते बृहतो राष्ट्रस्य पालक इन्द्र राजन्, त्वं तपुषा सन्तापकेन अश्ना इव वज्रेणेव वृकद्वरसः संवृतद्वारस्य असुरस्य दुष्टशत्रोः वीरान् भटान् विध्य ताडय। हे इन्द्र राजन्, यथा त्वं पुराचित् पूर्वमपि धृषता धर्षकेण स्वकीयेनायुधेन जघन्थ हतवान्, एव एवमेव साम्प्रतमपि अस्माकं शत्रुं जहि विनाशय।

इन्द्रो ह्यसुरेभ्यो धनमपहृत्य स्तोतृभ्यो याज्ञिकेभ्यस्तद् धनमर्पयेदित्यपि प्रार्थितम् ऋग्वेदे—

[36]या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः।
स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः॥

ऋग् 8.97.1

हे इन्द्र परमेश्वर राजन् वा, स्वर्वान् ज्योतिष्माँस्त्वम् असुरेभ्यो राक्षसप्रकृतिभ्यः शत्रुभ्यः याः भुजः :यानि भोक्तव्यानि धनानि आभरः आहृतवानसि तैर्धनैः अस्य राष्ट्रस्य स्तोतारं राष्ट्रभक्तं निर्धनं जनं त्वं वर्धय पोषय, ये च त्वे त्वयि वृक्तबर्हिषः स्तीर्णबर्हिषः यजमानाः सन्ति तानपि त्वं वर्धय।

इन्द्रो हि मायाविनः पिप्रोरसुरस्य दृढानि पुराणि विदारयति—

दृळहानि पिप्रोरसुरस्य मायिन
इन्द्रो व्यास्यच्चकृवाँ ऋजिश्वना॥

ऋग्10.138.3

इन्द्रः पराक्रमशाली राजा सेनापतिर्वा मायिनः मायाविनः पिप्रोः पिपर्ति पालयति पूरयति वा स्वात्मानमेव न परं स पिप्रुः स्वार्थपरायणः पॄ पालनपूरणयोः, तस्य असुरस्य दैत्यस्वभावस्य शत्रोः दृढानि स्थिराणि पुराणि सैन्यानि वा व्यास्यत् दूरं प्रक्षिप्य व्यनाशयत्। कीदृश इन्द्रः। ऋजिश्ववना ऋजयः ऋजुगुणयुक्ताः सुशिक्षिताः श्वानो यस्य तेन[37] वीरेण योद्धा चकृवान्, सख्यं कुर्वन्। इति निरुक्तपक्षः। ऐतिहासिकपक्षे तु पिप्रुः एतन्नामा कश्चिदसुरः, ऋजिश्वा च तन्नामा राजर्षिः कश्चिद्[38]।

इन्द्राविष्णू अप्यसुरस्य वीरान् पराहतः।

[39]इन्द्राविष्णू दंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम्।
शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान्॥

ऋग् 1.99.5

---

36. अयं मन्त्रः सामाथर्ववेदयोरपि, साम 254 अथर्व 20.55.2
37. द्रष्टव्यम् : द. भा. ऋग् 1.53.8
38. द्रष्टव्यम् : सा. भा.।
39. अयं मन्त्रः तै. 3.2.11.3 इत्यत्रापि समायाति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे इन्द्राविष्णू, इन्द्रो राजा विष्णुर्व्यापनशीलः कश्चिद् राज्याधिकारी तौ, युवां शम्बरस्य अधार्मिकस्य[40] शत्रोः नव नवतिं च प्रतिशतं नवनवतिं प्रायशः सर्वा एवेति भावः दृंहिता दृढीकृताः पुरः पुराणि श्नथिष्टम् अहिंसिष्टम् । किं च वर्चिनः वर्चस्विनः अपि असुरस्य निन्दितबलप्राणप्रज्ञावतः धर्मनिरसनशीलस्य शत्रोः शतं सहस्रं च विरान् पराक्रमवतो योद्धॄन् साकं सममेव अप्रति प्रतिद्वन्द्वि यथा न भवति तथा हथः व्यनाशयतम् ।

सूर्योऽप्यसुरहा इत्युक्तः । स हि तमो मालिन्यादिरूपान् रोगकृमिमहाव्याधिरूपान् वाऽसुरान् हन्ति ।

अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा ॥

ऋग् 10.170.2

ऋग्वेददृष्ट्या वाचः तदेव मुख्यं साफल्यं यत् तथा देवजना असुरान् पराजयेरन् ।

तदद्य वाचः प्रथमं मसीय येनासुराँ अभि देवा असाम ।
ऊर्जाद उत यज्ञियासः पञ्च जना मम होत्रं जुषध्वम् ॥

ऋग् 10.53.4

ऋग्वेदेऽन्यत्रापि क्वचन निन्दितार्थेऽसुरशब्दः प्रयुक्तः । यथा 'निर्माया उ त्वे असुरा अभवन् ऋग् 10.124.5,' 'हुत्वाय देवा असुरान् यदायन्, ऋग् 10.157.4' इति ।

यजुर्वेदे

यजुर्वेदस्य वाजसनेयिमाध्यन्दिनसंहितायाम् अग्निः प्रार्थ्यते यदसावस्माल्लोकाद् असुरान् प्रणुदतु—

ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ।
परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात् प्रणुदात्यस्मात् ॥

यजु 2.30

ये असुराः सन्तः दुष्टा भवन्तोऽपि रूपाणि सज्जनवेशभूषादीनि प्रतिमुञ्चमाना धारयन्तः स्वधया चरन्ति पृथिव्यां वर्तन्ते, ये च परापुरः परागतानि स्वसुखार्थानि अधर्मकार्याणि पिपुरति ते निपुरः निकृष्टान् दुष्टस्वभावान् पिपुरति पूरयन्ति तादृशाः सन्तः भरन्ति अन्यायेन परपदार्थान् धरन्ति, अग्निः जगदीश्वरः अग्रणी राजा वा तान् अस्मात् लोकात् राष्ट्रात् प्रणुदाति दूरीकरोतु[41] ।

40. द्रष्टव्यम् : द. भा. ऋग् 1.101.2
शम्बरम् अधर्मसम्बन्धिनम् । अत्र शम्बधातोः (शम्ब सम्बन्धे चुरादिः) औणादिको रन् प्रत्ययः ।

41. द्रष्टव्यम् : स्वमिदयानन्दभाष्यम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वस्मिन् मन्त्रेऽप्युक्तम्—"अपहता असुरा रक्षा ꣳ सि वेदिषदः, यजु 2.29" इति । वेद्यां यज्ञवेद्यां पृथिव्यां वा सीदन्ति ते असुराः अविद्वांसो दुष्टस्वभावाः प्राणिनः रक्षांसि परपीडकाः स्वार्थिनश्च अपहताः अपहिंसिताः स्युरिति[42] ।

यजुर्वेदस्येतरासु शाखासु काठकतैत्तिरीयमैत्रायणीष्वसुरशब्दोऽयं प्रायः प्रशंसितार्थे[43]न्यूनं, निन्दितार्थे चाधिकं दरीदृश्यते । बाहुल्येन तत्र देवासुरसंग्रामकथा वर्णिताः । यथा, **'देवाश्च वा असुराश्च संयत्ता आसन्**(का. 8.8, 8.13, 8.15, 12.2, 24.9, 24.10, 27.8) **'देवाश्च वा असुराश्च व्यभ्यचरन्त** (का. 10.7, 25.9), **देवा मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रक्षांसि पिशाचास्तेऽन्यतः** (तै.3.4, 1.11),' **'असुरा वज्रमुदयत्य देवानभ्यान्त** (तै. 6.2.7.4)'' **'असुरा वै निर्यन्तो देवानां प्राणेषु वलगान् न्यखनन्** (तै. 6.2.11.1),' **'अथैते निर्बाधा देवाश्च वा असुराश्चास्पर्धन्त** (मै, 3.2.1),' **'देवाश्च वा असुराश्चास्पर्धन्त** (मै. 3.4.1),' **'देवाः स्वर्गं लोकमायन्नपासुरा अभ्रꣳशन्त ततो देवा अभवन् परासुराः** (मै. 4.6.4)' ।

सामवेदे

सामवेदे पञ्चपेष्वेव स्थलेष्वसुरशब्दः प्रयुक्तः । प्रायशस्तत्र ऋग्वेदीया एव मन्त्राः, येषु केचन पूर्वमुदधृताः । अयं तु न ऋग्वेदीयः—

१ २ ३ १र २ ३ १ २ ३ १ २ ३ १ ३ २
इन्द्रस्य बाहू स्थविरौ युवानावनाधृष्यौ सुप्रतीकावसह्यौ ।

१ २ ३ २उ ३ १ २ ३ १ २ ३ १र २र ३ १ २ ३२
तौ युञ्जीत प्रथमौ योग आगते याभ्यां जितमसुराणां सहो महत् ।।

साम 1869

अत्र 'इन्द्रस्य बाहुभ्याम् असुराणां महत् सहो जितम्' इतीन्द्रप्रतिद्वन्द्वितयैवासुराणामुल्लेखः ।

अथर्ववेदे

अथर्ववेदे यत्र प्रशस्तार्थेऽसुरशब्दः तेषु केचन पूर्वमुक्ताः । निन्दितार्थे यत्रासुरशब्दः प्रयुक्तस्तेषु कानिचित् स्थलानि प्रदर्श्यन्ते ।

इन्द्रश्चकार प्रथमं नैर्ऋतमसुरेभ्यः ।
जयन्तु सत्वानो मम स्थिरेणेन्द्रेण मेदिना ।।

अथर्व 6.65.3

---

42. अत्रापि दयानन्दभाष्यं विलोकनीयम् ।

43. का. 8.12, 11.12. 32.6, 37.9,
तै. 1.55.11.3, 1.6.6.4, 1.3.14.1, 3.1.11.7
मै. 4.14.12. 4.14.14

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रेन्द्रो राजा सेनापतिर्वा, सोऽसुरेभ्यः शत्रुभ्यो नैर्हस्तं चकार निर्हस्तत्वं हस्तसामर्थ्यवैकल्यं करोतीत्यर्थः। तेन मेदिना स्वपक्षीयेषु स्नेहयुक्तेन स्थिरेण विचलन-रहितेन इन्द्रेण मम राष्ट्रस्य सत्वानो वीराः जयन्तु।

ब्रह्मचर्यसूक्तब्रह्मचार्यपि इन्द्रो भूत्वाऽसुरान् हिनस्तीत्युक्तम्—

गर्भो भूत्वाऽमृतस्य योनाविन्द्रो ह भूत्वाऽसुरांस्ततर्ह ॥

अथर्व 11.5.7

ब्रह्मचारी खलु अमृतस्य योनौ, 'आचार्यऽउपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः अथर्व 11.5.3' इति वचनात् पीयूषकल्पस्याचार्यस्य गर्भे गर्भो भूत्वा गर्भरूपेण स्थित्वा पश्चाद् इन्द्रो भूत्वा विद्यैश्वर्यवान् संपद्य असुरान् अज्ञानादिरूपान् दैत्यान् ततर्ह विनाशयति।

स्त्रीणां गर्भविनाशको रोगकृमिरप्यसुरपदेनोक्तः—

यः कृष्णः केश्यसुरः स्तम्बज उत तुण्डिकः।
अरायानस्या मुष्काभ्यां भंससोप हन्मसि ॥

अथर्व 8.6.5

यः कृष्णः कृष्णवर्णः केशी रोमवान् स्तम्बजः स्त्रिया देहयष्टौ प्रादुर्भूतः तुण्डिकः कुत्सितमुखः असुरः गर्भविनाशको रोगकृमिसमूहोऽस्ति तं वयम् उपहन्मसि विनाशयामः। किं च अरायान् गर्भहानिकरान् तानसुरान् अस्या नार्याः मुष्काभ्यां मुष्काख्यप्रदेशाभ्यां भंसस: योनिप्रदेशाच्च उपहन्मसि।

प्रतिसरमणिद्वारा विजयप्रसङ्गे उक्तम्—'अनेनासुरान् पराभावयन्मनीषी, अथर्व 8,5.3'। वरणमणिना सुराणामुपद्रवनिवारणं फालमणिना चासुरपुरीणां विध्वंसनं वर्णितम्—'अवारयन्त वरुणेन देवा अभ्याचारमसुराणां श्वः श्वः अथर्व 10 3.2,' 'तं विभ्रच्चन्द्रमा मणिमसुराणां पुरो जयद् दानवानां हिरण्ययीः अथर्व 10.6.10'। अन्यत्र जातवेदसः राष्ट्रे जातं जातं वेत्तीति तस्य राज्ञः हरसा प्रतापेन वज्रेण चासुराणां वधो वर्णितः—

अयोजाला असुरा मायिनोऽयस्मयैः पाशैरङ्किनो ये चरन्ति।
तांस्ते रन्धयामि हरसा जातवेदः सहस्रऋष्टिः सपत्नान् प्रभुणन् पाहि वज्रः ॥

अथर्व 19.66.1

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपसंहारः

तदेवं वैदिकसंहितानां परीक्षणेन ज्ञायते यत् ऋचो यजूंषि सामान्यथर्वणानि सर्वाण्येव 'असुरपदं' प्रशस्तार्थे निन्दितार्थे चापि भूयो भूयः प्रयुञ्जते । उत्तरवर्तिनि संस्कृतसाहित्ये तु शब्दस्यास्य निन्दापर एवार्थः प्रचलने स्थितः तत्र भाषाविज्ञान-नियमोऽयं प्रवर्तते यत् कस्यापि शब्दस्यार्थाः काले काले कारणैरनेकैर्ह्रसन्ते वर्धन्ते वा परिवर्तन्ते वेति ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

3 उक्षा वृषभश्च

उक्षन्-वृषभ-शब्दौ वैदिके लौकिके च संस्कृते बाहुल्येन प्रयुज्येते। वैयाकरण-सम्प्रदाये उक्षन् शब्दः **श्वन्नुक्षन्पूषन्** उ. 1.157' इत्युणादिसूत्रेण उक्ष सेचने इति धातोः कनिन् प्रत्यये, वृषभशब्दश्च **'ऋषिवृषिभ्यां कित्** उ. 3.40.3' इत्यभच्प्रत्यये संसाध्यते। यास्कस्त्वाह—"**वृषभः वर्षिता अपाम्** (निरु. 4.8), **वृषभः प्रजा वर्षतीति वा अतिबृहति रेत इति वा तद् वृषकर्मा वर्षणाद् वृषभः** (निरु. 9.22)" इति उक्षशब्द-मधिकृत्य च **'धसत्त इन्द्र उक्षणः** ऋग् 10.86.13' इत्यस्य व्याख्याने **'उक्षणा उक्षते-र्वृद्धिकर्मणः उक्षन्त्युदकेनेति वा,** निरु. 12.9' इति यास्कवचनम्। स्वामिदयानन्देन वृषपूर्वाद भा धातोरपि वृषभशब्दो निरुक्तः[1]। लोके तावच्छब्दाविमौ बलीवर्दपश्वर्थे तु प्रसिद्धावेव, किन्तु तदतिरिक्तं कश्चिदपि पुंपशुः, युवा पुरुषः, श्रेष्ठ, ऋषभकौषधम् इत्यादयोऽप्यर्था अनयोः प्रचलिताः। ऋग्वेदे विभिन्नविभक्तिषु उक्ष-शब्दः 32 वारं, वृषभशब्दश्च 183 वारं प्रयुक्तः।

अग्निः

ऋग्वेदे विंशतिकृत्वोऽग्निवाचकत्वेन वृषभशब्दप्रयोगः। त्रिषु स्थलेषुष्वग्निः उक्षनाम्नापि स्मृतः। अग्निसूक्तेषु उक्ष-वृषभ-शब्दाविमौ प्रायशोऽग्नेर्विशेषणत्वेन प्रयुज्यमानौ तस्य सेचक-वर्षकगुणं सूचयतः। क्वचिद् अग्निः चर्षणीनां वृषभः[2], स्तियानां वृषभः[3], क्षितीनां वृषभः[4] उक्तः। अग्निर्हि सहस्रशृङ्गो[5] वषभः तुविग्रीवो[6] वृषभश्च स्मर्यते। अयं धृतपृष्ठः उक्षा[7] इति नाम्नापि स्मृतः।

अयं वृषभः उक्षा चाग्निः पार्थिवाग्निरूपेण, अन्तरिक्षस्थानीयवैद्युताग्नि-रूपेण, द्युस्थानीयसूर्याग्निरूपेण च व्याख्यायते। परमात्माग्नि-जीवात्माग्नि-प्राणाग्नि-संकल्पाग्नि-जाठराग्न्यादिरूपेण सम्राट्-सेनापत्यादिरूपेण चापि व्याख्यातः। पर्थिवो यज्ञाग्निर्यथा—

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतमवस्य धाम।
अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्॥

ऋग् 2.3.11

---

1. ऋग् 1.54.2 भाष्ये।
2. त्वं नेता वृषभश्चर्षणीनाम् ऋग् 3.6.5
3. नेता सिन्धूनां वृषभः स्तियानाम् ऋग् 7.5,2
4. प्राग्नये वाचमीरय वृषभाय क्षितीनाम् ऋग् 10.187.1
5. सहस्रशृङ्गो वृषभस्तदोजाः ऋग् 5.1.8
6. तुविग्रीवो वृषभो वावृधानः ऋग् 5.2.12
7. शृण्वन्तमग्निं धृतपृष्ठमुक्षणम् ऋग् 10.12.4

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहं यज्ञाग्नौ घृतं मिमिक्षे सिञ्चामि । वृतम् अस्य अग्नेः योनिः प्रज्वलन-कारणम् । घृते श्रितः आश्रितः घृतम् उ घृतमेव अस्य अग्नेः धाम अधिकरणम् । अनुष्वधं हविःप्राप्त्यनन्तरमेव सद्यः त्वम् आ वह तद्धविः अस्मान् प्रति प्रापय । त्वम् अस्मान् मादयस्व आनन्दय । हे वृषभ सुखस्वास्थ्यादिकस्य वृष्टेर्वा वर्षक यज्ञाग्ने, त्वं स्वाहाकृतं स्वाहापूर्वकं हुतं हव्यं हविः वक्षि लोकहिताय सर्वत्र प्रसारय ।

समिद्धस्य प्रमहसोऽग्ने वन्दे तव श्रियम् ।
वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे ॥

ऋग् 5.28.4

अग्ने हे यज्ञाग्ने, समिद्धस्य प्रदीप्तस्य प्रमहसः प्रवृद्धस्य तव श्रियं शोभाम् अहं वन्दे प्रशंसामि । त्वं वृषभः सुखादीनां वर्षिता द्युम्नवान् धनान्नवान् तेजोयुक्तः कीर्तिमान् वा असि, द्युम्नमिति धननाम, निघं 2.10, द्युम्नं द्योततेः यशो वा अन्नं वा (5.5.) इति निरुक्तम् । अध्वरेषु यज्ञेषु समिध्यसे सम्यग् दीप्यसे ।

वैद्युताग्निः सूर्याग्निश्च यथा—

प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते ।
वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत् काष्ठा अव शम्बरं भेत् ॥

ऋग् 1.59.6

अहं वृषभस्य वृष्टिकरस्य मध्यमस्थानस्य वैद्युताग्नेः द्युस्थानस्य सूर्याग्नेर्वा महित्वं महिमानं प्र वोचम् ब्रवीमि, यं वृत्रहणं मेघस्य हन्तारं पूरवः वृष्टिकामा मनुष्याः सचन्ते सेवन्ते, पूरव इति मनुष्यनाम, निघं 2.3, पूरवः पूरयितव्या मनुष्याः (6.22) इति निरुक्तम् । स वैश्वानरः अग्निः दस्युम् उपक्षपयितारं दुर्भिक्षादिकं जघन्वान् हन्ति । काष्ठाः अन्तरिक्षस्थानि वृष्ट्युदकानि अधूनोत् प्रकम्पयति, शम्बरं मेघं च अव भेत् अवभिनत्ति ।

अधस्तने मन्त्रेऽग्निरूपो महान् उक्षा वर्ण्यते ।

उक्षा महाँ अभि ववक्ष एने अजरस्तस्थावित ऊतिर्ऋष्वः ।
उर्व्याः पदो नि दधाति सानौ रिहन्त्यूधो अरुषासो अस्य ॥

ऋग् 1.146.2

महान् उक्षा सूर्यरूपोऽग्निः एने द्यावापृथिव्यौ अभि ववक्ष अभिव्याप्य वहति धारयति । अजरः अजीर्णः इत ऊतिः इतः परमेश्वराद् ऊतिः रक्षा यस्य सः, ऋष्वः दर्शनीयः असौ उक्षा तस्थौ दिवि स्थितः । स च उर्व्याः पृथिव्याः सानौ समुच्छ्रिते प्रदेशे पदः रश्मिरूपान् चरणान् निदधाति निधत्ते । अस्य अरुषासः आरोचमानाः किरणाः ऊधः पृथिव्याः ऊधः स्थानीयं समुद्रं रिहन्ति लिहन्ति आस्वादयन्ति ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रः

ऋग्वेदे इन्द्रार्थं वृषभशब्दः पञ्चषष्टिकृत्वः प्रयुक्तः। उक्षशब्दः साक्षाद् इन्द्रार्थं न प्रयुक्तः, यद्यपि सायणेनैकस्मिद् स्थले उक्षा इन्द्रत्वेन व्याख्यातः[8]। वृषभशब्दः क्वचिद् इन्द्रस्य विशेषणत्वेन, क्वचिच्च स्वतन्त्रतया इन्द्रवाचकत्वेन प्राप्यते। क्वचिदिन्द्रः जनानां वृषभः, सतां वृषभः, मतीनां वृषभः, कृष्टीनां वृषभः, क्षितीनां वृषभः, चर्षणीनां वृषभश्च वर्णितः[9]। उदकस्य, सुखस्य, मनोवाञ्छितफलादिकस्य च वर्षकत्वा त्, पशुषु वृषभवद् देवेषु, श्रेष्ठत्वाच्च इन्द्रो वृषभनाम्ना कीर्तितः। इन्द्रः स्वयमपि वृषभ इव भीमश्चापि[10]। अयम् इन्द्ररूपो वृषभः भूमिम् अन्तरिक्षं दिवं चापि बिभर्ति, अन्तरिक्षाद् उदकधाराश्च वर्षति—

नि सामनामिषिरामिन्द्र भूमिं महीमपारां सदने ससत्थ।
अस्तभ्नाद् द्यां वृषभो अन्तरिक्षम् अर्षन्त्वापस्त्वयेह प्रसूताः॥

ऋग् 3.30.9

हे इन्द्र परमेश्वर सूर्य वा, त्वं सामनां समत्वयुक्ताम् इषिरां स्वधुरि सूर्यं परितश्च चलन्तीं महीं महतीम् अपारां पारे गन्तुमशक्यां भूमिं सदने स्वकीये स्थाने ससत्थ समासादितवान्। सम्प्रति परोक्षत्वेनोच्यते। वृषभः सुखादीनां वर्षिता स इन्द्रः द्यां द्युलोकम् अन्तरिक्षं मध्यलोकं च अस्तभ्नान् धारितवान्। पुनः प्रत्यक्षत्वेन प्रार्थ्यते। त्वया प्रसूताः प्रेरिताः आपः वृष्ट्युदकानि इह पृथिव्याम् अर्षन्तु प्रवहन्तु।

वृषभस्य शृङ्गयोर्भूमिः स्थितेति पौराणिकविचारस्य मूलमिदमेव प्रतीयते।[11] अदितेर्गर्भाद् इन्द्रजन्मवृत्तं वृषभस्य प्रहेलिकया इत्थं वर्णितम्—

गृष्टिः ससूव स्थविरं तवागामनाधृष्यं वृषभं तुम्रमिन्द्रम्।
अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्वे इच्छमानम्॥

ऋग् 4.18.10

सकृत्प्रसूता गौर्गृष्टिः, सा माता जननी भूत्वा वत्सं चरथाय इतस्ततः संचरणाय ससूव जनयामास। कीदृशं वत्सम्? स्थविरं वयसा वृद्धं, तवागां प्राप्तबलम्, अनाधृष्यं धर्षितुमशक्यम्, तुम्रं प्रेरकम्, अरीढम् अलीढं शत्रुभिरतिरस्कृतं, किं च तन्वे शरीराय स्वयं गातुम् अन्यनिरपेक्षगमनम् इच्छमानम् अभिलषन्तं वृषभं महोक्षम्—इति

---

8. अस्य चक्षसा परिपात्युक्षा, ऋग् 9.89.3, अत्र 'अस्य (सोमस्य) चक्षसा सामर्थ्येन उक्षा सेक्ता देवेन्द्रः परिपाति विश्वम्' इति सायणः।
9. क्रमशः ऋग् 1.177.1, 2.1.3, 6,17.2, 7.26.5, 7.98.1, 8.96.4, 81।
10. वृषभो न भीमः, ऋग् 10.103.1
11. तुलनीयम् : उक्षा बिभर्ति भुवनानि वाजयुः, ऋग् 1.83.3, उक्षा स द्यावापृथिवी बिभर्ति, ऋग् 10.31.8, अनड्वान् दाधार पृथिवीमुत द्याम्, अथर्व 4.11.1।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रहेलिका । ननु कोऽयं विलक्षणो वत्सः ? तस्योत्तरमप्यत्रैव-इन्द्रमिति । इन्द्रो जीवात्मा, गृष्टिः अदितिः प्रकृतिरिति यावत् । प्रकृतिरूपाऽदितिः जीवात्मानं सूते शरीरेण योजयति । कीदृशं जीवात्मानम् ? कर्मफलभोगाय स्वयमेव तन्वे गातुम् शरीरे गमनं सप्तम्यर्थे चतुर्थी, इच्छमानम् । अयं देहधारी जीवात्मा वृषभ इव भोगान् भुञ्जानः इतस्ततः संचरति, तस्माद् वृषभः ।

वेदेषु न केवलमयमिन्द्र एव वृषभः, वृषा, वृषो वा कीर्तितः, परं तस्य वज्रोऽपि वृषा, रथोऽपि वृषा तद्वाहनभूतौ हरी अपि वृषाणौ वृषभौ वा, तस्यायुधान्यपि वृषभाणि, तस्य पेयः सोमरसोऽपि वृषभः, सोमपानजनितो मदोऽपि च वृषा वृषभो वा—

वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।
वृष्णो मदस्य वृषभ त्वमीशिषे इन्द्र सोमस्य वृषभस्य तृप्णुहि ॥

ऋग् 2.16.6

न केवलमेतदेव, किन्तु इन्द्रस्य सोमपाने सखिभूतोऽग्निरपि वृषभः[12] सोमाभिषवणसाधनभूता मावाणोऽपि वृषभाः, सोमसोतारौ अध्वर्यू अपि वृषभौ, इन्द्रस्यान्नमपि वृषभम्[13], इन्द्रस्य वाहनानां रश्मयोऽपि वृषभा वा[14], इन्द्रस्य शुष्मोऽपि वृषभः[15], **सोमः**

ऋग्वेदे बहुकृत्वः स्पष्टरूपेण सोमो वृषभनाम्ना व्यपदिष्टः[16] । अयं सोमो ब्रह्म वा, वनस्पतिर्वा, चन्द्रो वा भाष्यकृद्भिर्व्याख्यातः ।

अवावशन्त धीतयो वृषभस्याधि रेतसि ।
सूनोर्वत्सस्य मातरः ॥

ऋग् 9.19.4

सूनोर्वत्सस्य जीवात्मनः मातरः निर्माल्यः धीतयः ऋतंभराः प्रज्ञाः वृषभस्य रसंवर्षकस्य सोमस्य ब्रह्मणः रेतसि अधि रेतः रसं प्राप्य अवावशन्त आनन्देन शब्दायमाना भवन्ति ।

---

12. पिबेन्द्र सोमं वृषभेण भानुना । ऋग् 2.16.4, हे इन्द्र वृषभेण कामानां वर्षकेण भानुना दीप्यमानेनाग्निना सह सोमं पिबेति सायणः ।

12. वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे । वृषणावध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ॥ ऋग् 2.16.5 ।

14. ऋग् 4.4.89

15. आ ते शुष्मो वृषभ एतु, ऋग् 6.19.9, शुष्मो बलम् ।

16. यथा ऋग्वेदस्य नवमण्डले 19.4, 70.7, 72.7, 76.5, 80.5, 85,9, 96.7, 108.8, 11 इत्यत्र ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुवतिं भीमो वृषभस्तविष्यया शृङ्गे शिशानो हरिणी विचक्षणः ॥

ऋग् 9.70.7

भयंकरो महोक्षः यथा बलप्रदर्शनेच्छया स्वकीये शृङ्गे तीक्ष्णीकुर्वन् शब्दायते तथाऽयं भीमः अयाज्ञिकेभ्यो भयंकरः विचक्षणः दीर्घदर्शनः वृषभः याज्ञिकेभ्यः सुखवर्षकः सोमो वनस्पतिः हरिणी हरितवर्णे शृङ्गे विषाणे इव विद्यमाने कन्दले शिशानः ग्राव्णामुपरि तीक्ष्णीकुर्वन् तविष्यया बलप्रदर्शनेच्छया इवेति लुप्तोत्प्रेक्षा, रुवति घर्षणोत्थं शब्दं करोति ।

दश अंगुल्यः मधुमन्तं वृषभं सोमम् अप्सु दुहन्ति[17] । सोमः खलु सहस्रधारो वृषभः—

सहस्रधारं वृषभं पयोवृधं प्रियं देवाय जन्मने ।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥

ऋग् 9.108.8

अस्मिन् मन्त्रे वृषभस्य सोमस्य ब्रह्मात्मकत्वं विशदीभवति । देवाय जन्मने पशुत्वं विनाश्य मनुष्यस्य दिव्यजन्मने प्रियं स्पृहणीयं, पयोवृधम् हृदये माधुर्यस्य वर्धकं, सहस्रधारं सहस्रधाराभिर्वर्षन्तं वृषभं ब्रह्मरूपं सोमं यूयम् अभिषुणुत । ऋतजातः ऋते सत्ये जातः प्रसिद्धः यः सोमः ऋतेन सत्येन विवावृधे प्रत्यहं विशेषेण वर्धते, यश्च राजा राजमानः देवः प्रकाशकः ऋतं सत्यस्वरूपः बृहत् महांश्च वर्तते ।

वृषभवद् उक्षापि सोमस्य नाम । ऋग्वेदे पञ्चकृत्वः सोमसूक्तेषु सोमार्थम् उक्षशब्दः प्रयुक्तः ।

उक्षा मिमाति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ॥

ऋग् 9.69.4

यदा उक्षा मिमाति शब्दायते तदा धेनवो यथा तं प्रति यन्ति, तथैव यदा उक्षा सोमः वनस्पतिरसः मिमाति अभिषवणकाले शब्दं करोति तदा धेनवः प्रीणयित्र्यः आपः स्तुतयो वा तं प्रति यन्ति गच्छन्ति । देवीः देव्यः आपः देवस्य सोमस्य निष्कृतं कलशरूपं गृहम् उपयन्ति उपगच्छन्ति । यद् वा यदा उक्षा आत्मबलस्य सेक्ता परमात्मा मिमाति अन्तःकरणे कर्तव्याकर्तव्यज्ञानमुपदिशति तदा धेनवः मनीषाः तं प्रति यन्ति, उक्तं च—**'तं वावशानं मतयः सचन्ते,** ऋग् 9.95.4' इति ।

अयं सोमो 'गिरिष्ठाः वृषभः ।'[18] अयं सोमः सिन्धोः तरंगेषु संतरन् उक्षा पशुरिति कीर्तितः—

---

17. तं त्वा हस्तिनो मधुमन्तमद्रिभिर्दुहन्त्यप्सु वृषभं दश क्षिपः, ऋग् 9.80.5 ।

18. ऋग् 9.95.4

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ॥

ऋग् 9.86.43

हिरण्यं तेजोमयं रसं पिबन्तीति ते हिरण्यपावाः जनाः सिन्धोः रसागारस्य परब्रह्मणः उच्छ्वासे तरंगसमूहे पतयन्तं तरन्तम् पशुं द्रष्टारम् उक्षणं जीवात्मरूपं सोमम् आसु अप्सु ब्रह्मानन्दरसेषु गृभ्णते गृह्णन्ति धारयन्ति । तम् उक्षणं जीवात्मरूपं सोमम् मधुना मधुरेण ब्रह्मानन्दरसेन अञ्जते स्नपयन्ति, व्यञ्जते विशेषेण स्नपयन्ति, समञ्जते सम्यक् स्नपयन्ति, अभ्यञ्जते अभितः स्नपयन्ति ।

पर्जन्यः

ऋग्वेदस्य पर्जन्यसूक्तेषु त्रिवारं[19] पर्जन्यो वृषभत्वेन संज्ञितः । अन्यत्र वातेन युगलतया पर्जन्यो वृषभ उक्तः ।[20] सायणः तदतिरिक्तस्थलेष्वपि क्वचित् वृषभं पर्जन्यत्वेन व्याचख्यौ ।[21] पर्जन्यो वृष्ट्युदकस्य वर्षकत्वाद् ओषधिरूपासु गोषु रेतोधायकत्वाद् वा वृषभ उच्यते । पर्जन्यरूपस्य वृषभस्याश्रयत्वादेव वेदेष्वन्तरिक्षं **'वृषभस्य नीडः'** इत्याख्यां गृह्णाति[22] । वृषभस्य पर्जन्यत्वे मन्त्रोऽयं द्रष्टव्यः—

अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास ।
कनिक्रदद् वृषभो जीरदानू रेतो दधात्योषधीषु गर्भम् ॥

ऋग् 5.83.1

वायुः आदित्यश्च

एकस्मिन् सरस्वद्देवताके मन्त्रे सरस्वान् वृषभरूपेण वर्णितः[23] । तत्र सायणः **'मध्यस्थानो वायुः सरस्वान्'** इति व्याचष्टे । वातः स्पष्टतयैव वृषभनाम्ना व्यपदिष्टः ।[24] एकस्मिन् स्थले वायोरश्वा उक्षाणः कथिताः, ये वायुं द्यावापृथिव्योर्मध्ये संचारयन्ति, मरुभूमौ चापि येषां गतिर्नापहन्यते ।[25] त्रिष्वपि लोकेषु एकैको वृषभः स्थितः इति ऋग् व्याहरति—**'त्रयस्तस्थुर्वृषभासस्तिसृणां धिषणानाम्, ऋग् 5.69.2'** । अत्र सायणव्याख्यानुसारं पृथिव्या वृषभः अग्निः, अन्तरिक्षलोकस्य वृषभो वायुः, द्युलोकस्य च वृषभः आदित्यः । एकस्मिन् प्रकरणे एकः सहस्रशृङ्गो वृषभो वर्ण्यते यः

19. ऋग् 5.83.1, 7.10.1, 6
20. पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि । ऋग् 6.49.6
21. सा. भा., ऋग् 1.79.2, 3.55.17, 4.1.11,12, 5.58.6, 7.36.3 ।
22. ऋग् 4.1.11
23, ऋग् 7,95.3
24. ऋग् 10.65.9
25. ऋग् 1.135.9

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुद्रादुच्चरति—'सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत्, ऋग् 7.55.7' । अयं वृषभः सहस्ररश्मिः सूर्य एव यः प्रातर्वेलायां समुद्रादुद्यन्निव प्रतीयते । उक्षनाम्नापि सूर्यो वर्णितः—

उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्तौ ॥

ऋग् 5.47.3

"एकः उक्षा विद्यते । स समुद्रः, अरुषः, सुपर्णः, पृश्निः, अश्मा इत्येतैर्नामभिरपि स्मर्यते । असौ पूर्वदिगवस्थितस्य स्वपितुर्गृहं प्रविष्टोऽस्ति । कदाचिद् दिवो मध्येऽपि समागच्छति । रजसः अस्य लोकस्य अन्तौ उभयदिगवस्थितौ अन्तभागौ अपि विचक्रमे उल्लङ्घयति, पाति रक्षति च ।" इति प्रहेलिका । अयम् उक्षा सूर्य एव । उक्षा, उक्ष सेचने, वृष्टिजलस्य सेक्ता, समुद्रो ज्योतिषां पारावारः, अरुषः आरोचमानः, सुपर्णः शोभनकिरणरूपपक्षोपेतः, पृश्निः **'प्राश्नुते एनं वर्णः** (2.14) इति निरुक्तव्युत्पत्त्या नानावर्णोपेतः, अश्मा स्वरश्मिभिर्ग्रहोपग्रहेषु व्याप्तः, अशूङ् व्याप्तौ । स पूर्वस्य पितुः पूर्वस्यां दिशि स्थितस्य आकाशस्य योनिं गृहम् आ विवेश प्रविशत्युदयकाले, ततश्च क्रमेण दिवो मध्येऽपि निहितो भवति । रजसः भूलोकस्य, अन्तौ एकः पूर्वदिगन्तः अपरः पश्चिमदिगन्तः तौ, विचक्रमे पारं गच्छति, सर्वान् प्राणिनश्च पाति रक्षति ।

बृहस्पतिः, रुद्रः मरुतश्च

पञ्चसु स्थलेषु बृहस्पतये[26], पञ्चस्वेव च रुद्राय[27] ऋग्वेदे वृषभशब्दः प्रयुक्तः । त्रिषु स्थलेषु मरुतः 'उक्ष' नाम्ना व्याहृताः ।[28] बृहस्पतेर्वृषभस्य वर्णनमिदं द्रष्टव्यम्—

यो अद्रिभित् प्रथमजा ऋतावा बृहस्पतिराङ्गिरसो हविष्मान् ।
द्विबर्हज्मा प्राघर्मसत् पिता न आ रोदसी वृषभो रोरवीति ॥

ऋग् 6.73.1

यः अद्रिभित् अद्रिम् अज्ञानरूपं शिलोच्चयं भिनत्तीति तादृशः, प्रथमजाः प्रथमः, ज्ञानश्रेष्ठ इति जातः प्रसिद्धः, ऋतावा सत्यवान्, आङ्गिरसः 'प्राणो वा अङ्गिराः इति वचनात् अङ्गिरसः प्राणाः तेषाम् उपयोक्ता सततं प्राणायामपरायणः, हविष्मान् अग्नौ होमार्थं हविर्युक्तः, द्विबर्हज्मा द्वयोर्ज्ञानकर्मणोर्वृंहितगमनः, प्राघर्मसत् प्रघर्मे प्रकृष्टतपसि सीदतीति तादृशः, नः पिता अस्माकं ज्ञानदातृत्वात् पालकः वृषभः ज्ञानमेघस्य अस्माकं मनोभूमौ वर्षकः बृहस्पतिः बृहती वाक् तस्याः पतिः आचार्यः रोदसी रोदस्योः

---

26. ऋग् 1.190.1, 8, 3.62.6, 6.73.1, 10.92.10
27. ऋग् 2.33.4, 6-8, 15
28. ऋग् 1.64.2, 1. 168 5.52.3

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्यावापृथिव्योः पदार्थानां ज्ञानम् आ रोरवीति उपदिशति इत्यधिभूतम् । अधिदैवतं बृहस्पतिः सूर्यः, अध्यात्मं च परमात्मा ।

अथ रुद्रार्थे वृषभः—

मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥

ऋग् 2.33.4

हे वृषभ सुखानाम् अस्त्राणां भेषजानां वृष्ट्युदकानां वा वर्षक रुद्र परमेश्वर सेनापते वैद्य प्राण वा त्वा त्वां वयं नमोभिर्नमस्कारैर्मा चुक्रुधाम न क्रोधयेम । नमस्कारमात्रपरायणोऽयं पुरुषार्थविमुखो दण्डनीय इति त्वत्कोपपात्रत्वं न भजेमहीत्यर्थः । मा दुष्टती दुःस्तुत्या कपटस्तुत्या, मा च सहूती सहूत्या सांसारिकवासनाभिः सहाह्वानेन । भेषजेभिः दिव्यैर्लौकिकैर्वा औषधैः नः वीरान् अस्मद्राष्ट्रस्य वीरपुत्रान् उद् अर्पय मानसेन शारीरेण च स्वास्थ्येन उन्नय । त्वा त्वाम् अहं भिषजां भिषक्तमं वैद्यानां वैद्यराजं शृणोमि ।

अथ मरुद्रूपा उक्षाणः स्तूयन्ते—

ते जज्ञिरे दिव ऋष्वासः उक्षणो रुद्रस्य मर्या असुरा अरेपसः ।
पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः ॥

ऋग् 1.64.2

ते मरुतः वायवः दिवः आकाशाद् जज्ञिरे उत्पद्यन्ते । कीदृशा मरुतः ? ऋष्वासः गतिमन्तः, ऋषी गतौ, उक्षणः उक्षसंज्ञिता, वृष्टेः सेक्तारः इति यौगिकोऽर्थः, रुद्रस्य मर्याः परमात्मनः पुत्राः, असुराः क्षेप्तारः, असु क्षेपणे, अरेपसः, मालिन्यरहिताः सूर्याः इव शुचयः पवित्राः पावकासः पवित्रकारकाश्च, सत्वानः न बलिनः इव द्रप्सिनः घोरवर्पसश्च बलवन्तो यथा स्नेहशीलाः घोराश्च सन्तो यथायोग्यं व्यवहरन्ति तथा इमे द्रप्सिनः उदकवन्तः घोरवर्पसः भीषणरूपाश्च ।

इतरेऽर्थाः

इतरेष्वपि केषुचिदर्थेषु उक्ष-वृषभ-शब्दौ ऋग्वेदे प्रयुक्तौ । एकस्मिन् मन्त्रे आकाशे स्थिताः पञ्च उक्षाणो वर्णिताः—**'अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः,**[29] ऋग् 1.105.10 । एते उक्षाणो वृषराशिनक्षत्रपुञ्जस्य पञ्च नक्षत्राणि वा, सायणोक्त्या अग्निर्वायुः सूर्यश्चन्द्रमा विद्युदित्येवं पञ्चसंख्याकाः, इन्द्रो वरुणोऽग्निर्यमा सविता इति वा पञ्च देवाः, स्वामिदयानन्दभाष्यानुसारम् अग्निवायुमेघविद्युत्सूर्यमण्डलप्रकाशरूपा वा व्याख्यायन्ते । एकत्र सायणः, 'उक्षणः सोमरसस्य सेक्तारः स्तोतारः

29. ऋग् 3.7.7

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्याह[26] अन्यत्र **'उक्षभिः अनडुद्भिरश्वैर्वा'** इति व्याचष्टे ।[30] उषसो रथस्य वाहनभूता गावोऽपि उक्षपदेनोक्ताः—**'सुसन्दृग्भिरुक्षभिर्भानुमश्रेत,** ऋग् 7. 79. 1' । **उक्षा स द्यावापृथिवी बिभर्ति,** ऋग् 10. 31. 8' इत्यत्र सायणेन उक्षा हिरण्यगर्भः प्रोक्तः ।[31] निघण्टौ उक्षा महन्नामसु पठितः (नि. 3. 3) ।

वृषभः कुत्सस्य श्वित्र्यस्य च विशेषणत्वेनापि समागतः,[32] मित्रावरुणावपि[33] वृषभौ प्रोक्तौ । सायणो वृषभं यज्ञत्वेन,[34] द्युलोकत्वेन,[35] प्रधानत्वेन,[36] रेतः-सेक्तृपतिरूपेण,[37] संवत्सररूपेण,[38] स्तोत्ररूपेण,[39] दातृरूपेण,[40] विक्रान्तकर्मरूपेण[41] चापि व्याचख्यौ । पुंजातयेऽपि वृषभशब्दः प्रयुज्यते ।[42]

कश्चिद् अद्भुतो वृषभः

ऋग् एकमद्भुतं वृषभं वर्णयति, यस्य चत्वारि शृङ्गाणि, त्रयः पादाः, द्वे शिरसी, सप्त च हस्ता वर्तन्ते ।

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥

ऋग् 4. 58. 3.

वृषभोऽयं निरुक्तकारेण यज्ञपरतया व्याख्यातः—**"चत्वारि शृङ्गेति वेदा वा एते उक्ताः, त्रयो अस्य पादा इति सवनानि त्रीणि, द्वे शीर्षे प्रायणीयोदयनीये, सप्त हस्तासः सप्त छन्दांसि, त्रिधा बद्धस्त्रेधा बद्धो मन्त्रब्राह्मणकल्पैः, वृषभो रोरवीति रोरवणमस्य सवनक्रमेण ऋग्भिर्यजुभिः सामभिः, यदेनमृग्भिः शंसन्ति यजुभिर्यजन्ति सामभिः स्तुवन्ति, महो देव इत्येष हि महान् देवो यद् यज्ञः, मर्त्याँ आविवेश इत्येष हि**

---

30. ऋग् 6.64.5
31. 'उक्षा सेक्ता प्रजानां स्रष्टेत्यर्थः हिरण्यगर्भः परमसूक्ष्मो वायुरूपो लिङ्गात्मा अपः प्रविश्य द्यावापृथिवी द्यावापृथिव्यौ बिभर्ति धारयति ।' सायणः
32. ऋग् 1.33.14, 15
33. ऋग् 5.63.3
34. ऋग् 1.166.1
15. ऋग् 1.160.3
36. ऋग् 2.30.8
37. ऋग् 1.16.8, 10.10.10, 10.40.11
38. ऋग् 3.56.3
39. ऋग् 7.79.4
40. ऋग् 8.93.1, 7
41. ऋग् 10.28.3
42. ऋग् 10.5.7

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुष्यानाविशति यजनाय" (निरु. 13.77)। पतञ्जलिस्तु शब्दापरम् आह—**"चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादास्त्रयः काला भूतभविष्यद्वर्तमानाः द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्त हस्तासो अस्य सप्त विभक्तयः त्रिधा बद्धस्त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति। वृषभो वर्षणात्। रोरवीति शब्दं करोति। कुत एतत्? रौति शब्दकर्मा। महो देवो मर्त्याँ आविवेशेति। महान् देवः शब्दः। मर्त्या मरणधर्माणो मनुष्याः। तानाविवेश"** (महाभाष्यम् 1. 1. 1)।

उवटः वाजसनेयिमाध्यन्दिनशुक्लयजुर्वेदसंहिताभाष्ये यज्ञपरं शब्दग्रामपरं च व्याख्याति। महीधरस्तत्रैव त्रिधा व्याचष्टे द्विधा यज्ञपरम् एकधा च शब्दग्रामपरम्। महीधरस्य यज्ञपरम् एकं व्याख्यानं निरुक्तानुसार्येव। द्वितीयव्याख्यानं त्वेवम्—**"यस्य वृषभस्य यज्ञस्य चत्वारि शृङ्गा शृङ्गाणि ब्रह्मोद्गातृहोत्रध्वर्युलक्षणानि। त्रयः पादाः ऋग्यजुः-सामरूपाः। द्वे शीर्षे शिरसी हविर्धानप्रवर्ग्याख्ये ··· अस्य वृषभस्य सप्त हस्तासः सप्त होतारो हस्ताः हस्ता इव व्याप्रियन्ते सप्त छन्दांसि वा हस्ताः। यश्च त्रिधा त्रिप्रकारैर्बद्धः"** इति उभयोः शब्दग्रामपरं व्याख्यानं प्रायः पतञ्जलेर्व्याख्यानमनुसरति। एतावदन्तरं यत् पतञ्जलिमते त्रयः काला एव त्रयः पादाः, किन्तु उवटमहीधराभ्यां प्रथमपुरुषमध्यमपुरुषोत्तमपुरुषाः पादस्थानीयाः स्वीकृताः। महीधरेण विकल्पतया 'त्रयः काला वा' इत्यपि प्रोक्तम्। द्वे शीर्षे उवटः नामाख्याते, महीधरश्च कार्यता-व्यङ्ग्यते प्राह, परं पतञ्जलिमते सुप्तिङ्रूपे द्वे शीर्षे भवतः। येषु त्रिषु स्थानेषु वृषभोऽयं बद्धः तानि पतञ्जलिमते उरः कण्ठः शिर इति, परम् उवटमहीधरव्याख्याने त्रिधा बद्धः एकवचन-द्विवचन-बहुवचनैः।

सायणमतेन सूक्तस्य अग्नि-सूर्य-अप्-गो- घृतदेवताकत्वान्मन्त्रोऽयं पञ्चधा व्याख्यातुं शक्यः। यज्ञात्मकाग्निपरतया सूर्यपरतया च ऋगियं तेन व्याख्यातापि। यज्ञात्मकाग्निपरं व्याख्यानं प्रायशो निरुक्तमनुसरति। सूर्यपक्षे तावत्—**"अस्यादित्यस्य चत्वारि शृङ्गाणि चतस्रो दिशः। ···त्रयो वेदाः पादस्थानीया भवन्ति गमनसाधनत्वात्। द्वे शीर्षे अहश्च रात्रिश्चेति द्वे शिरसी। ·····सप्त रश्मयः षड् विलक्षणा ऋतवः एकः साधारण इति वा सप्त हस्ता भवन्ति। त्रिधा बद्धस्त्रिषु स्थानेषु क्षित्यादिषु अग्न्या-द्यात्मकत्वेन संबद्धः। ग्रीष्मवर्षाहेमन्ताख्यैस्त्रिभिः त्रेधा बद्धो वा वृषभो वर्षता रोरवीति शब्दं करोति वृष्ट्यपादिद्वारा"** इति।

शरीरेऽयं वृषभः प्राणो भवितुमर्हति। अन्तःकरणचतुष्टयं चत्वारि शृङ्गाणि, व्यानोदानसमानाः त्रयः पादाः प्रणापानौ द्वे शिरसी, पञ्च ज्ञानेन्द्रियाणि, मनोबुद्धि-श्चेति सप्त हस्ताः, उत्तमाङ्ग-मध्यमाङ्ग- निम्नाङ्गेषु त्रिषु बद्धः रोरवीति श्वासोच्छ्वासतया वागुच्चारकत्वेन वा शब्दं करोति। काव्यपुरुषतयाऽपि वृषभोऽयं व्याख्यातुं शक्यते। तथा च राजशेखरेण काव्यमीमांसायां काव्यपुरूषोत्पत्तिप्रकरणे मन्त्रोऽयं समुद्धृतः।[43]

43. का. मी. अध्यायः तृतीयः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्ष-पाकः

ऋग्वेदे द्वयोः प्रकरणयोः उक्षपाकः[44] इतरयोश्च द्वयो वृषभपाको[45] वर्णितः। दूरतः क्वचित् शकृत्पिण्डस्येव धूमं दृष्ट्वा ब्रवीति—

शकमयं धूममारादपश्यं विषूवता पर एनावरेण।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन्॥

ऋग् 1.164.43

कात्यायनीयसर्वानुक्रमण्याम् अस्या ऋचः सोमो देवता। सायणाचार्योऽपि 'उक्षाणं पृश्निं' सोमपरतया व्याचष्टे—**"उक्षाणं फलस्य सेक्तारं पृश्निं शुक्लवर्णम् प्राश्नुते तेन फलमिति स्वयं प्राश्नुत इति वा पृश्निवल्लीरूपः सोमः। तं वीराः विविधेरणकुशला ऋत्विजः अपचन्त"** इति। परस्तात् सायणः स्वभाष्ये श्लोकमेतमुद्धरति—**'सोम उक्षाभवत् पूर्वं तं देवाः शकृतापचन्। यज्ञार्थे तद्भवो धूमो मेघ आसीत् तदुच्यते। तत्परत्वेन वा मन्त्रो व्याख्येयो विचक्षणैः'** इति। शौनकोऽप्याह—**मेघे शकस्तस्य धूमः सलिलं वास एव वा। सोम उक्षा** (बृ. दे 4. 51)"।

अस्याः प्रहेलिकाया इदमपि व्याख्यानं संभवति। उक्षा पृश्निः खलु पार्थिवः समुद्रः **'उक्षा समुद्रः** (ऋग् 5. 47 3)' इति स्मरणात्। विशेषेण ईरयन्ति ऊर्ध्वं प्रेरयन्ति पार्थिवान् रसानिति वीराः सूर्यरश्मयः। ते वीराः सूर्यरश्मयः उक्षाणं पृश्निं समुद्ररूपं वृषभम् अपचन्त पचन्ति, सन्तपन्ति। ततः उद्गतानि जलवाष्पाणि ऊर्ध्वं गत्वा मेघमण्डलाकाराणि भूत्वा शकृदुपलप्रज्वलनजनिता धूमा इव प्रतीयन्ते। तान् मेघान् वीक्ष्य कश्चिदाह—अहम् आराद् दूरे ऊर्ध्वाकाशे शकमयं धूमं गोमयाग्निसंयोगजनितं धूमपटलमिव मेघमण्डलम् अपश्यं दृष्टवानस्मि यो हि धूमः विषूवता व्याप्तिमता एना अनेन अवरेण भूलोकस्थेन धूमेन परः परस्तात् स्थितो विद्यते इति[46]।

अध्यात्मदृशा तु शकमयो धूम वासनामयो ज्ञानराशिः तम् अहम् आराद् अन्तिक एव हृदि विद्यमानम् अपश्यं पश्यामि। स च विषूवता व्याप्तिमता एना अनेन अवरेण साधारणेन अग्नेः आर्द्रेन्धनसंयोगजनितेन धूमेन तदपेक्षयेत्यर्थः परः भिन्नोऽस्ति। अस्याज्ञानधूमराशेः कः परिहारोपाय इत्याह—उक्षाणं पृश्निमपचन्त वीरा इति। वीराः विविधेरणकुशला उपासकाः उक्षाणं पृश्निं तेजोवर्णं जीवात्मानम् अपचन्त प्रदीपयन्ति, तत उत्पन्नो ज्ञानाग्निरज्ञानराशिं भस्मसात् कुरुते। तानि तेषां वीराणां प्रथमानि श्रेष्ठानि धर्माणि आसन्निति।

द्वितीयः उक्षपाकविषयको मन्त्रः ऋग्वेदीयदशममण्डले इन्द्रेन्द्राण्योः संवादप्रकरणे समायाति। अनेकेषाम् उक्षणां भक्षणेन परिपुष्ट इन्द्रः प्राह—

---

44. ऋग् 1.164.43, 10.86.14

45. ऋग् 10.27.2, 10.28.3

46. तुलनीयम् :—The whole may, perhaps, be a figurative description of the gathering of rain-clouds—Griffith.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्षणो हि मे पञ्चदश साकं पचन्ति विंशतिम् ।
उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः ॥

ऋग् 10.86.14

अत्र सायणः—**अथेन्द्रो ब्रवीति । मे मदर्थं पञ्चदश पञ्चदशसंख्याकान् विंशतिं विंशतिसंख्याकांश्च उक्षणः वृषभान् साकं सह मम भार्यया इन्द्राण्या प्रेरिता यष्टारः पचन्ति । उत अपि च अहम् अद्मि तान् भक्षयामि । जग्ध्वा चाहं पीव इत् स्थूल एव भवामीति शेषः । किं च मे मम उभा उभौ कुक्षी पृणन्ति सोमेन पूरयन्ति यष्टारः । सोऽहम् इन्द्रः सर्वस्मात् उत्तरः**" इति । अत्र उक्षाणः साधारणा वृषभपशव एव सायणस्याभिप्रेताः प्रतीयन्ते । इतः पूर्वस्मिन् मन्त्रेऽपि **"घसत् त इन्द्र उक्षणः"** इत्यत्र—**"हे इन्द्राणि, ते तवायम् इन्द्रः उक्षणः सेचनसमर्थान्..... पशून् घसत् प्राश्नातु"** इत्यसौ व्याचष्टे । परं वस्तुतोऽत्रापि प्रकरणानुसारम् उक्षाणः सोमा एव । सूक्तस्यास्य प्रथममन्त्रे 'इन्द्रः सोमं नाधिगच्छति, तत्पुत्रो वृषाकपिरेव सर्वं सोमं पिबति' इत्यापत्तिरुत्थापिता[47] । तस्या एवेदं समाधानं त्रयोदशे मन्त्रे प्रस्तूयते—**'घसत् त इन्द्र उक्षणः'** इति । साम्प्रतम् इन्द्रः सोमरसाद वञ्चितो मा भूत् किन्तु भूयसः उक्षणः सोमान् भक्षयतु—इत्यर्थः । चतुर्दशे च मन्त्रे इन्द्रः प्रसन्नो भूत्वा ब्रवीति यन्मदर्थं यष्टारः सम्प्रति पञ्चदश विंशतिं च उक्षणः सोमान् पचन्ति, तांश्च जग्ध्वाहं पीवः स्थूलो जात इति । पञ्चत्रिंशत् सोमपात्राण्येव पञ्चदश विंशतिश्च उक्षाणः सन्ति, यानि इन्द्रः पिबति । यद्यत्र उक्षाणः पशव एव गृह्येरंस्तर्हि न कथमपि सूक्तस्य संगतिः संपद्येत यतो नेयमापत्तिरासीद् यदिन्द्रो भक्षणार्थम् उक्षणः पशून् न प्राप्नोतीति । अतः सायणो यथा **'उक्षाणं पृश्निं** सोमपरतया गृह्णाति, यथा वा **'उक्षा बिभर्ति भुवनानि वाजयुः,** ऋग् 9.83.3 इत्यत्र **'उक्षा जलस्य सेक्तृः सोमः,'** इति विवृणोति, यथा वा **'सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते,** ऋग् 9.86.43 इत्यत्र स 'उक्षणं पशुम्[48] सोमपरत्वेन व्याख्याति तथैवात्रापि सोमपरं व्याख्यानमेव समञ्जसम् । विद्वान् तिलको बालगंगाधरस्तु ओरायन (मृगशीर्ष) नामके निजग्रन्थे सूक्तस्यास्य ज्योतिषपरे व्याख्याने अष्टाविंशतिर्नक्षत्राणि सप्त ग्रहांश्च पञ्चत्रिंशत्संख्याकान् उक्षणो मन्यते । अध्यात्मपक्षे तु इन्द्रो जीवात्मा तस्य पञ्च यमाः, पञ्च नियमाः, शमादिषट्कसम्पत्तिः, चतस्रो मैत्रीकरुणादिवृत्तयः प्राणायामो, धारणा, ध्यानं, समाधिः, अष्टौ सिद्धयः, अभ्यासो, वैराग्यं मोक्षश्चेति पञ्चत्रिंशद् उक्षाणः, यानसौ भक्षयति प्रयुङ्क्ते, गृह्णाति वा ।

---

47. वि हि सोतोरसृक्षत नेन्द्रं देवममंसत । यत्रामदद् वृषाकापिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥ 10.86.1 ।

48. 'तमेव सोमम्....उक्षणं सेक्तारं....पशुं द्रष्टारम्....आसु वसतीवरीषु गृभ्णते गृह्णन्ति इति सायणः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृषभः पाकः

अधस्तने मन्त्रे वृषभपाको वर्णितः—

यदीदहं युधये सं नयानि अदेवयून् तन्वा शूशुजानान् ।
अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पञ्चदशं नि षिञ्चम् ॥

ऋग् 10.27.2

ऐन्द्रो वसुक्र ऋषिः. इन्द्रो देवता । सायणीयव्याख्याने वसुक्रः इन्द्रं ब्रूते—'हे **इन्द्र, अहम् अमा ऋत्विगादिभिः सहितः ते तुभ्यं तुम्रं प्रेरकं बलिनं, पीवानमित्यर्थः, वृषभं सेचनसमर्थं पुंपशुं पचानि**' इति वस्तुतस्त्वत्रापि वृषभः सोम एव । स्वयं सायणेनापि नैकेषु स्थलेषु वृषभशब्दः सोमपरो व्याख्यातः ।[49]

इन्द्रो वक्ति—यदि इत् निश्चयेन चेद् अहं अहं अदेवयून् ये देवान् दिव्यगुणयुक्तान् जनान् न कामयन्ते ते अदेवयवः तान्, तन्वा शरीरेण शूशुजानान् देवयागमकृत्वा स्वदेहपोषणपरायणान् स्वार्थसाधनतत्परान् समाजस्य शत्रुभूतान् नरान् युधये युद्धाय युद्धं कृत्वा पराजेतुमिति यावत्, संनयानि रणभूमौ समानयामि, तत्साकमेव हे स्तोतः, ते तुभ्यं त्वत्कल्याणार्थम् अहं तुम्रं हतं[50] कृष्णपक्षे क्षीणमित्यर्थः, वृषभं सोमं चन्द्रमसं सोमं वनस्पतिं वा पचानि शुक्लपक्षे क्रमशः परिपूर्णं करोमि, पौर्णमास्यां च तीव्रं पञ्चदशं सुतं प्रकाशमयीं पञ्चदशीं कलां दञ्चदशं पत्रं वा तस्मिन् वृषभे चन्द्रमसि सोमवनस्पतौ वा निषिञ्चम् निषिञ्चामि परिपूर्णं तं करोमीत्यर्थः ।[51]

यद् वा स्तोतुरिदं वचनम् । पूर्वार्द्धं तथैव व्याख्यातव्यम् । उत्तरार्द्धं तु—हे इन्द्र परमात्मन्, ते त्वदुपहारार्थम् अहं तुम्रं पीवानं रसेन पूर्णं वृषभं सोमं वनस्पतिं पचानि अग्नौ परिपक्वं करोमि तं तीव्रं तीक्ष्णस्वादं सुतम् अभिषुतं पञ्चदशं सोमं निषिञ्चम् पात्रे क्षारयामि च ।[52]

---

49. द्रष्टव्यं सायणभाष्यम्: ऋग् नवमण्डलम्, 19.4, 70.7, 72.7, 76.5, 80. 5, 85.9, 96.7, 108.8, 11 ।

50. तुमिः आहननार्थः इति ऋग् 3.50.1 भाष्ये सायणः ।

51. सोमवनस्पतिपक्षे 'सर्वेषामेव सोमानां पत्राणि दश पञ्च च । तानि शुक्ले च कृष्णे च जायन्ते निपतन्ति च ॥ ····शुक्लस्य पौर्णमास्यां तु भवेत् पञ्चदशच्छदः ॥' इत्यादि सुश्रुतीयचिकित्सितस्थानस्य (29.20-22) वर्णनमनुसंधेयम् ।

52. सायणोऽपि चतुर्थचरणं सोमपरत्वेन व्याख्याति—"किं च तीव्रं मदकररसं सुतम् अभिषुतं पञ्चदशम् प्रतिपत्प्रभृतिपञ्चदशसंख्याकासु तिथिषु शुक्लपक्ष एकोत्तरवृद्ध्या पर्णानि जायन्ते । कृष्णपक्षे तु तद्वन्निहीयन्ते । एवंभूतत्वात् पञ्चदशः सोम उच्यते, तम् यद् वा त्रिवृत्पञ्चदशस्तोमोपेतं माध्यंदिनसवनकमित्यर्थः । निषिञ्चं दशापवित्रे द्रोणकलशे चमसपात्रेऽग्नौ वा सिञ्चामि प्रक्षिपामीत्यर्थः ।" यद्यत्र सायणः तृतीयपादमपि सोमपरमेव व्याख्यास्यत् तर्हि नवममण्डले वृषभव्याख्यानस्य स्वकीयामेव रीतिमनुसरन् प्रशंसाभाजनमभविष्यत् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः परस्मिन्नेव सूक्ते पुनर्वृषभपाकः समायाति—

अद्रिणा ते मन्दिन इन्द्र तूयान् सुन्वन्ति सोमान् पिबसि त्वमेषाम् ।
पचन्ति ते वृषभाँ अत्सि तेषां पृक्षेण यन्मघवन् हूयमानः ॥

ऋग् 10.28.3

सूक्तेऽस्मिन् इन्द्र-वसुक्रयोः पितापुत्रयोः संवादः । प्रथमे मन्त्रे वसुक्रपत्नी स्वोद्गारान् प्रकटयति यत् सर्वोऽपि देवजनोऽस्मद्यज्ञे समागतः, केवलं मदीयः श्वसुर इन्द्रो न समायातः । यदि सोऽप्यागच्छेत् तर्हि धाना भक्षयेत् सोमं च पिबेत् । प्रस्तुतं तृतीयमन्त्रं वसुक्रः प्राह । सायणोऽत्रापि—**"हे इन्द्र,.....त्वदर्थं वृषभान् पशून् ये च यजमानाः पचन्ति तेषां सम्बन्धिनो हविर्भूतान् पशून् अत्सि भक्षयसि"** इति वृषभ-पशुपरमेव व्याचख्यौ । परं वसुक्रपत्नीप्रस्तावे न खलु वृषभपशुभक्षणस्य कश्चिदुल्लेखः, किन्तु धानाभक्षणस्यैव । अतो वृषभा अत्र धाना एव । इन्द्रभोज्यस्य अन्नस्यापि वृषभनामेति प्राक् प्रतिपादितमेव ।[53] अत्र ब्राह्मणमपि—**पशवो वै धानाः** (गो. ब्रा. उ. 4.6) इति । यद् वाऽत्रापि वृषभाः सोमा एव—त्वदर्थं सोमान् सुन्वन्ति, तान् वृषभान् पचन्ति च । त्वम् अभिषुतान् सोमान् पिबसि, पक्वांश्च अत्सि भक्षयसि इति । अस्यैव सूक्तस्य एकादशे मन्त्रे **"सिम उक्षणोऽवसृष्टाँ अदन्ति"** इत्यस्य व्याख्याने स्वयं सायण एव व्याचष्टे—**"सिमः सिमान् श्रेष्ठान्, यद्वा सिमशब्दः सर्वशब्दपर्यायः, सर्वान् उक्षणः सिञ्चतः अवसृष्टान् इन्द्रेण निसृष्टान् अनुज्ञातान् हविर्भूतान् सोमान् यज्ञेषु अदन्ति भक्षयन्ति"** इति तदनुरूपम् इन्द्रेण भक्ष्यमाणा वृषभा अपि कुतो न सोमार्थं ग्राह्याः ?

एतदप्यनुसन्धेयं यद् ऋग्वेदस्यैव साक्ष्यमनुसृत्य इन्द्रस्य भोज्यं धानाः, करम्भः, पुरोडाशश्च, पेयं च सोमरसः[54] । उक्षा वृषभो वा न तस्य भोजनम् । वेदेष्विन्द्राय पुरोडाशपरिपक्वसोमयोः उपहारप्रदानस्यैव महिमा वर्ण्यते[55], न खलु उक्षवृषभयो-रुपायनीकरणस्य ।

उक्षणाम् आहुतिः

ऋग्वेदे चतुः कृत्वः साक्षात् परोक्षरूपेण वाऽग्नौ उक्षणाम् आहुतिर्वर्णिता ।[56] ऋगेषा विशेषतो दृष्टिमाकर्षति—

यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥

ऋग् 10.91.14

---

53. ऋग् 2.16.5
54. द्रष्टव्यम् ऋग् 3.52 सूक्तं यत्र प्रतिसवनं पृथक् पृथग् इन्द्रस्य भोज्यं वर्णितम् ।
55. ऋग् 8.31.1-4
56. ऋग् 2.7.5, 5.16.47, 8.43.11, 10.91.14

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र अग्नौ हूयमानाः पशवः परिगणिताः—अश्वाः, ऋषभाः, उक्षाणः, वशाः, मेषाश्च । अत्र 'सोमपृष्ठाय' इति सोमस्य पृथगुल्लिखितत्वाद् अन्यैः पशुभिः सह पठितत्वाच्च उक्षाणः सोमा न ग्रहीतुं शक्याः । अग्नावेतेषां पशूनामाहुतिरेव सायण-सम्मता । परन्तु वृषभवाचकस्य ऋषभस्य पृथक् पठितत्वात् सायणेन 'उक्षणः' इति पदम् 'अश्वासः ऋषभासः 'इत्येतयोर्विशेषणत्वेन गृहीतम्—**"यस्मिन् अग्नौ उक्षणः उक्षाणः सेचनसमर्थाः अश्वासः अश्वाः ऋषभासः ऋषभाश्च, वशाः स्वभाववन्ध्याश्च मेषाः च अवसृष्टासः देवतार्थम् अवसृष्टाः परित्यक्ताः सन्तोऽश्वमेधे आहुताः आभिमुख्येन हुता भवन्ति"** इति । इतरे तु ऋषभान् उक्षणश्च पृथगेव मन्यन्ते ।[57]

वस्तुतस्तु नैवात्र पशूनामग्नावाहुतिरभिप्रेता । यथा हि यजुर्वेदीयपुरुषमेधे बद्धाः पुरुषा नाग्नौ हूयन्ते, किन्तु सम्बद्धदेवतानामग्राहपुरस्सरं समुत्सृज्यन्ते, तथैवात्रापि पशवोऽग्निनाम्ना सार्वजनिकपशुत्वेन परित्यक्तव्या इति मन्त्रे पठितम् **'अवसृष्टासः'** इत्येतत् पदमेव ज्ञापकम् । अथाहुतावेवाग्रहश्चेत् तर्हि श्रुतिः स्वयमेवोदीरयति यन्नैते प्राणिनोऽग्नौ होतव्याः, परमेतन्नामानि हवींष्येवाग्नौ होतव्यानि भवन्ति—

आ तै अग्न ऋचा हुविर्हृदा तुष्टं भरामसि ।
ते तै भवन्तूक्षणं ऋषभासो वशा उत ॥

ऋग् 6.16.47

अतोऽश्वनाम्ना अश्वगन्धौषधम्, ऋषभनाम्ना ऋषभकौषधम् उक्षनाम्ना सोमौषधम्, वशानाम्ना गव्यं घृतम्, मेषनाम्ना मेषपर्ण्यौषधम् अभिप्रेतं भवति[58]।

अथापि न केवलं पार्थिवाग्निरेवाग्निपदेन गृह्यते । **'अप्येते उत्तरे ज्योतिषी अग्नी उच्येते** (निरु. 7.17)' । मध्यमो विद्युदग्निः, उत्तमश्च सूर्याग्निः । सूर्याग्निलोके दिवि अश्वः, वृषभः, मेष इत्यादिनामानो नक्षत्रपुञ्जा अवसृष्टाः सन्ति । तदभिप्रायमप्येतद् भवितुमर्हति । ऋग्वेदे नाग्नेर्भोजनम् अश्ववृषभादयः प्राणिनः, किन्तु समिद्घृतादिकमेव[59]। अतोऽग्नौ पशूनां होमो निःसन्देहमवैदिक एव ।

उपसंहारः

एवमस्माभिर्वैदिकप्रमाणाधारेणैव निरूपितं यल्लोके उक्ष-वृषभ-शब्दयोः सामान्येन पशुपरो योऽर्थः प्रचलितस्तदतिरिक्तम् ऋग्वेदेऽपरेषु विभिन्नार्थेषु शब्दाविमौ प्रयुज्येते । इयमेव स्थितिर्वृषभवाचिनाम् अनडुत्प्रभृतीनां शब्दानामप्यस्ति । अथर्ववेदे प्राणोऽनड्वानुदीरितः— 'अनड्वान् प्राण उच्यते, अथर्व 11. 4. 13' । अनः शरीररथं

---

57. He is whom horses, bulls, oxen and barren cows and rams, when duly set apart, are offered up—Griffith.

57. अथापि द्रष्टव्यम् : वेदों का यथार्थ स्वरूप, पं. धर्मदेवविद्यामार्तण्ड, दयानन्दसंस्थान, नई दिल्ली–5, पृष्ठे 202–3

59. द्रष्टव्यम् ऋग् 2.7.6, 7.3.1, 10.69.2

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वहतीत्यनड्वान् प्राणः। कश्चिदनड्वान् द्यावापृथिवी, अन्तरिक्षं, षड् दिशः सम्पूर्णं भुवनं चापि बिभर्तीत्युक्तम्[60]। नेदं कर्म साधारणस्य बलीवर्दस्य भवितुमर्हति। अनः ब्रह्माण्डशकटं वहतीत्यनड्वान् परमात्मैव। परिणामोऽयं निःसरति यद् वेदे कमपि शब्दं प्रयुक्तमवलोक्य वेदव्याख्याकारो लोके प्रचलितमेव तच्छब्दार्थं सर्वत्र वेदेऽप्यारोपयति चेत् तर्हि न वेदं प्रति न्यायः। वैदिकशब्दानामभ्यन्तरे कस्कोऽर्थः किं किं च रहस्यं निहितमित्यवबुद्ध्यैव वेदमन्त्रार्था आविष्कर्तुं शक्यन्ते। वैदिकशब्दप्रयोगशैलीतोऽनभिज्ञत्वाद् अनेके पाश्चात्त्या एतद्देशीयाश्चापि विद्वांसो वेदान् प्रति भ्रान्तविचारान् हृदि धारयन्ति।

निबन्धेऽस्मिन्नस्माभिर्यया शैल्या उक्षवृषभशब्दयोरर्थाः परीक्षिताः तामेव शैलीमाश्रित्य अपरेषामपि वैदिकशब्दानाम् अर्था निर्णेतुं शक्यन्ते। प्रायशो वेदाः स्वयमेव स्वस्मिन् प्रयुक्तानां शब्दानामर्थान् संकेतयन्ति। तान् संकेतान् दृष्टौ निधायैव केनापि वेदार्थानुसन्धाने प्रवर्तितव्यम्।

---

60. अथर्व 4.11.1

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. गन्धर्वाप्सरसः

गन्धर्वशब्दो वैदिकसंहितासु स्वातन्त्र्येण, अप्सरोभिः सार्धं च उभयथापि प्रयुज्यते। शब्दोऽयं लोके देवयोनिविशेषे प्रसिद्धः। **"विद्याधाराप्सरोयक्षरक्षोगन्धर्वकिंनराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः"** इत्यमरः (1.11) इतरेऽप्यर्थाः शब्दार्थकोशेषु वर्णिताः—स्वर्गगायकः, घोटकः, पशुजातिविशेषः, कस्तूरीमृगः, अन्तराभवसत्त्वः (मरणपुनर्जन्मनोर्मध्यभव आत्मा), पुंस्कोकिलः, गायनमात्रम्, शिवः, ग्रहविशेषः, चन्द्रः, सूर्यः, अहः, राज्ञां स्तुतिपाठकः, शरीराधिष्ठातृदेवविशेष इति[1]। ब्राह्मणग्रन्थेषु अग्निः, सूर्यः, चन्द्रः, वातः, यज्ञः, मनः, प्राणः, इत्येते प्रमुखा गन्धर्वशब्दार्थाऽ उक्ताः[2]। शब्दव्युत्पत्तिस्तु—गन्धं सौरभं संगीतवाद्यादिजनितप्रमोदं वा अर्वति प्राप्नोतीति गन्धर्वः[3]। गन्धपूर्वाद् अर्व गतौ धातोरण्, शकन्ध्वादित्वात् पररूपं च। यद्वा गाः रश्मीन् उदकानि वाणीः पृथिव्यादिलोकान् वा धरतीति गन्धर्वः। अत्र सायणोऽप्याह—**"गवि गन् धृञो वः" इति गोशब्दोपपदात् धृञ् धारणे इत्यस्माद् वप्रत्यय उपपदस्य गन्भावश्चेति**[4] यद्वा गानं धारयतीति गन्धर्वः[5]। यद्वा गच्छतीति गं ब्रह्म तद् धरतीति स गन्धर्वः[6]। अत्र तावद् विचारणीयं वैदिकसंहितासु गन्धर्वशब्दः केष्वर्थेषु प्रयुक्तः, अप्सरसश्च काः, गन्धर्वाणां ताभिः सम्बन्ध इति। तत्रादौ गन्धर्वार्था विचार्यन्ते। गन्धर्वशब्दोऽयम् वेदेषु प्रायशः प्रशस्तार्थे, विरलमेव च निन्दितार्थे समायाति।

गन्धर्वः

परमात्मा

परमात्मा गन्धर्व उच्यते। पृथिव्यादिलोकानां धारकत्वात् तमेता ऋचोऽनुप्रवदन्ति—

---

1. गन्धर्वस्तु नभश्चरे। पुंस्कोकिले गायने च मृगभेदे तुरंगमे। अन्तराभवदेहे च। इत्यनेकार्थसंग्रहः 3.735.36। एतान्यपि द्रष्टव्यानि—हलायुधकोशः (विवृतिः) हिन्दीसमिति, लखनऊ। आप्टेकृतः संस्कृत-इंगलिश-कोशः। मोनियरविलियम्सकृतः संस्कृत-इंगलिश-कोशः।
2. अग्निर्हं गन्धर्वः, सूर्यो गन्धर्वः चन्द्रमा गन्धर्वः। वातो गन्धर्वः। यज्ञो गन्धर्वः। मनो गन्धर्वः। श. ब्रा. 9.4.1.7-12; प्राणो वै गन्धर्वः। जै. उ. ब्रा. 3. 6. 8. 3
3. गन्धेन गन्धर्वाणां सम्बन्धो वैदिकसाहित्ये प्राप्यते। यथा-तं पुण्यं गन्धं गन्धर्वाप्सरस उपजीवन्ति। अथर्व 8.14.8 यस्ते गन्धः पृथिवि संबभूव····। यं गन्धर्वा अप्सरसश्च भेजिरे। अथर्व 12.1.23; अथो गन्धेन च वै रूपेण च गन्धर्वाप्सरसश्च चरन्ति। श. ब्रा. 9.4.1.4
4. सा. भा. ऋग् 10.123.6; अथर्व 2.1.2
5. गानाद् वा गन्धर्वः इति यजुः 17.42 भाष्ये उवटमहीधरौ।
6. दयानन्दः, आर्या. 2.24

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वावसुरभि तन्नो गृणातु दिव्यो गन्धर्वो रजसो विमानः ।
यद्वा घा सत्यमुत यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः ॥

ऋग् 10. 139. 5

दिव्यः अलौकिकः रजसः पृथिव्यादिलोकसमूहस्य विमानः निर्माता विश्वावसुः विश्वानि वसूनि यस्य यस्माद् वा सः गन्धर्वः लोकलोकान्तराणां धारकः परमात्मा नः अस्मान् तत् अग्रे प्रोच्यमानम् अभिगृणातु अभिमुखं ब्रवीतु । किं तत् ? यद्वा घ यत् खलु सत्यं यथार्थं ज्ञानं कर्म वा, उत अपि च यत् कर्तव्यजातं वयं न विद्म नो जानीमः । किंच धियः प्रज्ञाः कर्माणि वा हिन्वानः प्रेरयन् त्वं नःधियः प्रज्ञाः कर्माणि वा अव्याः रक्ष ।

दिव्यो गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यो विक्ष्वीड्यः ।
तं त्वा यौमि ब्रह्मणा दिव्य देव नमस्ते अस्तु दिवि ते सधस्थम् ॥

अथर्व 2.2.1

दिव्यः अलौकिकः गन्धर्वः गवां ग्रहोपग्रहनक्षत्रसूर्यादिलोकानां धारकः परमात्मा यः भुवनस्य सकलब्रह्माण्डस्य पतिः अधीश्वरोऽस्ति स एक एव नमस्यः नमस्करणीयः विक्षु प्रजासु ईड्यः स्तुत्यश्च वर्तते । हे दिव्य लोकातिग देव प्रकाशमान प्रकाशयितश्च परमात्मन्, तं तादृशगुणोपेतं त्वा त्वाम् अहं ब्रह्मणा मदीयेनात्मना यौमि संयोजयामि । ते तुभ्यं मम नमः प्रणतिः अस्तु । दिवि द्योतनात्मके ममात्मनि आनन्दमयकोशे वा ते सधस्थम् निवासगृहं भवतु ।

दिवि स्पृष्टो यजतः सूर्यत्वगवयाता हरसो दैव्यस्य ।
मृडाद् गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यः सुशेवाः ॥

अथर्व 2.2.2

दिवि द्युलोके स्पृष्टः स्पर्शं प्राप्तः, यस्यः, शिरो द्युलोकं स्पृशति तादृशः, सर्वोन्नत इत्यर्थः, यजतः पूजनीयः, सूर्यत्वक्[7] सूर्यस्य त्वग् इव त्वग् यस्य सः सूर्यवत् तेजस्वी इत्यर्थः । दैव्यस्य हरसः देवसम्बन्धिनः क्रोधस्य अवयाता पृथक्कर्ता, सदुपदेशप्रदानाद् ईश्वरीयदण्डाद् रक्षक इति भावः । स गन्धर्वः गवाम् इन्द्रियाणां धारकः परमात्मा नः मृडात् सुखयेत्, यः भुवनस्य पतिः, एक एव नमस्यः नमस्कारार्हः, सुशेवाः शोभन-कल्याणकरः ।

जीवात्मा

जीवात्मापि गन्धर्व उच्यते । शरीरे गवाम् इन्द्रियाणां धारकत्वात् । तस्यैषा भवति—

---

7. अत्र परमात्मपक्षे योजितमाथर्वणं मन्त्रद्वयमपि सायणः सूर्यपक्षे योजितवान् । परं सूर्यत्वगिति वचनाद् गन्धर्वोऽत्र सूर्यभिन्न एव कश्चिदिति स्फुटम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊर्ध्वो गन्धर्वो अधि नाके अस्थात् प्रत्यङ् चित्रा बिभ्रदस्यायुधानि ।
वसानो अत्कं सुरभिं दृशे कं स्वर्ण नाम जनत प्रियाणि ॥

ऋग् 10. 123. 7

गन्धर्वः जीवात्मा नाके अधि शरीरस्य द्युलोके शिरसि मस्तिष्के ऊर्ध्वः अस्थात् जागरूकस्तिष्ठति । असौ दृशे विश्वस्य दर्शनाय सुरभिं सौरभमयम् अत्कं अदनशीलं भोगसाधनं शरीरं वसानः धारयन्, अस्य देहस्य चित्रा चित्राणि अद्भुतानि आयुधानि रक्षासाधनानि हस्तपादादीनि च बिभ्रद् धारयन्, प्रत्यङ् ज्ञानार्जनाय प्रतिविषयम् अञ्चन् गच्छन्, स्वः न सूर्य इव प्रियाणि नाम नामानि यशांसि जनत जनयति ।

प्राणः

प्राणोऽपि गन्धर्व उच्यते । देहस्थानाम् इन्द्रियादीनां धारणादेव । तस्यैषा भवति—

पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद् गर्भे अन्तः ।
तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो निपान्ति ॥

ऋग् 10.177·2

अत्र जैमिनीयोपनिषद्ब्राह्मणे प्रोक्तं व्याख्यानं दीयते—**"पतङ्गो वाचं मनसा बिभर्तीति । प्राणो वै पतङ्गः, स इमां वाचं मनसा बिभर्ति । तां गन्धर्वोऽवदद् गर्भे अन्तः इति । प्राणो वै गन्धर्वः, पुरुष उ गर्भः । स इमां पुरुषे अन्तर्वाचं वदति । तां द्योतमानां स्वर्यं मनीषाम् इति । स्वर्या ह्येषा मनीषा यद्वाक् । ऋतस्य पदे कवयो निपान्ति इति । ओमित्येतदेव अक्षरम् अमृतम् मनो वा ऋतम्, एवंविद उ कवयः । तेन यदृचं मीमांसन्ते यद्यजुः यत्साम तदेनां निपान्ति** (जै. उ. ब्रा. 3.6.8.3)" इति सायणोऽप्याह ..... **"ताम् एव वाचं गर्भे शरीरस्य मध्ये वर्तमानः गन्धर्वः गाः शब्दान् धारयतीति गन्धर्वः प्राणवायुः अन्तः मध्ये अवदत् वदति प्रेरयति—मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् (पा. शि. 7) इतिस्मरणात्"** इति ।

मनः

मनोऽपि गन्धर्व उच्यते । गवां वाचाम् ऋक्साम्नां धारकत्वात् । उक्तं च **"मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरसः** (वा. यजुः 18.43)" इति । तस्यैषा भवति—

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥

यजु 30.1

हे देव सर्वप्रकाशक सवितः शुभगुणप्रेरक परमात्मन्, यज्ञम् अस्माकं जीवनयज्ञं प्रसुव प्रेरय । यज्ञपतिं यजमानम् आत्मानं भगाय उत्कर्षाय प्रसुव प्रेरय । दिव्यः दिव्यशक्तिसम्पन्नः केतपूः केतं ज्ञानं पुनातीति तादृशः गन्धर्वः मनः नः अस्माकं केतं ज्ञानं पुनातु शोधयतु । वाचस्पतिः वाचः वाण्याः ऋक्सामादिरूपायाः पतिः मनः नः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं वाचं स्वदतु मधुरां करोतु । मनसा विचार्य वाक्प्रयोगे वाचि माधुर्यं भवतीति मनस्तदर्थं प्रार्थयते ।

सूर्यः

सूर्योऽपि गन्धर्व उच्यते, **'सूर्यो गन्धर्वः** (यजुः 18.39)' इति प्रामाण्यात् । गां ग्रहोपग्रहयुक्तं सकलं सौरमण्डलं धरतीति गन्धर्वः सूर्यः । तस्यैषा भवति—

गन्धर्व इत्था पदमस्य रक्षति पातिं देवानां जनिमान्यद्भुतः ।
गृभ्णातिं रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत ॥

ऋग् 9.83.4

सोमो देवता, स च चन्द्रमाः गन्धर्वः[8] सूर्यः इत्था सत्यम् अस्य सोमस्य चन्द्रमसः पदं मण्डलं रक्षति, चन्द्रमसः सूर्येणैव प्रकाशित्वात् सूर्याकर्षणेनैव निराधारं गगने स्थितत्वात् । यः अद्भुतः आश्चर्यकरः गन्धर्वः सूर्यः देवानां तत्प्रकाशेन प्रकाशितानां ग्रहोपग्रहाणां जनिमानि जन्मानि पाति रक्षति । यश्च निधापतिः किरणजालपाशस्वामी सूर्यः निधया किरणपाशेन रिपुं तमोरूपं रोगादिरूपं वा शत्रुं गृभ्णाति बध्नाति, यस्य च मधुनः वृष्ट्यु॒दकस्य ओषधिवनस्पत्यादिषु रसरूपेण परिणतस्य भक्षं भोजनं सुकृत्तमाः पुण्यकर्तारो जनाः आशत प्राप्नुवन्ति ।

तस्यैषाऽपरा भवति—

यत् तुदत् सूर एतशं वङ्कू वातस्य पर्णिना ।
वहत् कुत्समार्जुनेयं शतक्रतुः त्सरद् गन्धर्वमस्तृतम् ॥

ऋग् 8.11.1

सूर्यो हि ग्रीष्मर्तौ एतशं भूमण्डलं भीषणतापेन तपति, तत उद्धाराय इन्द्रः तत्सख्ये कुत्साख्याय दिवसाय मेघमण्डलं प्रयच्छतीत्याख्यानशैल्या प्राह । यत् यदा सूरः सूर्यः एतशं गतिमन्तं भूमण्डलं तुदत् अतुदत् दुःसहतापेन व्यथयति, तदा शतक्रतुः शतकर्मा परमेश्वरः आर्जुनेयम् अर्जुन्याः उषसः पुत्रं कुत्सं नैशान्धकारकृन्तनपरं दिवसम्, **अर्जुनीत्युषोनाम** (निघं. 1.8), **कुत्स इत्येतत् कृतते** (निरु. 3.11), वातस्य वायुरूपस्य पक्षिणः वङ्कू गतिमन्तौ, वकि कौटिल्ये गतौ च, पर्णिना पर्णिनौ पक्षती मेघरूपे वहत् अवहत् प्रददाति । ताभ्यां मेघरूपपक्षतिभ्याम् उड्डयमानः असौ ग्रीष्म-दिवसः अस्तृतं केनाप्यहिंसितमपि गन्धर्वं[9] सूर्यं त्सरत् छद्मगत्या सूर्येण योद्धुं गच्छति,

---

8. अत्र गन्धर्वः उदकानां वा धारक आदित्यः इति सायणः । सायण एतेष्वपि मन्त्रेषु गन्धर्वम् आदित्यपरं व्याख्याति—ऋ. 8.1.11, 10.10.4. अथर्व 2.1.2, 2.2.1-3 ।

9. गवां रश्मीनां धर्तारं सूर्यमिति सायणः । मन्त्रव्याख्यानं त्वसौ इतिहासपरं चकार । तन्मते एतशः एतत्संज्ञो राजर्षिः, आर्जुनेयः कुत्सः अर्जुन्याः मातुः पुत्रः कुत्साख्यः ऋषिः. तं वातस्य वायोः सदृशौ पर्णिनौ पतनवन्तौ अश्वौ शतक्रतुः प्रापयत् । कुत्सेन सार्धं समानं रथमारुह्य एतशरक्षणाय अगच्छदित्यर्थः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्सर छद्मगतौ। मेघमण्डलरूपपक्षतिभ्यां सूर्यमाच्छाद्य तं निष्प्रभावं कृत्वा दुःसहतापान्मुच्यते इत्यर्थः।

सूर्यरश्मयः

सूर्यरश्मयोऽपि गन्धर्वा उच्यन्ते, गां पृथिवीं धरन्तीति तेषामेषा भवति—

इदं सदो रोहिणी रोहितस्यासौ पन्थाः पृषती येन याति।
तां गन्धर्वाः कश्यपा उन्नयन्ति तां रक्षन्ति कवयोऽप्रमादम्॥

अथर्व 13.1.23

रोहितो देवता। रोहितः प्रातःकालिको लोहितवर्णः सूर्यः। लोहितवर्णा तात्कालिकी द्यौः उषा वा रोहिणी। रोहितो हि रथासीनः समायाति, तद्रथं च पृषती वहति, यथोक्तं "**यं त्वा पृषती रथे प्रष्टिर्वहति रोहित,** अथर्व 13.1.21" इति। अथ मन्त्रार्थः—रोहितस्य लोहितस्य सूर्यस्य रोहिणी उषोऽपरपर्याया लोहितवर्णा द्यौः इदं पुरो दृश्यमानं सदः स्थितिस्थानम् अस्ति। असौ एव स पन्थाः मार्गः येन पृषती रोहितरथं वहन्ती पृषद्वर्णा अश्वा याति गच्छति। तां रोहिणीं कश्यपाः पश्यकाः प्रकाशकाः, "**कश्यपः पश्यको भवति यत्सर्वं परिपश्यतीति सौक्ष्म्यात्।** तै. आ. 1.8.8", गन्धर्वाः सूर्यरश्मय उन्नयन्ति ऊर्ध्वं गमयन्ति, तां रोहिणीं ते कवयः गतिमन्तस्ते सूर्यरश्मिरूपा गन्धर्वाः अप्रमादं प्रमादरहितं रक्षन्ति।

चन्द्र :

चन्द्रोऽपि गन्धर्व उच्यते, गाः सूर्यरश्मीन् धरतीत्यतः। तथा चोक्तम् **'सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः** (यजु 18.40)' इति। चन्द्रो हि सूर्यरश्मीन् स्वमण्डले धृत्वा तज्ज्योतिषा ज्योतिष्मान् भवति। तस्यैषा भवति—

ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद् विश्वा रूपा प्रतिचक्षाणो अस्य।
भानुः शुक्रेण शोचिषा व्यद्यौत् प्रारूरुचद् रोदसी मातरा शुचिः॥

ऋग् 9.85.12

अत्रेदं सायणीयं व्याख्यानम्—"**ऊर्ध्वः उन्नतः गन्धर्वः रश्मीनां धारकः सोमः नाके आदित्ये अधि अस्थात् अधितिष्ठति। किं कुर्वन्? अस्य आदित्यस्य विश्वा विश्वानि रूपाणि प्रतिचक्षाणः प्रतिपश्यन्**[10]। **भानुः आदित्यः सोमाधिष्ठतः सन् शुक्रेण दीप्तेन शोचिषा तेजसा व्यद्यौत् विद्योतते, न केवलं स्वयमेव, अपितु मातरा निर्मात्र्यौ रोदसी द्यावापृथिव्यौ प्रारूरुचत् प्ररोचयति। शुचिः दीप्तः सूर्यः।**' इति।

तस्यैषाऽपरा भवति—

---

10. प्रतिचक्षाणः आदित्यस्य विश्वानि ज्योतींषि प्रतिफलितानि कुर्वन्निति व्याख्यानं शोभनतरं स्यात्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तयोरिद् घृतवत् पयो विप्रा रिहन्ति धीतिभिः ।
गन्धर्वस्य ध्रुवे पदे ॥ ऋग् 1.22.14

गन्धर्वस्य सुषुम्णाख्यसूर्यरश्मेर्धारकस्य चन्द्रमसः ध्रुवे पदे निश्चले स्थानेऽन्तरिक्षे विद्यमानं तयोः द्यावापृथिव्योः इत् एव घृतवत् पयःक्षरणशीलम् उदकं मेघात्मना परिणतं पश्चात् पृथिव्याम् अभिवृष्टं विप्राः मेधाविनो याज्ञिकाः धीतिभिः यज्ञकर्मभिः रिहन्ति आचामन्ति ।

स्कन्दव्याख्याने तु गन्धर्वस्य ध्रुवे पदे चन्द्रमण्डले यद् घृतवत् पयो रश्मिरूपं भवति शुक्लपक्षे तद् विप्राः आदित्यरश्मयः कृष्णपक्षे रिहन्ति पिबन्तीत्याशयः[11] ।

मेघः

मेघोऽपि गन्धर्व उच्यते । गां गर्जनलक्षणां वाचम् उदकं वा धारयतीति । तस्यैषा भवति—

अभि गन्धर्वमणतृदबुध्नेषु रजः स्वा ।
इन्द्रो ब्रह्मभ्य इद् वृधे ॥ ऋक् 8.77.5

'गन्धर्वो मेघः । गाम् उदकं धारयति इति । तं रश्मिभिः अभि अतृणत् अबुध्नेषु पदनिधानयोग्यस्थलरहितेषु लोकेषु । अन्तरिक्षे स्थित इत्यर्थः । इन्द्रः ब्राह्मणान् एव वर्धयितुम् ।' इति वेंकटमाधवः । सायणोऽपि तथैव व्याख्यातवान् । **'पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद् गर्भे अन्तः** (ऋ. 10.177.2)" इति प्राक् प्राणपरतया व्याख्याते मन्त्रेऽपि वेंकटः **"ताम् गन्धर्वः वाचो धर्ता उदकस्य वा वदति गर्भे अन्तः वर्तमानः इति पर्जन्यम् उक्तं मन्यते"** इति गन्धर्वं मेघपरत्वेनैव व्याचष्टे ।

तस्यैषाऽपरा भवति—

अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन् ।
केशी केतस्य विद्वान् त्सखा स्वादुर्मदिन्तमः ॥
ऋग् 10.136.6

अप्सरसां सूर्यदीधितीनां गन्धर्वाणां मेघानां मृगाणां पशूनां च चरणे विचरणस्थाने क्रमेण दिव्यन्तरिक्षे पृथिव्यां चेति यावत्-चरन् विचरन् केशी सूर्यः, **"केशी केशा रश्मयस्तैस्तद्वान् भवति काशनाद्वा"** इति निरुक्तम् (12.14), केतस्य विद्वान् प्रज्ञापनप्रकारस्य ज्ञाता, सखा मित्रभूतः, स्वादुः सेवने मधुरः, मदिन्तमः अतिशयेन सुखप्रदश्च विद्यते ।

---

11. वेंकटस्तु 'आदित्यस्य ध्रुवे स्थाने' इति व्याचष्टे ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वायु :

वायुरपि गन्धर्व उच्यते, गाः उदकानि गां पृथिवीं वा धारयतीति[12]। उक्तं च 'वातो गन्धर्वः (यजुः 18.41)' इति । तस्यैषा भवति—

पर्जन्यवृद्धं महिषं तं सूर्यस्य दुहिताभरत् ।
तं गन्धर्वाः प्रत्यगृभ्णन् तं सोमे रसमादधुरिन्द्रायेन्दो परिस्रव ॥

ऋग् 9.113.3

अभिवृष्टं पर्जन्यरसं गन्धर्वाः पार्थिवसोमलतायां निदधतीत्याह । पर्जन्यवृद्धं पर्जन्ये मेघे वृद्धं वृद्धिं गतं महिषं महान्तं तं रसम् अन्तरिक्षे विद्यमानम् उदकं सूर्यस्य दुहिता पुत्रीभूता विद्युत् आभरत् वृष्टिद्वारा पृथिव्याम् आनयति । तं रसं गन्धर्वाः वायवः प्रत्यगृभ्णन् प्रतिगृह्णन्ति, प्रतिगृह्य च तं सोमे सोमवनस्पतौ आदधुःनिदधति । तादृश हे इन्दो सोम, त्वम् इन्द्राय परिस्रव परिक्षर ।

अग्निः

अग्निरपि गन्धर्व उच्यते, **'अग्निर्गन्धर्वः,** (यजुः 18.38)' इति वचनात् । गां वाचं पृथिवीं वा धरतीति । तस्यैषा भवति—

विश्वकर्मा ह्यजनिष्ट देव आदिद् गन्धर्वो अभवद् द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात् पुरूत्रा ॥

यजु 17.32

सृष्टिक्रम उच्यते । आदौ तावत् देवः दानादिगुणसम्पन्नः विश्वकर्मा वायुः अजनिष्ट उत्पन्नः, आदित् तदनन्तरं द्वितीयः गन्धर्वः अग्निः[13] अभवत् । तृतीयः पिता पालयिता ओषधीनां जनिता जनयिता पर्जन्यः पुरूत्रा बहुप्रकारम् अपाम् उदकानां गर्भं व्यदधात् विदधाति पृथिव्याम् । उक्तं च, **"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद् वायुः, वायोरग्निः अग्नेरापः"** (तै. उ., ब्रह्मवल्ली) इति ।

तस्यैषाऽपरा भवति—

स्वाहाकृतः शुचिर्देवेषु यज्ञो यो अश्विनोश्चमसो देवपानः ।
तमु विश्वे अमृतासो जुषाणा गन्धर्वस्य प्रत्यास्ना रिहन्ति ॥

अथर्व 7. 77. 3

स्वाहाकृतः स्वाहापूर्वकम् अनुष्ठितः शुशिः पवित्रो दीप्तो वा देवेषु विद्वत्सु यज्ञः यः अश्विनोः पत्नीयजमानयोः देवपानः देवाः यज्ञकर्तारः पिबन्ति फलमेतेन तादृशः

---

12. गन्धर्वः यो गां पृथिवीं धरति स वायुः इति ऋ. 1.163.2 भाष्ये दयानन्दः ।
13. "गन्धर्वः गोर्वाचो धारयिता पृथिव्या वा धारयिता गन्धर्वोऽग्निः, गानाद् वा गन्धर्वोऽग्निः" इत्युवटभाष्यम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चमसः पानसाधनपात्रभूतः । तमु तमेव यज्ञं यज्ञे आहुतं हविरादिकं विश्वे अमृतासः आत्मत्वेन अमरणधर्माणो यजमानाः जुषाणाः सेवमानाः सन्तः गन्धर्वस्य[14] वेदवाचां धारकस्य पृथिवीधारकस्य वा यज्ञाग्नेः आस्ना मुखेन प्रति रिहन्ति प्रत्येकं लिहन्ति आस्वादयन्ति । तथा च मन्त्रवर्णः "त्वामग्न आदित्यास आस्यं त्वां जिह्वां शुचयश्चक्रिरे कवे । त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम् (ऋग् 2.1.13) इति ।

यज्ञः

यज्ञोऽपि गन्धर्व उच्यते, **'यज्ञो गन्धर्वः'** (यजु 18. 42)' इति प्रामाण्यात् । गां भूमिं धरतीति गन्धर्वो यज्ञः । तस्यैष यजुर्मन्त्रो भवति—

गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै ।
यजमानस्य परिधिरस्यग्निरिड ईडितः ॥ यजु 2.3

हे यजमान, विश्वावसुः विश्वं वासयति यः सः यद्वा विश्वं वसु यस्मात् सः, गन्धर्वः यज्ञः त्वा त्वां परिदधातु स्वरक्षायां गृह्णातु[15] । किमर्थम् ? विश्वस्य अरिष्ट्यै विश्वस्य हिंसापरिहाराय । यज्ञभावनायां हि सर्वेषां हितं दृश्यते । अथाग्निः प्रोच्यते । इडः स्तोतुमर्हः ईडितः स्तुतः अग्निः यज्ञाग्निस्त्वम् यजमानस्य परिधिः परिधारकः आच्छादकः, रक्षक इति यावत्, असि ।

इन्द्रः

इन्द्रोऽपि गन्धर्व उच्यते । गोः वज्रस्य धारयिता । तस्यैषा भवति—

सस्निमविन्दच्चरणे नदीनामपावृणोद् दुरो अश्मव्रजानाम् ।
प्रासां गन्धर्वो अमृतानि वोचदिन्द्रो दक्षं परिजानादहीनाम् ॥

ऋग् 10. 139. 6

गन्धर्वाख्यस्य इन्द्रस्य मेघवर्षणप्रकार इच्यते । गन्धर्वः गोर्वज्रस्य धर्ता[16] इन्द्रः परमेश्वरः नदीनां नदानाम् अपां चरणे संचरणस्थानेऽन्तरिक्षे सस्निम् अद्भिः संस्नातं वृष्टिद्वारा पृथिव्याः स्नपयितारं वा मेघम्, **सस्निं संस्नातं** मेघमिति निरुक्तम् (5.1)

---

14. 'गन्धर्वस्य गां वेदरूपां वाचं धारयतीति गन्धर्व आदित्यः—तस्यादित्यस्य । रात्रावादित्यस्य अग्नावनुप्रवेशात् तदभेदेन अग्निर्वा गन्धर्वः तस्य आस्ना आस्येन' इति सायणः । With the Gandharva's mouth : that is by means of Agni, the sacrificial fire which bears oblation to the Gods—Griffith.

15. कर्मकाण्डे तु 'परिवधीन् परिदधाति मध्यमदक्षिणोत्तरान् गन्धर्व इति प्रतिमन्त्रम् । का. श्रौ. सू. 2.8.1

16. सायणकृतं निर्वचनमिदम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अविन्दत् वशमनयद् इन्द्रः । ततश्च अश्मव्रजानाम् अश्मा व्याप्तो मेघः (निघं. 1.10) स एव व्रजो गोष्ठं यासां तासाम् मेघेऽवरुद्धानाम् उदकानां दुरः निर्गमनद्वाराणि अपावृणोत् उद्घाटितवान् । स गन्धर्वः इन्द्रः आसाम् अपाम् अमृतानि जीवनप्रदानि तत्त्वानि वोचत् वेदद्वारा प्रब्रवीति—**अप्स्व१न्तरमृतमप्सु भेषजम**, अथर्व 1.4.4 इत्यादिप्रकारेण । स च अहीनां मेघानां दक्षं बलम् अपि परिजानात् परिजानाति । यद्वा गन्धर्वः इन्द्रः माध्यमिको विद्युदग्निः, स हि गर्जन् मेघोदकानाम् अमृतत्वं प्रख्यापयतीवेति गम्योत्प्रेक्षा ।

सोमः

सोमो वनस्पतिः सोमरसश्चापि गन्धर्व उच्यते । स हि गोः गोपयसः धर्ता । सोमरसे हि तत्तीव्रत्वापनयनार्थं गोपयांसि संयोज्यन्ते । तस्यैषा भवति—

सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितम् ।
अपां गन्धर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥

ऋग् 9.86.36

मातरः जन्मदात्र्यः सप्त स्वसारः स्वसृवत् परस्परं सांमनस्येन वर्तमानाः सप्त सप्त विधाः सूर्यदीधितयः नवं नूतनं जज्ञानं जायमानं शिशुं शिशुमिव विद्यमानं सोमं सोमवनस्पतिम् अपाम् उदकानां विश्वस्य भुवनस्य सर्वस्य वनस्पतिसमूहस्य च उपरि राजसे राज्यं कर्तुम् । उक्तं च **"राजा सिन्धूनाम**, ऋग् 9.86.33. **सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिः**, ऋग् 9.114.2 ।" अभि स्वक्रोडे अभिगृह्णन्ति । कीदृशं सोमम् ? जेन्यं शत्रूणां जयशीलं, यथोक्तं—**"उतो न्व१स्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु** ऋग् 8.47. ।" इति विपश्चितं बुद्धिमन्तं बुद्धिप्रदमित्यर्थः, गन्धर्वं गोपयसः धर्त्तारं यद्वा स्वपातरि वाचो धारयितारम् यथोक्तम्—**"अयं मे पीत उदियर्ति वाचमयं मनीषामुशती' मजीगः**, ऋग् 6.47.3" इति । दिव्यम् अलौकिकशक्तिसम्पन्नं, नृवक्षसं नृणां दृष्टि-प्रदम् । सोमपानेन किलैते गुणाः पातृषु प्रादूर्भवन्तीत्यत इदमुक्तम् ।[17]

नक्षत्राणि

नक्षत्राण्यपि गन्धर्वा उच्यन्ते, गाः रश्मीन् धरन्तीति । तेषामेषा भवति—

वातो वा मनो वा गन्धर्वाः सप्तविंशतिः ।
ते अग्रेऽश्वमयुञ्जंस्ते अस्मिञ्जवमादधुः ॥

यजु 9.7

कर्मकाण्डीयपद्धतौ मन्त्रेणानेन वाजपेययागे दक्षिणमश्वं रथे योजयति—**दक्षिणं युनक्ति वातो वेति** (का. श्रौ. सू. 14·3.6) । उवटव्याख्यानं दीयते—**" अश्वं**

17. चन्द्रपक्षेऽपि मन्त्रोऽयं योजयितुं शक्यते ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युनक्ति । वातो का उष्णिक्, अश्वस्तुतिः । वा शब्दः समुच्चयार्थीयः । वातश्च मनश्च गन्धर्वाश्च सप्तविंशतिर्नक्षत्राणि । एते त्वां युञ्जन्तु, त्वयि च जवमादधतु । यतस्ते अग्रे प्रथमम् अश्वम् अयुञ्जन् । ते अस्मिन् जवम् आदधुः ते च अस्मिन् जवं वेगमाहितवन्तः।" इति ।

विद्वान्

विद्वान् जनोऽपि गन्धर्व उच्यते, गां शास्त्रवाचं तद्रहस्यं धारयत्यन्तः करणे इति । तस्यैषा भवति—

प्र तद् वोचेदमृतं नु विद्वान् गन्धर्वो धाम विभृतं गुहा सत् ।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत् ॥

यजु. 32.9

गन्धर्वः वेदवाचो रहस्यानां धारयिता विद्वान् मेधावी पण्डित एव तद् गुहा बिभृतं सत् गुह्यम् अमृतं धाम तेजस्वरूपं ब्रह्म प्रवोचेत् प्रब्रूयात् । अस्य चतुष्पदो ब्रह्मणः त्रीणि पदानि त्रयः पादाः गुहा गुहायां निहिता निहितानि गुह्यानीति यावत् । उक्तं चान्यत्र "पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि, यजुः 31.3" इति । यः तानि वेद जनाति स पितुः पिता विद्वत्सु विद्वत्तमः असत् भवति ।

अत्र महीधरः—"गां वेदवाचं धारयति विचारयतीति गन्धर्वः वेदान्तवेत्ता विद्वान् पण्डितः नु क्षिप्रम् अमृतं शाश्वतं तत् ब्रह्म प्रवोचेत् प्रब्रूयात् । गुहा गुहायां सत् विद्यमानं धाम स्वरूपं विभृतं विहृतं सर्गस्थितिप्रलयरूपैर्विभक्तम् । किं च अस्यामृतस्य त्रीणि पदानि स्वरूपाणि गुहा गुहायां निहिता निहितानि । पदानि सर्गस्थितिप्रलयाः वेदाः काला वा ब्रह्मान्तर्यामिविज्ञानात्मानो वा । किंच यः तानि पदानि वेद जानाति स पितुः ब्रह्मणोऽपि पिता परमात्मा असत् भवति । परं ब्रह्मैव भवतीत्यर्थः ।" इति ।

तस्यैषाऽपरा भवति—

यद् भद्रस्य पुरुषस्य पुत्रो भवति दाधृषिः ।
तद् विप्रो अब्रवीदु तद् गन्धर्वः काम्यं वचः ॥

अथर्व 20.128.3

यद् भद्रस्य श्रेष्ठाचारस्य पुरुषस्य पुत्रः तनयः दाधृषिः पापदुराचारादीनाम् अतिशयेन धर्षणशीलः भवति तत् काम्यं स्पृहणीयं वचः वचनं विप्रः ब्राह्मणः अब्रवीत् ब्रूते, तत् काम्यं वचः गन्धर्वः । वेदवाग्रहस्याभिज्ञः पण्डितः अपि अब्रवीत् ब्रूते । विप्रेष्वपि विप्रतमः खलु गन्धर्वः । नीतिवचनमिदं स्वानुभवसंपुष्टं सर्वे विप्रजनाः वाचस्पतयः पण्डिताश्च ब्रुवन्तीत्यर्थः ।

पतिः

पतिरपि गन्धर्व उच्यते । तस्यैषा भवति—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमस्य जाया प्रथमं गन्धर्वस्तेऽपरः पतिः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥[18]

अथर्व 14.2.3

नवपरिणेता पतिः सोमः, तस्य सोमवत् परिपूर्णत्वात् सुकुमारतादिगुणयुक्तत्वाच्च । स च प्रायशश्चतुर्विंशतिवर्षदेशीयः । नवपरिणीता वधूः तस्य सोमस्य प्रथमं जाया भवति । तदुत्तरं भुक्तभोगः स पतिः गन्धर्वसंज्ञो जायते प्रायशः षट्त्रिंशद्वर्षीयः । गौः पत्नी धृता भुक्ताऽनेनेति गन्धर्वः । स तस्या एव वध्वा अपरः अपरकोटिकः पतिः । ततः स एव पतिः अग्निर्भवति प्रायशः अष्टचत्वारिंशद्वर्षः; अग्निदग्धवीर्यत्वात् । स तृतीयकोटिकः । तस्या एव वध्वाः तुरीयः चतुर्थः पतिः मनुष्यजाः उच्यते, प्रायशः षष्टिवर्षदेश्यः । स इदानीं वृद्धो मनुष्यो जायते इति मनुष्यजाः । एवमेकस्या वध्वा एक एव पतिर्गुणभेदाद् अवस्थाभेदाच्च चतस्रः संज्ञा लभते—सोमः, गन्धर्वः अग्निः, मनुष्यजाः इति ।

अन्ये त्वेवं व्याचक्षते । न नारी निष्पतिका तिष्ठति जातुचित् । बाल्यावस्थायां सोमस्तस्याः पतिः । सोमः चन्द्रः, स हि बाल्ये तस्यां सौम्यगुणानाधत्ते । कौमारे गन्धर्वस्तस्याः पतिः । गन्धर्वो वायुः, स हि तस्यां चाञ्चल्यादिकान् वायवीयगुणानाधत्ते । नवयौवने अग्निस्तस्याः पतिः । स हि तस्यां तारुण्यगुणानाधत्ते । ततश्च यदा पूर्णयुवतिर्जायते तदा चतुर्थस्तस्याः पतिर्मनुष्यजा मानवो युवा । तेन परिणीता सा गृहस्थाश्रमं वहति ।

याज्ञवल्क्यस्त्वाह—

सोमः शौचं ददावासां गन्धर्वश्च शुभां गिरम् ।
पावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः ॥

याज्ञ. आ. 71

राष्ट्रभृतः

राष्ट्रभृतोऽपि गन्धर्वा उच्यन्ते गां राष्ट्रभूमिं धारयन्तीति । उक्तं च—**एते खलु वै गन्धर्वाप्सरसो यद् राष्ट्रभृतः** (तै. 3. 4. 8.4)" इति । तेषामेषा भवति—

त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि ।
अपश्यमत्र मनसा जगन्वान् व्रते गन्धर्वाँ अपि वायुकेशान् ॥

ऋग् 3. 38.6

---

18. सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥ ऋग् 10.85.70 इति ऋग्वेदीयः पाठः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वामिदयानन्ददिशमनुसृत्य[19] व्याख्यायते । हे राजाना राजानौ विद्यादिशुभगुणैः प्रकाशमानौ राजप्रजाजनौ, युवां विदथे राष्ट्रयज्ञे त्रीणि सदांसि तिस्रः सभाः—राज्यसंचालनाय राजसभां, विद्योन्नत्यै विद्यासभां, धर्मप्रसाराय धर्मसभाम्—परिभूषथः अलंकुरुथः । ताभिश्च पुरूणि बहूनि विश्वानि विजयन्यायसुखादीनि परिभूषथः प्रापयथः । अत्र अस्मिन् विषये मनसा जगन्वान् मनसा विचारं प्रवर्तयन् अहम् अपश्यम् एतद् दृष्टवानस्मि यत् पूर्वोक्तासु सभासु व्रते राष्ट्रसेवाव्रते स्थितान् गन्धर्वान् पृथिवीराज्यपालनादिव्यवहारेषु कुशलान् अपि वायुकेशान् वायवश्च ते केशाश्च तान् वायुवद् दूतप्रचारेण विदितसर्वव्यवहारान्, केशाः सूर्यरश्मयः तद्वत् सत्यन्यायप्रकाशकान् सर्वहितं चिकीर्षून् सभासदः कुर्यात् ।

कर्षकः

कर्षकोऽपि गन्धर्व उच्यते । गां भूमिं कृषिकर्मणा धारयतीति । तस्यैषा भवति—

तिस्रो मात्रा गन्धर्वाणां चतस्रो गृहपत्न्याः ।
तासां या स्फातिमत्तमा तया त्वाभिमृशामसि ॥

अथर्व 3. 24. 6

धान्यसमृद्धिकर्मणि विनियुक्ता । क्षेत्रेषु यत् प्रचुरं धान्यमुत्पद्यते तत्र कस्य कति कति मात्रा भवन्तीत्युच्यते । यद् धान्यं क्षेत्रेभ्यः प्राप्यते तस्य अष्टौ मात्राः क्रियन्ते । एका मात्रा प्रवृद्धतमा अन्याः समाः । समासु तिस्रो मात्राः गन्धर्वाणां भवन्ति । गन्धर्वाः कर्षका ये गृहपतिना नियुक्ता क्षेत्रेषु कृषिकर्म कुर्वन्ति । समासु चतस्रो मात्राः गृहपत्न्या भवन्ति । तासाम् अष्टानां मात्राणां या स्फातिमत्तमा प्रवृद्धतमा भवति तया हे प्रजापते, प्रजापते इत्युत्तरमन्त्रादाकर्षणीयम्, हे गृहपते त्वा त्वाम् अभि मृशामसि अभिभृशामः संस्पृशामः, तां मात्रां त्वदधीनां कुर्म इति भावः । एवम् अष्टसु पञ्च मात्रा गृहस्वामिनां जाताः, तिस्रश्च कर्षकाणाम् इति न्यायः[20] ।

गायकः

गायकोऽपि गन्धर्व उच्यते । गां संगीतमयीम् आरोहावरोहात्मिकां वाचं कण्ठे धरतीति तस्यैषा भवति—

---

19. दयानन्दव्याख्यानम् ऋग्वेदादिभाष्यभूमिकायां राजप्रजाधर्मविषये, सत्यार्थप्रकाशे षष्ठसमुल्लासे, ऋग्वेदभाष्ये च द्रष्टव्यम् ।

20. 'गन्धर्वाणां विश्वावसुप्रभृतीनां संबन्धिन्यः तिस्रो मात्राः—तथा गृहपत्न्याः पतिव्रतायाः यद्वा अप्सरासम् । तासां मात्राणां मध्ये या स्फातिमत्तमा अतिशयितसमृद्धियुक्ता तया हे धान्य त्वा त्वसाम् अभिमृशामसि····अभिमर्शनेन वर्धस्व' इति सायणीयं व्याख्यानं तु न सन्तोषावहम् । ग्रिफिथमते उत्तरार्धस्य व्याख्यानम् एवम् and the best sheaf of all is offered as a sample to the owner of the field,

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ॥

यजु 12. 98

गन्धर्वाः इन्द्रः बृहस्पतिः सोमो राजा चेति ओषध्याः खनितारः उक्ताः । स्वामिदयानन्दभाष्ये गन्धर्वादयो मानवा एव व्यपदिष्टाः । तत्प्रोक्तां दिशमनुसृत्य व्याख्यानमिदं सुकरम्—हे ओषधे, त्वां गन्धर्वाः गानविद्याकुशलाः अखनन् खनन्ति, त्वाम् इन्द्रः परमैश्वर्ययुक्तो धनिको वैश्यः अखनत् खनति, त्वां बृहस्पतिः वेदविद् ब्राह्मणः अखनत् खनति, त्वां विद्वान् सत्यशास्त्रवित् सोमः सौम्यगुणसम्पन्नः राजा प्रकाशमानो राजन्यः अखनत् खनति । यक्ष्मात् क्षयादिरोगाच्च अमुच्यत मुच्यते ।

स्वामिदयानन्देनान्यत्रापि गन्धर्वोऽस्मिन्नर्थे गृहीतः । यथा ऋग्वेदादिभाष्यभूमिकायाम् अथर्व 11. 7. 27 मन्त्रव्याख्याने **"गन्धर्वा गानविद्याविदः सूर्यादयो वा"** इति, यजु. 24. 37 मन्त्रव्याख्याने **'गन्धर्वाणां गायकानाम्'** इति । सायणोऽप्याह—**गीतिरूपा वाचो गाः धरयतीति गन्धर्वः**[21] । गन्धर्वाणां वाचा सम्बन्धत्वादेव वाग् गान्धर्वी उच्यते[22] । यथा **"अग्निर्गान्धर्वी पथ्यामृतस्य,** ऋग् 10. 80. 6" इत्यस्मिन् मन्त्रे । तथापि स्पष्टरूपेण तथा परवर्तिनि साहित्ये गन्धर्वाणां गायकस्वरूपं प्राप्यते, न तथा वेदेषु । अयम् ऋग्वेदीयो मन्त्रो गन्धर्वाणां गानविषये द्रष्टव्यः, अत्र गन्धर्वस्य स्त्रिया गन्धर्व्या गायिकात्वं वर्णितम् ।

रपद् गन्धर्वीरप्या च योषणा नदस्य नादे परिपातु मे मनः ।
इष्टस्य मध्ये अदितिर्निधातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥

ऋग् 10. 11. 2

रपत् रपतु गानं करोतु गन्धर्वीः गायिका अप्या अप्सु कर्मसु भवा कर्मकुशला योषणा अन्या योषिच्च । सा च गायन्ती नदस्य स्तोतुः नद इति.स्तोतृनाम (निघं.3.16) नादे भक्तिसंगीते मे मनः चित्तं परिपातु रक्षतु एकाग्रं करोतु । अदितिः माताऽपि गायन्ती सती नः अस्मान् इष्टस्य उपास्यदेवस्य मध्ये निधातु निदधातु । नः प्रथमः श्रेष्ठः ज्येष्ठो भ्रातापि वि वोचति विशेषेण स्तुतिगानं करोतु[23] ।

---

21. अथर्व 4.37.7 भाष्ये ।
22. गान्धर्वीति वाङ्नामसु पठ्यते । निघं. 1.11
23. सायणस्त्वेवं व्याचष्टे—रपत् रपितवती अग्निगुणानुक्तवती गन्धर्वीः गन्धर्वस्य स्त्री, अप्या अद्भिः संस्कृता योषणा आहुतिलक्षणा स्त्री च अग्निं तर्पितवतीति शेषः । गन्धर्वाणां गायकत्वे मेक्डानलस्य टिप्पणीयं द्रष्टव्याः of the conception of the Gandharvas being celestial singers, which appears in the Epics and later, there seems to be no distinct trace in the Rgveda (ep. 10.177.11). Vedic Mythology. Context: Gandharvas.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्सरसस्ताभिर्गन्धर्वाणां सम्बन्धश्च

'अप्सरा' अप्सरस् इत्याकारान्तं सकारान्तं चोभयथापि वेदेषु प्रयुज्यते। तद्व्युत्पत्तिर्निरुक्तमनुसरता सायणेनैवं प्रादर्शि—"**आप इत्यन्तरिक्षनाम, उदकं वा, तत्र सरतीति अप्सरा, बाहुलकाद् अच्। यद्वा अप्स इति रूपनाम, रो मत्वर्थीयः। उभयत्र टाप्। अथवा अप्सु सरतीति अप्शब्दोपपदात् सर्तेः असुन्। अप्सशब्दोपपदात् ला आदाने इत्यस्माद् वा रत्वे असुन्। रा दाने इत्वस्माद् वा असुन्। तथा च सकारान्तोऽप्सरःशब्दः। तस्यैव व्यत्ययेन सकारस्य आत्वम्। एतत् सर्वं यास्केनोक्तम्—अप्सरा अप्सरिणी। अपि वाऽप्स इति रूपनाम, अप्सातेः, अप्सानीयं भवति, आदर्शनीयं व्यापनीयं वा इति। तद्रा भवति रूपवती। तदनया आत्तम् इति वा तदस्यै दत्तमिति वा** (निरु. 5.3), इति[24]।" एतेन ज्ञायते यद् अन्तरिक्षसंचारिणी, उदकसंचारिणी, रूपवती चेति त्रयो योगार्था अप्सराशब्दस्य अप्सरस्शब्दस्य वा सम्पद्यन्ते।

अप्सरसो हि गन्धर्वपत्न्य उक्ताः—"**ताभ्यो गन्धर्वपत्नीभ्योऽप्सराभ्योऽकरं नमः।** अथर्व 2.2.5"; **जाया इद् वो अप्सरसो गन्धर्वाः पतयो यूयम्।** अथर्व 4.37.12 इति। अतः ये पूर्वं चेतना अचेतना वा गन्धर्वाः प्रतिपादिताः, तेषां पत्न्यः पत्नीवत् साहचर्ये वर्त्तमाना वा काश्चन अप्सरसो भवति। यजुर्वेदे कासांचन गन्धर्वाप्सरसां परिगणनमित्थमुपलभ्यते—

अग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम।
सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम।
चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम।
वातो गन्धर्वस्तस्यापो अप्सरस ऊर्जो नाम।
यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम।
मना गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम॥[25]

यजुः 18.38.43

पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्सरसो रुचो नाम।
मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरुवो नाम।
कामो गन्धर्वस्तस्याऽऽधयोऽप्सरसः शोचयन्तीर्नाम॥

तै. 3.4.7.2

मरीचय :

सूर्यरूपस्य गन्धर्वस्य मरीचीनामप्सरसां विषये मन्त्रोऽयं द्रष्टव्यः—

---

24. अथर्व 2.2.3 मन्त्रस्य सायणभाष्ये।

25. तै. 3.4.7 इत्यत्रापि किंचित्पाठभेदेन सर्वमिदमुपलभ्यते।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनवद्याभिः समु जग्म आभिरप्सुरास्वपिं गन्धर्व आसीत् ।
समुद्र आसां सदनं म आहुर्यतः सद्य आ च परा च यन्ति ॥

अथर्व 2.2,3

अत्रेदं सायणीयं व्याख्यानम्—'अनवद्याभिः अगर्ह्याभिः प्रशस्तरूपाभिरित्यर्थः ··· आभिः अप्सरोभिः मरीचिरूपाभिः "सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरसः (तै. 3.4.7.1) इति श्रुतेः सूर्यरूपो गन्धर्वः सं जग्मे संगतवान् । उ शब्दः पदपूरणार्थः प्रसिद्ध्यर्थो वा ।···आसाम् अप्सरसां मरीचिरूपाणां सदनम् सीदन्त्यस्मिन्निति सदनम् आवासस्थानम्, अधिकरणे ल्युट्, समुद्रे समुद्द्रवन्ति अस्माद् आप इति वा संमोदन्तेऽस्मिन् भूतानीति वा समुद्रशब्देन आदित्य उच्यते तत्र इति मे मम आहुः कथयन्ति अभिज्ञाः । ··· तदेव उपपादयति—यतः यस्माद् आदित्यात् सद्यः सूर्योदय-समकालमेव आ यन्ति च आगच्छन्ति च परा यन्ति च अस्माद् स्थानात् तत् पुनः परागच्छन्ति च, अस्तमयकाले तदेव प्रविशन्तीत्यर्थः" इति । एतं श्रुत्यनुमोदितं सत्यार्थ-मुपवर्ण्यापि पुनरसौ पौराणिकभावभावितात्मा विकल्पं प्रस्तौति—"अथवा गन्धर्वशब्दः प्रसिद्धगन्धर्वजातिवाचकः । अप्सरःशब्दोऽपि प्रसिद्धाप्सरोजातिवाची । समु जग्म इति परम्परानुरागविशेण स्त्रीपुंसात्मकानां तेषां गतिरुक्ता । समुद्रशब्देन अन्तरिक्षलोक उच्यते । यतः यस्माद् अन्तरिक्षलोकाद् आयन्ति प्रजापीडार्थम् आविर्भवन्ति पुनस्तत्रैव परा यन्ति तिरोभवन्तीत्यर्थः" इति । एवमन्यत्रापि गन्धर्वाप्सरोव्याख्यानेषु स्वलीला-विलसितं चकार सायणः ।

ओषधयोऽप्यप्सरस उच्यते, "अग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसः, यजु 18.38" इति श्रुतेः ।

घृतमप्सराभ्यो वह त्वमग्ने पांसूनक्षेभ्यः सिकता अपश्च ।
यथाभागं हव्यदातिं जुषाणा मदन्ति देवा उभयानि हव्या ॥

अथर्व 7.109.2

हे अग्ने यज्ञाग्ने, त्वम् अप्सराभ्यः ओषधिभ्यः घृतम् उदकम् **घृतमित्युदकनाम जिघर्तेः सिञ्चतिकर्मणः**, निरु. 7.24, वह वृष्टिद्वारा प्रापय । अक्षेभ्यः अक्षांशेभ्यः पांसून् धूलिकणान् सिकताः सिकताकणान् अपः जलानि च वह प्रापय । अग्निना उष्णत्वं नीतो वायुर्लघुर्भूत्वा उपरि गच्छति तत्स्थानं च ग्रहीतुं पार्श्वप्रदेशेभ्यः पवनाः समायान्ति । कदाचिच्चक्रवातान् झंझावातांश्चापि जनयन्ति । तत्साकं पांसवः सिकता-श्चापि समागच्छन्ति । कदाचित् समुद्राज्जलभरिताः पवनाः भुवं प्रति समायान्ति, ये पर्वतादिभिः शैत्यं प्राप्य वर्षन्ति । एवम् अग्नितप एव पांसून् सिकताः अपश्च वहति । हे अग्ने, त्वन्माध्यमेन यथाभागं स्वं स्वं भागमनुसृत्य हव्यदातिं हविर्दानं उभयानि हव्या हव्यानि स्निग्धानि आज्यरूपाणि शुष्काण्योषधिमयानि चोभयानि हवींषि जुषाणाः सेवमानाः देवाः विद्वांसः, **विद्वांसो वै देवाः** श. ब्रा. 3.7.3.10 इति श्रुतेः, मदन्ति माद्यन्ति तृप्यन्ति ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्युतः

विद्युतोऽप्यप्सरस उच्यन्ते,'पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्सरसः' तै. 3.4.7.2 इति श्रुतेः ।

अप्सरसः सधमादं मदन्ति हविर्धानमन्तरा सूर्यं च ।
ता मे हस्तौ सं सृजन्तु घृतेन सपत्नं मे कितवं रन्धयन्तु ॥

अथर्व 7. 109. 3

अप्सु मेघोदकेषु सरन्तीत्यप्सरसः विद्युतः हविर्धानं हविर्धीयते अत्रेति हविर्धानो भूलोकः तम्, अधिकरणे ल्युट् सूर्यं सूर्यलोकं च अन्तरा मध्ये अन्तरिक्षे सधमादं सह मदनं यथा स्यात् तथा मदन्ति चञ्चन्त्यो हृष्यन्तीव । ताः अप्सरसः विद्युतः मे मम हस्तौ पाणी घृतेन वृष्ट्युदकेन वृष्टिजनितकृषिसस्यसमृद्ध्येत्यर्थः संसृजन्तु संयोजयन्तु । मे मम सपत्नं शत्रुभूतं कितवं द्यूतासक्तं प्रयासं विनैव द्यूतेन सस्यादिसमृद्धिर्मे स्यादित्यभिलषन्तम्, रन्धयन्तु हिंसन्तु, रध हिंसासंराध्योः । **"अक्षैर्मा दीव्या कृषिमित् कृषस्व,** ऋग् 10. 34. 13" इत्युपदेशात् कितवो हि समाजस्य शत्रुः । यो हि परिश्रमपरायणः कर्षकः सोऽप्सरसां विद्युतां साहाय्येन कृषिसमृद्धिं प्राप्नुयात्, यश्च द्यूतासक्तः अलसः स तासां वज्राघातस्य भाजनं भवेदिति सारांशः ।

आपः

आपोऽप्यप्सरस उच्यन्ते, **"आपो अप्सरसः** (यजुः 18. 41) इति श्रुतेः अप्सु अन्तरिक्षे सरन्ति गच्छन्तीति ।

समुद्रिया अप्सरसो मनीषिणमासीना अन्तरभि सोममक्षरन् ।
ता ईं हिन्वन्ति हर्म्यस्य सक्षणिं याचन्ते सुम्नं पवमानमक्षितम् ॥

ऋग् 9. 78. 3

समुद्रियाः समुद्रे भवाः, **'समुद्राभ्राद् घः'** पा. 4. 4. 118 इति भवार्थे घः अप्सरसः आपः, अन्तः समुद्राभ्यन्तरे आसीनाः स्थिता अपि मनीषिणं मनः इष्टे इति मनीषी तं सोमम् अभि चन्द्रम् प्रति अक्षरन् प्रवहन्ति, तत्कारणादेव समुद्रे ज्वार उत्पद्यते । ताः आपः हर्म्यस्य समुद्ररूपस्य गृहस्य सक्षणिं सेवनशीलम् ईम् एनं सोमं चन्द्रमसं हिन्वन्ति गच्छन्ति, किं च अक्षितम् अक्षीणं परिपूर्णमिति यावत् पवमानं चन्द्रमसं सुम्नं सुखं याचन्ते इवेति गम्योत्प्रेक्षा । कुत एताः समुद्रस्य आपः चन्द्रमसं प्रति धावन्तीत्यत्र कविरुत्प्रेक्षते स्वावासस्य समुद्रस्य कृते सुखं याचितुमिवेति भावः ।

आधयः

आधयश्चिन्ता अपि अप्सरस उच्यन्ते, **"कामो गन्धर्वस्तस्याऽऽधयोऽप्सरसः"** तै 3. 4. 7. 2 इति श्रुतेः । अप्सु मनःसु सरन्तीति ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रथजितां राथजितेयीनामप्सरसामयं स्मरः ।
देवाः प्रहिणुत स्मरमसौ मामनु शोचतु ॥

अथर्व 6. 130. 1

रथं शरीरशकटं जयन्तीति रथजितः मनःषष्ठानां पञ्चज्ञानेन्द्रियाणां वृत्तयः तासाम्, राथजितेयीनां रथजिताम् इन्द्रियवृत्तीनाम् अपत्यानि स्त्रियः राथजितेय्यः तासाम् अप्सरसाम् आधीनां मानसचिन्तानाम् च परिणामः अयं स्मरः कस्याश्चित् सुन्दर्याः निरन्तरस्मरणम् अस्ति । हे देवाः विद्वांसः, यूयं सदुपदेशेन स्मरं तत् स्त्री-विषयकनिरन्तरस्मरणं प्रहिणुत दूरं गमयत । नाहं स्मरमनु शोचामि, किन्तु असौ स्मरः मामनु मत्संकल्पमनुसृत्य शोचतु शुष्यतु ।

उषसः

उषसोऽप्यप्सरस उच्यन्ते । **आप इत्यन्तरिक्षनाम** (निघं. 1. 3) अप्सु अन्तरिक्षे सरन्तीत्यप्सरसः उषसः ।

अप्सरा जारमुपसिष्मियाणा योषा बिभर्ति परमे व्योमन् ।
चरत् प्रियस्य योनिषु प्रियः सन्त्सीदत् पक्षे हिरण्यये स वेनः ॥

ऋग् 10. 123. 5

वेनो देवता । वेनः सूर्यः वेनतेः कान्तिकर्मणः । अप्सराः उषाः । अप्सु अन्तरिक्षे सरतीति सा सूर्यस्य पत्नी, "सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात, ऋग् 1.115.2, वाजिनीवती सूर्यस्य योषा, ऋग् 7.75.5" इति वचनात् । अथ मन्त्रार्थः—योषा सूर्यस्य योषित् अप्सराः उषाः उपसिष्मियाणा ईषद् हसन्तीव परमे व्योमन् उच्चे व्योम्नि आकाशे जारं स्वस्या जरयितारं पतिं सूर्यं बिभर्ति आलिङ्गति । किंच प्रियस्य स्वपत्युः सूर्यस्य योनिषु प्राचोदिगवस्थिताकाशगृहेषु चरत् विचरति । प्रियः सन् स वेनः सूर्यः तस्याः हिरण्यये पक्षे ज्योतिर्मये पार्श्वे सीदत् सीदति, तामाश्लिष्य तिष्ठतीत्यर्थः ।

सेनाः

सेना अप्सरस उच्यन्ते । अप्सु युद्धक्रियासु सरन्ति उद्यच्छन्ते इति ।

श्वन्वतीरप्सरसो रूपका उतार्बुदे ।
अन्तः पात्रे रेरिहतीं रिशां दुर्णिहितैषिणीम् ।
सर्वास्ता अर्बुदे त्वमित्रेभ्यो दृशे कुरूदारांश्च प्र दर्शय ॥

अथर्व 11.9.15

हे अर्बुदे अर्बुदसंख्यकयोद्धृणामधिपते सेनाधीश, श्वन्वतीः श्वानो हिंसकाः सारमेया आसां सन्तीति ताः, उत रूपकाः स्वकीयं विशिष्टं रूपं चक्रव्यूहादिकं प्रदर्शयन्तीति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताः अप्सरसः युद्धक्रियाकुशलाः सेनाः, किं च अन्तःपात्रे पाति रक्षतीति । पात्रं सैन्यं शत्रुसैन्याभ्यन्तरे गत्वा रेरिहतीं लेलिहतीं तद्रुधिरं पिबन्तीं दुर्गिहितैषिणीं शत्रुं प्रति पापैषिणीं रिशां हिंसिकां शख्यां शरसंहतिम्—ताः सर्वा हे अर्बुदे अम्बुदवत् शरवर्षक सेनाध्यक्ष, त्वम् अमित्रेभ्यः शत्रुभ्यः दृशे दर्शनाय कुरु दर्शयेत्यर्थः, उदारान् स्वकीयान् उत्कृष्टप्रबन्धांश्च प्रदर्शय तान् निरूपय । येन त्रस्तास्ते विचलिता भवेयुः ।

राष्ट्रसंस्थाः

राष्ट्रसंस्था अप्यप्सरस उच्यते, अप्सु प्रजासु सरन्ति प्रवर्तन्ते इति ।

यद्धस्ताभ्यां चकृम किल्विषाण्यक्षाणां गत्नुमुपलिप्समानाः ।
उग्रंपश्ये उग्रजितौ तदद्याप्सरसावनु दत्तामृणं नः ॥

अथर्व 6.118.1

उग्रंपश्यानाम्न्यौ द्वे संस्थे, उग्रजिन्नाम्न्यौ च द्वे । उग्रजिन्नाम्न्याः संस्थायाः राष्ट्रभृत् इत्यपि संज्ञा, यथोक्तं परस्तात् **'उग्रंपश्ये राष्ट्रभृत् किल्विषाणि यदक्षवृत्तमनु दत्तं न एतत्** (अथर्व 6.118.2) इति । प्रजाभिः कृतानपराधान् उग्रं तीव्रं यथा स्यात्तथा पश्यतीति उग्रंपश्या अपराधानुसन्धानसंस्था, तस्या द्वे शाखे, एका अनुसन्धानशाखा द्वितीया न्यायविचारशाखा । उग्रं जयति शत्रूनिति उग्रजित्, तस्या अपि द्वे शाखे एका युद्धजित् शाखा, द्वितीया राष्ट्रभृत् शाखा । यद् वयम् इन्द्रियैः पापमाचरामः, ऋणं वा गृहीत्वा न प्रत्यावर्तयामः, तस्माद् इमे अप्सरसोऽपरपर्याये राष्ट्रसंस्थे अस्मान् मोचयतामिति प्रार्थ्यते ।

अथ मन्त्रार्थः—हस्ताभ्याम् इन्द्रियाण्युपलक्ष्यन्ते । हस्ताभ्यां करचरणादिभिः कर्मेन्द्रियैः नेत्रश्रोत्रादिभिर्मनःसहितैर्ज्ञानेन्द्रियैश्च किल्विषाणि पापानि यत् चकृम वयम् अकार्ष्म । किं च अक्षाणाम् इन्द्रियाणां गत्नुम् गन्तव्यं प्राप्तव्यं भोगम् उपलिप्समानाः उपलब्धुमिच्छन्तः यद् ऋणं चकृमेति शेषः । उग्रंपश्ये उग्रजितौ च एतन्नाम्न्यौ पूर्वव्याख्याते अप्सरसौ राष्ट्रसंस्थे नः अस्माकं तत् किल्विषं तद् ऋणं च अनु दत्तां क्रमशः दूरीकुरुताम् उत्तमर्णेभ्यः प्रदापयतां च ।

स्त्रियः

स्त्रियोऽप्यप्सरस उच्यन्ते । अप्सु कर्मसु सरन्ति व्याप्रियन्ते, यद्वा अप्स इति रूपनाम तद्वत्यः । यथा—

स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः ।
यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः ॥

ऋग् 7.33.12

वसिष्ठस्य जन्म वर्ण्यते । वसुः वासयिता इन्द्रियाणां शरीरे, अतिशयेन वसुः वसिष्ठः जीवात्मा । प्रकेतः प्रकृष्टज्ञानः, उभयस्य परमात्मनः प्रकृतेश्च प्रविद्वान्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकर्षेण ज्ञाता, सहस्रदानः सहस्रवस्तूनां दाता उत वा सदानः सर्वदैव दानेन सहितः वसिष्ठः जीवात्मा यमेन नियन्त्रा परमात्मना ततं विस्तृतं परिधिं[26] कर्मतन्तुं वयिष्यन् वातुमिच्छन् अप्सरसः अप्सु कर्मसु सरतीति, यद्वा अप्स इति रूपनाम तद्वती अप्सराः तस्याः कर्मकुशलाया सुरूपवत्याश्च नार्याः परि सकाशात् जज्ञे जन्म लेभे । अजस्यापि जीवात्मनो जन्मवर्णनं तदधिष्ठितपाञ्चभौतिकदेहजन्मविवक्षया कृतमिति पर्यवसेयम् ।

उद्भिन्दतीं संजयन्तीमप्सरां साधुदेविनीम् ।
ग्लहे कृतानि कृण्वानामप्सरां तामिह हुवे ॥

अथर्व 4.38.1

अप्सरा आहूयते । उद्भिन्दतीं विघ्नान्युद्भिद्य अग्रगामिनीं संजयन्तीं सम्यग् विजयं प्राप्नुवतीं साधुदेविनीं साधुप्रकारेण व्यवहरन्तीं, ग्लहे गृह्णाति मनुष्यं विषय-जालैरिति ग्रहः स एव रलयोरभेदेन ग्लहः तस्मिन् संसारे कृतानि पुण्यानि कृण्वानां कुर्वन्तीं ताम् अप्सरां कर्मकुशलां साध्वीं नारीम् इह हुवे आह्वयामि ।[27]

विचिन्वतीमाकिरन्तीमप्सरां साधुदेविनीम् ।
ग्लहे कृतानि गृह्णानामप्सरां तामिह हुवे ॥

अथर्व 4.38.2

विचिन्वतीं धनधान्यादीनां संग्रहं कुर्वतीम् आकिरन्तीं समन्ताद् विक्षिपन्तीं, कृ विक्षेपे संगृहीतद्रव्यं निर्धनेभ्यः प्रयच्छन्तीं चेत्यर्थः 'शतहस्त समाहर सहस्रहस्त संकिर अथर्व 3.24.5 इति वचनात् । शिष्टं पूर्ववत् । एतद्गुणविशिष्टाम् अप्सरां कर्मपरायणां नारीमहम् हुवे ।

या अक्षेषु प्रमोदन्ते शुचं क्रोधं च बिभ्रती ।
आनन्दिनीं प्रमोदिनीमप्सरां तामिह हुवे ॥

अथर्व 4.38.4

याः कदाचित् कारणवशात् शुचं शोकं, क्रोधं कोपं च बिभ्रती बिभ्रत्यः, वचन-व्यत्ययः, अक्षेषु कार्यधूर्वहनावसरेषु समुपस्थितेषु प्रमोदन्ते शुचं क्रोधं च परित्यज्य हृष्टा

---

26. ईश्वरेण कृतं परिधिं कर्मतन्तुम् इति वेंकटः । यमेन कारणात्मना सर्वनियन्त्रा ततं विस्तृतं परिधिं वस्त्रं, परिधिरित्यनेन संसारप्रवाहो विवक्षित इति सायणः ।

27. विनियोगकारैस्तु 'उद्भिन्दतीं' संजयन्तीम्' इति सूक्तेन द्यूतजयकर्मणि अक्षान् अभिमन्त्र्य देवनं कुर्यादित्युक्तम् । द्रष्टव्यम्: कौ. सू. 41.10.13 । तथैव सायणेनापि व्याख्यातम् । अप्सरा च तेन द्यूतक्रियाधिदेवता अप्सरोजातीया अभिमता । तत्तु अक्षैर्मा दीव्यः, ऋग् 10,34,14' इति वेदविरोधादेव परिहेयम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवन्ति ताः अप्सरसः नारीः अहं हुवे । किं च आनन्दिनीम् अन्येभ्य आनन्दप्रदानशीलां प्रमोदिनीं स्वयमपि च प्रमोदयुक्तां ताम् अप्सरां कर्मण्यां रूपयौवनसम्पन्नां नारीमहं हुवे ।

अप्सरोभिः उन्मादचिकित्सा

अथर्ववेदीयषष्ठकाण्डस्य १११ तमे सूक्तेऽग्निहोत्रादिद्वारा उन्मादचिकित्सा वर्णिता । तत्रोन्मादपरिहारकाणां मध्येऽप्सरसोऽपि परिगणिताः ।

पुनस्त्वा दुरप्सरसः पुनरिन्द्रः पुनर्भगः ।
पुनस्त्वा दुर्विश्वे देवा यथानुन्मदितोऽससि ॥

हे उन्मादित पुरुष, अप्सरसः पूर्वोक्तयजुःप्रामाण्यात् ओषधयः, आपः, विद्युतो वा त्वा त्वां पुनः दुः अदुः तवोन्मादं परिहृत्य अस्मभ्यं प्रयच्छन्तु । इन्द्रः वायुः पुनः अदात् प्रयच्छतु । भगः सेवनीयः सूर्यः पुनः दात् । विश्वे देवाः अन्यानि सर्वाणि दिव्यगुणयुक्तानि भेषजानि सर्वे वैद्यजना वा त्वा पुनः दुः अस्मभ्यं प्रयच्छन्तु, यथा त्वम् अनुन्मदितः उन्मादरहितः अससि भवेः ।

गन्धर्वाप्सरसां साहचर्यम्

अधुनावधि गन्धर्वाप्सरःशब्दयोरर्थप्रतिपादने ये वेदमन्त्रा उद्धृतास्तेषु प्रायेण गन्धर्वाप्सरःपदयोरेकतरदेव प्रयुक्तम् । तथाप्यनेकत्र वेदेषु गन्धर्वाप्सरसः साहित्येनापि वर्णिताः। यथा—

गन्धर्वाप्सरसौ ब्रूमो अश्विना ब्रह्मणस्पतिम् ।
अर्यमा नाम यो देवस्ते नो मुञ्चन्त्वंहसः ॥

अथर्व 11.8.4

देवाः पितरो मनुष्या गन्धर्वाप्सरसश्च ये ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥

अथर्व 11.9.27

यस्ते गन्धः पृथिवि संबभूव यं बिभ्रत्योषधयो यमापः ।
यं गन्धर्वा अप्सरसश्च भेजिरे तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चन ॥

अथर्व 12.1.23

कालो यज्ञं समैरयद् देवेभ्यो भागमक्षितम् ।
काले गन्धर्वाप्सरसः काले लोकाः प्रतिष्ठिताः ॥

अथर्व 19.54.4

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र गन्धर्वाप्सरसः पूर्वोक्तयजुर्वेदप्रकरणानुसारम् अग्निः—ओषधयः, सूर्यः—मरीचयः, चन्द्रमाः—नक्षत्राणि, वातः—आपः, यज्ञः—दक्षिणाः, मनः—ऋक्सामानि, पर्जन्यः—विद्युतः, मृत्युः—प्रजाः इत्येवंरूपेण व्याख्यातुं शक्यन्ते । क्वचिद् वेदेषु गन्धर्वाप्सरसः आदित्यः—उषसः, परमात्मा-प्रकृतिः, राजा-प्रजाः, प्राणः प्रज्ञाः-इत्यादिरूपेणापि ग्रहीतुमर्हाः ।

यजुर्वेदेऽप्सरसां नामानि

वा. मा. यजुर्वेदस्य पञ्चदशाध्याये 15-18 कण्डिकासु कासांचिदप्सरसां नामानि कीर्तितानि—पुञ्जिकस्थला, क्रतुस्थला, मेनका, सहजन्या, प्रम्लोचन्ती, अनुम्लोचन्ती, विश्वाची, घृताची, उर्वशी, पूर्वचित्तिरिति । इमा राजसेनादयः सन्ति । तत्र दिङ्मात्रमुदाह्रियते—

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ । पुञ्जिकस्थला च क्रतुस्थला चाप्सरसौ दङ्क्षणवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ यजु 15.15

पुरः, दक्षिणा, पश्चात्, उत्तरात्, उपरि इति मन्त्रानुक्रमेण पञ्च दिशः प्रोक्ताः । सम्राट् राष्ट्रे प्रतिदिशं रक्षाप्रबन्धं कुर्यादित्युक्तम् । प्रस्तुतमन्त्रे पूर्वदिग्व्यवस्था वर्ण्यते । पुरः पूर्वस्यां दिशि अयं सम्राट् हरिकेशः हरयोऽज्ञानहरणशीलाः केशा ज्ञानरश्मयो यस्य सः, सूर्यरश्मिः सूर्यस्य रश्मय इव रश्मयः प्रतापप्रकाशा यस्य तादृशः अस्ति । तस्य रथगृत्सश्च रथेऽवस्थितः गृत्सः मेधावी, **गृत्स इति मेधाविनाम,** निघं. 3.15, रथ एव ओजः तेजः यस्यास्ति तादृशः च रथसंग्रामनिष्णात इत्यर्थः सेनानीग्रामण्यौ क्रमेण सेनानीः ग्रामणीः च स्तः । पुञ्जिकस्थला पुञ्जिकस्य पुञ्जीकृतस्य शौर्यस्फूर्तिसाहसराष्ट्रभक्त्यादिगुणसमूहस्य स्थला आधारभूता, क्रतुस्थला क्रतोः क्रियाशीलतायाः यज्ञभावनायाः बलिदानभावनायाश्च स्थला आधारभूता इत्याख्ये द्वे अप्सरसौ सेने स्तः । यद्वा द्वे अप्सरसौ सेना समितिश्च, **'सेना च तु ते समितिश्च',** श. ब्रा. 8.6.1.16 इति शातपथश्रुतेः । सेनायां शत्रुमारणाय गृहीताः दङ्क्षणवः दशनशीलाः पशवः हेतिः आयुधम्, पौरुषेयः पुरुषसम्बन्धी वधः हननं प्रहेतिः प्रकृष्टमायुधम्, यस्मिन्नायुधे मुक्ते परस्परमेव रिपवो घ्नन्ति स पौरुषेयो वधः **"यदन्योन्यं घ्नन्ति स पौरुषेयो वधः"**, श. ब्रा. 8.6.1.16 इति श्रुतेः । तेभ्यः पूर्वोक्तेभ्यः सर्वेभ्यः नमः राजकीयसम्मानः अस्तु । ते नः अवन्तु रक्षन्तु । ते नः मृडयन्तु सुखयन्तु । यं रिपुं वयं द्विष्मः, यः च नः अस्मान् द्वेष्टि तम् एषां पूर्वोक्तानां जम्भे निगडे दध्मः समर्पयामः ।

कर्मकाण्डे इदमादिभिः पञ्चकण्डिकाभिः पञ्चचूडेष्टका उपदधाति । तत्राधिदैवतव्याख्यापि शतपथे प्रस्तुता । तत्र हरिकेशः सूर्यरश्मिः अग्निः, तस्योक्तौ सेनानीग्रामण्यौ वासन्तिकौ ऋतू, अप्सरसौ दिक् च उपदिक् च इति माहित्थिराचार्यः, सेना च

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समितिश्चेति स्वमतम् । एवमग्रेऽपि व्याख्यातम् । अवशिष्टासु चतुःकण्डिकासु सम्पूर्ण-व्याख्यानं परिहरन्त एव केवलमप्सरोनामानि व्याख्यास्यामः ।

मेनका च सहजन्या च अप्सरसौ । सेनापक्षे मिनोति प्रक्षिपति शस्त्राणि रिपुषु इति मेनका, यद्वा मानयन्त्येनामिति मेनका सम्मानयोग्या । जनैः जनमण्डलैः सह विद्यमाना सहजन्या, एकैकस्यां सेनायां बहूनि जनमण्डलानि भवन्ति । अपरस्मिन् पक्षे मेनका दिक् सहजन्या, उपदिक्, यद्वा मेनका द्यौः सहजन्या पृथिवी, इमे एव अप्सरसौ ।, **'मेनका च सहजन्या चाप्सरसाविति । दिक् चोपदिशा चेति ह स्माह माहित्थिः, इमे तु द्यावापृथिवी'** (श. ब्रा. 8.6.1.17) इति ह श्रुतिः ।

प्रम्लोचन्ती च अनुम्लोचन्ती च अप्सरसौ । सेनापक्षे प्रम्लोचन्ती प्रकर्षेण म्लोचन्ती आक्रामन्ती शत्रून्, म्लुचु म्लुञ्चु गतौ, अनुम्लोचन्ती प्रम्लोचन्त्याः सेनायाः अनुपदं म्लोचन्ती आक्रामन्ती शत्रून् । अपरस्मिन् पक्षे प्रम्लोचन्ती दिक्, अनुम्लोचन्ती उपदिक्, यद्वा प्रम्लोचन्ती अहः प्रभा, अनुम्लोचन्ती रात्रिः । **"प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसाविति, दिक् चोपदिशा चेति ह स्माह माहित्थिः अहोरात्रे तु ते, ते हि प्र च म्लोचतोऽनु च म्लोचतः"** (श. ब्रा. 8. 6. 1. 18) इति वै श्रुतिः ।

विश्वाची च घृताची च अप्सरसौ । सेनापक्षे विश्वं सर्वं शत्रुदलम् अञ्चति व्याप्नोतीति विश्वाची । शत्रोः घृतं घृतादिकमैश्वर्यम् अञ्चति प्राप्नोति तत्सकाशादाच्छिनत्तीति घृताची । अपरस्मिन् पक्षे दिक् विश्वाची, उपदिक् घृताची । यद्वा वेदिः विश्वाची, स्रुग् घृताची । **'विश्वाची च घृताची चाप्सरसाविति । दिक् चोपदिशा चेति स्माह माहित्थिः । वेदिश्चतु ते स्रक् च, वेदिरेव विश्वाची स्रुग् घृताची'** (श. ब्रा. 8. 6. 1. 19) इति ह श्रुतिः ।

उर्वशी च पूर्वचित्तिश्च अप्सरसौ । **उर्वशी अप्सरा उरु अभ्यश्नुते, उरुभ्याम् अश्नुते, उरुर्वा वशोऽस्याः" इति निरुक्तम्** (निरु. 5. 13) । सेनापक्षे उरु बहु अभ्यश्नुते व्याप्नोति शत्रुदलम्, यद्वा उरुभ्यां विशालबाहुभ्यां विशालशस्त्रास्त्राभ्यां वा अश्नुते प्राप्नोति शत्रुम्, यद्वा उरुः बहुः वशः बलं यस्याः सा उर्वशी सेना । पूर्वचित्तिः पूर्वा श्रेष्ठा चित्तिः जागरूकता यस्याः सा सेना । अपरस्मिन् पक्षे दिग् उर्वशी, उपदिक् पूर्वचित्तिः । यद्वा आहुतिः उर्वशी, दक्षिणा पूर्वचित्तिः । **'उर्वशी च पूर्वचित्तिश्चाप्सरसाविति । दिक् चोपदिशा चेति ह स्माह माहित्थिः । आहुतिश्च तु ते दक्षिणा च'** (श. ब्रा. 8. 6. 1. 20) इति वै श्रुतिः ।

निन्दितार्थे गन्धर्वाप्सरसः

ऋग्वेदे वाजसनेयिमाध्यन्दिनयजुर्वेदे सामवेदे च निन्दितार्थे गन्धर्वशब्दो न प्रयुक्तः । अथर्ववेदे प्रशस्तार्थे निन्दितार्थे चापि प्रयुज्यते । निन्दितार्थे स्त्रीकामुका व्यभिचारिणो विलासिनः पुरुषा गन्धर्वपदेनोक्ताः, येषां नाशाय दूरीकरणाय वा संकल्पाः प्रार्थना वा क्रियन्ते । यथा—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वेवैकः कपिरिवैकः कुमारः सर्वकेशकः ।
प्रियो दृश इव भूत्वा गन्धर्वः सचते स्त्रिय-
स्तमिता नाशयामसि ब्रह्मणा वीर्यावता ॥

अथर्व 4. 37. 11

एकः गन्धर्वः स्त्रीकामुकः श्वा इव श्वाकृतिरिव जायते । एकः अन्यः कपिः इव वानराकृतिरिव सम्पद्यते । कश्चित् कुमारः कुमारावस्थ इव, कश्चित् सर्वकेशकः सर्वस्मिन् शरीरे कृत्रिमकेशयुक्त इव भवति । एतानि कृत्रिमाणि रूपाणि धृत्वा मुग्धा नारीः भीषयते । कश्चिद् दृशे दर्शनाय प्रिय इव प्रियः पतिरिव भूत्वा स्त्रियः परेषां योषितः सचते प्राप्नोति भोगाय । तं तादृशं स्त्रीकामुकं विलासिनं जनं वयं वीर्यावता अतिशयसामर्थ्ययुक्तेन ब्रह्मणा बलेन नाशयामसि विनाशयामः ।

आनृत्यतः शिखण्डिनो गन्धर्वस्याप्सरापतेः ।
भिनद्मि मुष्कावपि यामि शेपः ॥ अथर्व 4.37.7

आनृत्यतः परयोषितः प्रलोभयितुं नृत्यं कुर्वतः, शिखण्डिनः चूडाधारिणः, नृत्यकाले चञ्चन्त्यश्चूडा मुग्धा योषित आकर्षन्तु एतदर्थम् इति भावः, अप्सरापतेः रूपवत्याः स्त्रियाः पत्युः गन्धर्वस्य स्त्रीकामुकस्य दण्डनार्थं मुष्कौ अण्डकोशौ भिनद्मि विदारयामि, शेपः पुंस्प्रजननं च अपियामि बध्नामि । येन भीतास्ते पुनरेवं कर्त्तुनोत्सहन्ताम् ।

अथर्ववेदीयपृथिवीसूक्तेऽपि ये गन्धर्वा विलासिनः पुरुषा याश्च अप्सरसः विलासिन्यः स्त्रियः ताः दूरीकर्तुं राष्ट्रभूमिः प्रार्थ्यते—

ये गन्धर्वा अप्सरसो ये चारायाः किमीदिनः ।
पिशाचान्त्सर्वा रक्षांसि तानस्मद् भूमे यावय ॥

12.1.50

अप्सरसां विलासिनीत्वम् अस्पृहणीयत्वं चाधस्तने मन्त्रेऽपि चित्रितम्—

याः क्लन्दास्तमिषीचयोऽक्षकामा मनोमुहः ।
ताभ्यो गन्धर्वपत्नीभ्योऽप्सराभ्योऽकरं नमः ॥

2.2.5

याः क्लन्दाः परिणामे रोदयित्र्यः, क्रदि क्लदि आह्वाने रोदने च । तमिषीचयः तमिषीं ग्लानिम् उपचिन्वन्तीति ताः, तमु ग्लानौ इत्यस्माद् बाहुलकात् टिषच् प्रत्ययः । अक्षकामाः अक्षाणि इन्द्रियाणि आकृष्टुं कामयमानाः । मनोमुहः मनसो मोहयित्र्यश्च भवन्ति, ताभ्यः गन्धर्वपत्नीभ्यः विलासिजनभार्याभ्यः अप्सराभ्यः विलासिनीभ्यः स्त्रीभ्यः अहं नमः अकरं दूरत एव नमस्करोमि, ताः परित्यजामीत्यर्थः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथर्ववेदे निन्दितार्थे रोगकृमयोऽपि गन्धर्वा उक्ताः । यथा—

ये अम्नो जातान् मारयन्ति सूतिका अनुशेरते ।
स्त्रीभागान् पिङ्गो गन्धर्वान् वातो अभ्रमिवाजतु ॥

अथर्व 8. 6. 19

ये अम्नो जातान् अपरिपक्वान् गर्भान् मारयन्ति नाशयन्ति, सूतिकाः अभिनवप्रसवाः स्त्रियः अनुशेरते तासां योनिषु विद्यमाना भवन्ति, तान् स्त्रीभागान् स्त्रीणां शरीरेषु कृतवसतीन् रोगकृमीन् पिङ्गः गौरसर्षपः वातः वायुः अभ्रमिव मेघमिव अजतु दूरं प्रक्षिपतु ।

शतमहं दुर्णाम्नीनां गन्धर्वाप्सरसां शतम् ।
शतं शश्वन्तीनां शतवारेण वारये ॥

अथर्व 19. 36. 6

अहं दुर्णाम्नीनां दुरभिधानानां श्वित्रवदद्रूपामादीनां व्याधीनां शतम्, गन्धर्वाप्सरसां पुंस्त्रीभेदेन भिन्नानां रोगकृमिविशेषाणां च शतम्, शश्वन्वतीनां वंशपरम्परया प्राप्तानां सनातनानां रोगाणां च शतं शतवारेण एतदाख्येन औषधेन वारये निवारयामि ।

त्वया वयमप्सरसो गन्धर्वाश्चातयामहे ।
अजशृङ्ग्यज रक्षः सर्वान् गन्धेन नाशय ॥

अथर्व 4. 37. 2

हे अजशृङ्गि ओषधि, त्वया त्वत्साहाय्येन वयम् अप्सरसः अप्सु जलेषु जलप्रचुरेषु वा स्थलेषु सरन्तीति ताः स्त्रीरोगकृमीन्, गन्धर्वान् गोषु भूस्थलेषु स्वात्मनो धरन्तीति तान् भूमिशयान् पुंरोगकृमींश्च चातयामहे विनाशयामः । त्वं रक्षः रोगराक्षसम् अज दूरं प्रक्षिप । सर्वान् रोगकृमीन् त्वं स्वकीयेन गन्धेन नाशय ।

गन्धर्वाप्सरसो रोगकृमयः केचिद् उन्मादमपि जनयन्ति । यथोक्तं तैत्तिरीये- **गन्धर्वाप्सरसो वा एतमुन्मादयन्ति य उन्माद्यति** (तै. 3.4.8.4) इति ।

उपसंहारः

तदेवं गन्धर्वाप्सरोविषये विचारेण ज्ञायते यद् वैदिकसंहितासु गन्धर्वाप्सरःशब्दौ प्रायेण प्रशस्तार्थे क्वचिदेव च निन्दितार्थे प्रयुज्येते । गन्धर्वशब्दः प्रशस्तार्थे परमात्मा, जीवात्मा, प्राणः, मनः, सूर्यः, सूर्यरश्मयः, चन्द्रः, मेघः, वायुः, अग्निः, यज्ञः, इन्द्रः, सोमः, नक्षत्राणि, विद्वान्, पतिः, राष्ट्रभृतः, कर्षकः, गायकः इत्येतान् प्रमुखार्थान् वक्ति । अप्सरसो गन्धर्वाणां पत्न्यः पत्नीवत् सहचर्यो वा सन्ति, क्वचिच्च स्वतन्त्रार्थवाचिन्योऽपि । वाजसनेयिमाध्यन्दिनयजुःसंहितायां तैत्तिरीयसंहितायां च अग्निः-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओषधयः, सूर्यः–मरीचयः, चन्द्रमाः–नक्षत्राणि, वातः–आपः, यज्ञः–दक्षिणा, मः–न ऋक्सामानि, पर्जन्यः–विद्युतः, मृत्युः–प्रजाः, कामः–आधयः इत्येतानि परस्परं गन्धर्वाप्सरसः प्रोक्ताः । एतदतिरिक्तं परमात्मा–प्रकृतिः, जीवात्मा–तनूः, प्राण-रयिः, इन्द्रियाणि-इन्द्रियवृत्तयः, राजा-प्रजाः, सेनापतिः-सेनाः, पुरुषाः–स्त्रियः, अग्निः-पृथिवी, अन्तरिक्षं-विद्युत्, सूर्यः-द्यौः, आदित्यः–उषसः इत्याद्या अपि परस्परं गन्धर्वाप्सरस्त्वेन वेदेषु ग्रहीतुं शक्यन्ते । अप्सरः–शब्दस्य मरीचीनाम्, ओषधीनां, विद्युताम्, अपाम्, अधीनाम्, उषसां, सेनानां, राष्ट्रसंस्थानां, स्त्रीणां च वाचकत्वमत्र वेदमन्त्रोद्धरणपूर्वकं तद्व्याख्यानपुरस्सरं च प्रमाणीकृतम् । वेदमन्त्रेषु गन्धर्वाप्सरसोः क्वचिदेकतरस्यैवोल्लेखः क्वचिच्चोभयोः सहचारिरूपेणेत्यपि प्रदर्शितम् । अप्सरसां नामान्यपि व्याख्यातानि । निन्दितार्थे गन्धर्वाप्सरसः क्वचिद् विलासिकामुकपुरुषस्त्री-रूपेण, क्वचिच्च रोगकृमिरूपेणोपलभ्यते ।

गन्धर्वाप्सरसां कश्चिद् योनिविशेषः, गन्धर्वा अन्तरिक्षनिवासिनः, स्त्रीकामाः, भूतावेशेन स्त्रियो वशीकृत्य मोहयन्ति, तेषामन्तरिक्षे गन्धर्वनगरं, ते गीतवादित्रप्रियाः, द्यूतप्रियाः, अन्तरिक्षात् समागत्य प्रजाः पीडयन्ति-इत्यादयः परवर्तिविचाराः सायणा-दिभिर्भाष्यकारैर्वेदेष्वपि समारोपिताः । तत्र सुधीभिर्नीरक्षीरविवेकः स्वयमेव विधेयः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५. पतङ्गः

शब्दार्थकोशेषु पतंगशब्दः सूर्य-पक्षि-शलभ-शालि-वह्नि-मार्जार-मधुमक्षिका-कन्दुक-स्फुलिंग-तुरग-दैत्य-पारद-चन्दनाद्यर्थेषु परिगणितः[1] । वैयाकरणसम्प्रदाये **'पतेरङ्गच् पक्षिणि,** उ. 1.119' इत्युणादिसूत्रेण पतधातोरङ्गच्प्रत्यये शब्दोऽयं सिध्यति ।[2] केचित्तु 'पतन् गच्छतीति पतङ्गः इति व्युत्पत्त्या 'पृषोदरादीनि यथोपदिष्टम्' (पा. 6.3.119) इति न्यायेन साधयन्ति । वेदेष्वपि 'पतयन्तं पतङ्गम् ऋग् 1.163.6,' 'पतयन् पतङ्गः अथर्व 13.2.31,' इति पतधातोरस्य निष्पत्तिः सूचिता ।

वैदिकसंहितासु भाष्यकारैः पतङ्गशब्दो विविधार्थेषु स्वीकृतः । तद यथा— आत्मा (परमात्मा जीवात्मा च), प्राणः, अग्निः, सूर्यः, भूमण्डलं, पक्षी, मेघः, विस्फुलिंगः, रथः, अश्व., राक्षसः, शलभ इति ।

आत्मा प्राणश्च

पतङ्गमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः ।
समुद्रे अन्तः कवयो विचक्षते मरीचीनां पदमिच्छन्ति वेधसः ॥

ऋग् 10.177.1

असुरस्य प्रकृतिमध्याद् जगदसनशीलस्य सर्वोत्पादकस्य परमात्मनः मायया संचित-जीवकर्मसंस्कारफलप्रदानरूपनियमेन अक्तं देहे समागतम्, अञ्जू व्यक्तिम्रक्षण-कान्तिगतिषु, पतंङ्गं पतति शुभाशुभकर्मानुसारेण विविधयोनिषु इति पतंगः, यद्वा पतति प्रवर्तते विविधपुरुषार्थेषु स पतंगो जीवात्मा तम्, विपश्चितः मेधाविनो जनाः हृदा हृदयेन मनसा बुद्धया च पश्यन्ति साक्षात् कुर्वन्ति । कवयः विप्रास्ते तम् समुद्रे अन्तः विज्ञानमयकोषाभ्यन्तरे विचक्षते विविधतया पश्यन्ति । वेधसः कर्मणां विधातारस्ते मरीचीनां ज्ञानरश्मीनाम् अन्तःप्रकाशकिरणानां वा पदम् अधिष्ठानभूतं तं जीवात्मानम् इच्छन्ति कामयन्ते इति त्रैतवादमधिकृत्य व्याख्यानम् ।

---

1. 'पतंगः शलभे शालिप्रभेदे पक्षिसूर्ययोः ।' मेदिनी 3.42, 'पतंगः शलभे शालौ मार्जारेऽग्नौऽरवौ खगे ।' वैजयन्ती 7.1.40 ।
   पतंगः 1. A bird. 2. The Sun, 3. moth, locust or grass-hopper, 4. A bee, 5. A ball for playing with, 6 A spark 7. A devil, 8. Quicksilver, 9. Name of Krsna, 10 A horse, 11. A species of rice, पतंगम् 1. Quicksilver, 2. A kind of sandal Wood.—(Sanskrit--English Dictionary by V. S. Apte.)
2. पक्षिण्यभिधेये पतधातोरङ्गच् प्रत्ययो भवति । पतति गच्छतीति पतङ्गः पक्षी । पक्षिणीत्युच्यमानेऽपि बाहुलकात् 'पतङ्गः सूर्योऽग्निरश्वः शलभः शालिभेदो वा' इत्यादीनामपि नामानि भवन्ति । इत्युणादिकोशव्याख्याने दयानन्दः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सायणस्तु अद्वैतवादमङ्गीकृत्य व्याचष्टे—"मायया अक्तं जीवरूपेणाभिव्यक्तम् आत्मानं विपश्चितो वेदान्ताभिज्ञा हृत्स्थेनान्तर्मुखेन मनसा पतङ्गम् पतति व्याप्नोतीति पतङ्गः परमात्मा, तं पश्यन्ति, उपाधिपरित्यागेन जीवात्मनः परमात्मना तादात्म्यं साक्षात्कुर्वन्तीत्यर्थः । अपि च ते कवयः क्रान्तदर्शिनो वेदान्ताभिज्ञा समुद्रे समुद्द्रवन्त्यस्माद भूतानीति समुद्रः परमात्मा, तस्मिन्नधिष्ठानभूतेऽन्तर्मध्ये सर्वं दृश्यजातम् अध्यस्तत्वेन वि चक्षते विपश्यन्तीति । अतो दृग्व्यतिरिक्तस्य सर्वस्य मिथ्यात्वाद् वेधसो विधातारस्ते मरीचीनां वृत्तिज्ञानानां पदमधिष्ठानभूतं सच्चित्सुखात्मकं यत् परं ब्रह्म तदेवेच्छन्ति । तद्भावप्राप्तिमेव कामयन्ते ।" इति [3] ।

जैमिनीयोपनिषद् ब्राह्मणे मन्त्रोऽयं प्राणपरतया व्याख्यातः—"पतङ्गमक्तमिति । प्राणो वै पतङ्गः । पतन्निव ह्येष्वङ्गेष्वति रथमुदीक्षते, पतङ्ग इत्याचक्षते । असुरस्य मायेति मनो वा असुरम्, तद्धि असुषु रमते, तस्यैष मायया अक्तः । हृदा पश्यन्ति मनसा विपश्चित इति । हृदैव ह्येते पश्यन्ति यन्मनसा विपश्चितः । समुद्रे अन्तः कवयो विचक्षत इति । पुरुषो वै समुद्र एवंविद उ कवयः । त इमां पुरुषेऽन्तर्वाचं विचक्षते । मरीचीनां पदमिच्छन्ति वेधस इति । मरीच्य इव वा एता देवता यदग्निर्वायुरादित्यश्चन्द्रमाः । न ह वा एतासां देवतानां पदमस्ति । पदेनो ह वै पुनर्मृत्युरन्वेति । तदेतदनन्वितं साम पुनर्मृत्युना । अति पुनर्मृत्युं तरति य एवं वेद (जै. उ. ब्रा., अनु, 6, खण्ड 7) ।"

तस्यैषाऽपरा भवति—

पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद् गर्भे अन्तः ।
तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो निपान्ति ॥

ऋग् 10.177.2

पतङ्गः पूर्वव्युत्पत्त्या जीवात्मा वाचं वाणीं मनसाऽन्तःकरणेन बिभर्ति धारयति । गन्धर्वः गां वाचं धरतीति तादृशः स गर्भे अन्तः मनोगर्भाभ्यन्तरे तां वाचम् अवदत् ब्रूते, मनसा शब्दैः चिन्तयतीत्यर्थः । द्योतमानां विज्ञानेन दीप्यमानां स्वर्यं स्वरमयीं मनीषां मनसा प्रेरितां तां वाचं कवयः ऋतम्भराप्रज्ञायुक्ता मेधाविनः ऋतस्य सत्यस्य पदे लक्ष्ये निपान्ति रक्षन्ति योजयन्तीति यावत् । सत्यजीवनयुक्तास्ते वाचा सत्यं प्रचारयन्तीत्यर्थः ।

सायणः परमात्मपरं व्याचष्टे—"पतङ्गः सर्वोपाधिशून्यो व्याप्तः परमात्मा । स सृष्ट्यादौ वाचं मनसा बिभर्ति, कानि कानि प्रष्टव्यानीति पर्यालोचनेन मनसा सकलार्थप्रतिपादकं वेदं परामृष्टवानित्यर्थः । स्मर्यते हि—'वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः' इति । गर्भे हिरण्मये ब्रह्माण्डेऽन्तर्वर्तमानो गन्धर्वो हिरण्यगर्भस्तां वाचमवदत्

3. सायणेन विकल्पतया मन्त्रोऽयं सूर्यपरोऽपि व्याख्यातः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथममुच्चारितवान् । द्योतमानत्वादिगुणविशिष्टां तां वाचं कवयः क्रान्तदर्शिनो देवा ऋतस्य सत्यस्य ब्रह्मणः पदे स्थाने नि पान्ति निभृतं रक्षन्ति" इति ।[4]

जैमिनीयोपनिषद्ब्राह्मणं त्वत्रापि पतङ्गं प्राणपरं व्याख्याति—**"पतङ्गो वाचं मनसा बिभर्तीति । प्राणो वै पतङ्गः, स इमां वाचं मनसा बिभर्ति । तां गन्धर्वोऽवदद् गर्भे अन्तरिति । प्राणो वै गन्धर्वः पुरुष उ गर्भः । स इमां पुरुषेऽन्तर्वाचं वदति । तां द्योतमानां स्वर्यं मनीषामिति स्वर्या ह्येषा मनीषा यद् वाक् ऋतस्य पदे कवयो निपान्तीति । मनो वा ऋतमेवंविद उ कवयः । ओमित्येतदेवाक्षरम् ऋतम् । तेन यद् ऋचम् मीमांसन्ते यद् यजुर्यत् साम तदेनां निपान्ति** (जै. उ. ब्रा. 6. 8)" इति ।

सूर्यः अग्निः भूमण्डलं जीवात्मपरमात्मानौ च

त्रिंशद् धाम विराजति वाक् पतङ्गाय धीयते ।
प्रति वस्तोरह द्युभिः ॥[5]

ऋग् 10. 189. 3, यजु 3. 8,
साम 632, 1378, तै. 1. 5. 3. 1

ऋग्वेदे सार्पराज्ञी आत्मदैवतं सौर्यं वा । यजुषि अग्निदैवतम् तथा च कर्मकाण्डे आहवनीयाग्न्युपस्थानेऽस्य विनियोगः ।

सूर्यपरं तावत्—यः पतङ्गः सूर्यः[6] अह इति विनिश्चये द्युभिः स्वदीप्तिभिः प्रति वस्तोः प्रत्यहं त्रिंशद् धाम प्रतिमासं त्रिंशत्सु दिवसाख्येषु धामसु यद्वा अहोरात्रस्य त्रिंशन्मुहूर्तेषु विराजति विशेषेण दीप्यते, तस्मै पतङ्गाय सूर्याय वाग् वाणी धीयते प्रयुज्यते, वाचा तद्गुणा वर्ण्यन्ते इति भावः ।

अथ अग्निपरम्—या वाक् त्रिंशद् धाम[7] अहोरात्रस्य त्रिंशत्सु मुहूर्तेषु सर्वकालमिति यावत्, विराजति प्रकटरूपेण मनसि प्रसुप्तरूपेण वा वर्तमाना भवति सा वाक् पतङ्गाय स्वज्वालाभिरितस्ततः उड्डयमानाय यज्ञाग्नये[8] प्रति वस्तोः प्रतिदिनं द्युभिः प्रभाते सायं च सूर्यकिरणैः साकं धीयते उच्चार्यते । यज्ञे अग्नये वाचा मन्त्राः पठ्यन्ते इति यावत् ।

---

4. सायणः प्रथममन्त्रवद् विकल्पतया मन्त्रमेतं सूर्यपरमपि व्याचख्यौ ।
5. अथर्ववेदे त्वयं पाठः—त्रिंशत् धामा वि राजति वाक् पतङ्गो अशिश्रियत् ।
   प्रति वस्तोरह द्युभिः ॥ अथर्व 6.31.3, 20.47.6
6. 'पतति गच्छतीति पतङ्गः सूर्यः'—सायणः ।
7. (यः अग्निः) त्रिंशत् पृथिव्यादीनि त्रयस्त्रिंशतो वस्वादीनां देवानां मध्ये पठितानि अन्तरिक्षमादित्यमग्निं च विहाय त्रिंशत्संख्याकानि धाम दधति येषु तानि धामानि····वि विशेषार्थे राजति प्रकाशयति अत्रान्तर्गतो ण्यर्थः—इति दयानन्दः ।
8. "पतन् गच्छतीति पतङ्गः अग्निः । स ह्यरण्योः पतन् गार्हपत्यभावं गच्छति, गार्हपत्यात् पतन्नाहवनीयतामित्यादि"—महीधरः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथापि ऋचोऽस्याः प्रोक्तासु देवतासु सर्पराज्ञ्या अपि पाठात् पृथिवीपरमपि योजनीयम् । सर्पराज्ञी पृथिवी **'इयं वै पृथिवी सर्पराज्ञी,** श. ब्रा. 2. 1. 4. 30' इति स्मरणात् । पतति गच्छति भ्रमति स्वधुरि सूर्यं परितश्च यः स पतङ्गो भूमण्डलम् । यः पतङ्गः यद् भूमण्डलम् प्रति वस्तोः प्रत्यहं द्युभिः सूर्यकिरणैः त्रिंशद् धाम दिवसस्य त्रिंशद् घटिकाः एतावन्तं कालमिति यावत्, अत्यन्तसंयोगे द्वितीया, विराजति विशेषेण दीप्यते, तस्मै पतङ्गाय भूमण्डलाय तद्गुणान् वर्णयितुं वाग् धीयते व्यापार्यते ।

अथ आत्मदेवत्वात् परमात्मपरमपि व्याख्यातव्यम् । पतति व्याप्नोति सर्वं जगदिति पतङ्गः परमात्मा । यः त्रिंशद् धाम त्रिंशत्सु धामसु, पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च प्राणाः अन्तःकरणचतुष्टयम् आत्मा भूर्भुवः स्वरादयः सप्त लोकाः भूतभविष्यवर्तमानास्त्रयः कालाः एतानि त्रिंशद् धामानि तेषु प्रति वस्तोः प्रत्यहं द्युभिः स्वतेजोभिः विराजति सदैव सर्वज्ञतया सर्वव्यापकतया च विद्यमानो भवति तस्मै पतङ्गाय परमात्मने अस्माभिः वाक् स्तोत्रं धीयते पुरतः स्थाप्यते उच्चार्यते इति यावत् ।

अथ जीवात्मपरमपि व्याख्यायते । यः पतङ्गो जीवात्मा त्रिंशद् धाम अहोरात्रस्य त्रिंशन्मुहूर्तेषु सर्वदैवेत्यर्थः विराजति राष्ट्रे सम्राडिव देहे विशेषेण महिमानमाप्नोति तस्मै पतङ्गाय जीवात्मने प्रतिवस्तोः प्रतिजन्म द्युभिः द्योतमानैर्मनोबुद्धिप्राणेन्द्रियादिभिः साकं वाक् व्याहरणार्थं वाणी धीयते प्रदीयते इति ।

सूर्य पक्षी च

अथ सूर्यस्यैषाऽपरा भवति ।

रोचसे दिवि रोचसे अन्तरिक्षे पतङ्ग पृथिव्यां रोचसे रोचसे अप्स्वन्तः ।
उभा समुद्रौ रुच्या व्यापिथ देवो देवासि महिषः स्वर्जित् ॥

अथर्व 13. 2. 30

हे पतङ्ग सूर्य, त्वं दिवि द्युलोके रोचसे दीप्यसे, अन्तरिक्षे मध्यलोके रोचसे पृथिव्यां भूम्यां रोचसे, अप्सु अन्तः उदकाभ्यन्तरे रोचसे । रुच्या स्वकान्त्या त्वम् उभा उभौ द्वावपि समुद्रौ सागरौ—पार्थिवसमुद्रम् अन्तरिक्षसमुद्रं मेघं चेत्यर्थः—व्यापिथ व्याप्नोषि । हे देव प्रकाशमान सूर्य, त्वं देवः सर्वेषां ग्रहोपग्रहादीनां प्रकाशकः, महिषः परिमाणतो महिमतो वा महान् स्वर्जित् अस्माकं कृते सुखस्य जेता चासि ।

अत्र पक्षिपरोऽप्यर्थोऽन्तर्निहितः । प्राक् पक्षिणमभिधेयं मत्वा प्रहेलिकासौन्दर्यमत्र प्रस्फुटति । एतादृशः कश्चित् खगोऽस्ति यो हि दिव्यन्तरिक्षे पृथिव्यामप्सु उभयोः समुद्रयोश्च रोचते, कदाचिन्महिषस्य रूपमप्यङ्गीकरोतीति प्रहेलिका । तस्येदमुत्तरम् अयं पक्षी सूर्य इति । अस्मिन्नेव सूक्ते सूर्योऽयं साक्षात्पक्षिशब्देनाप्यभिहितः—**ज्योतिष्मान् पक्षी महिषो वयोधा विश्वा आस्थात् प्रदिशः कल्पमान** (अथर्व 13.2.33) इति ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जलस्थलान्तरिक्षयानम्

तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतङ्गैः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षडश्वैः ॥

ऋग् 1. 116. 4

अतः पूर्वस्मिन् मन्त्रे सायण इमामाख्यायिकामाह—"**तुग्रो नाम अश्विनोः प्रियः कश्चिद् राजर्षिः । स च द्वीपान्तरवर्तिभिः शत्रुभिरत्यन्तमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत् । सा च नौः मध्येसमुद्रम् अतिदूरं गता वायुवशेन भिन्ना आसीत् । तदानीं स भुज्युः शीघ्रम् अश्विनौ तुष्टाव । तौ च स्तुतौ सेनया सहितम् आत्मीयासु नौषु आरोप्य पितुस्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति । अयमर्थः इदमादिकेन तृचेन प्रतिपाद्यते**" इति ।

नैरुक्तपक्षे तु तुञ्जयति हिनस्ति शत्रून्, बलवान् भवति, आदत्ते सर्वं धनादिकं, निकेतयति वासयति प्रजाम् इति तुग्रः राष्ट्रस्य राजा, तुजि हिंसाबलादाननिकेतनेषु भुजं भोगं भोग्यपदार्थान् कामयते इति भुज्युः देशान्तराद् व्यापारकुशलो वणिक् । अश्नुवाते अध्वानम् इत्यश्विनौ यानचालकौ । तावेव नासत्यौ, "**सत्यावेव न असत्यौ इत्यौर्णवाभः, सत्यस्य प्रणेतारौ इत्याग्रायणः,**" इति निरुक्तम् (6. 13) । यानचालकौ हि सत्यमार्गमेवानुसरतः, दिग्भ्रमेण तु यात्रिणां संकटापत्तेः, । राष्ट्रस्य राजा स्वराष्ट्रस्य विक्रेयवस्तूनि परराष्ट्रं नेतुं, परराष्ट्राच्च स्वराष्ट्रोपयोगीनि वस्तूनि स्वराष्ट्रे समानेतुं वाणिज्यपटुं जनं पारेसमुद्रं प्रेषयति । पतङ्गरथाः जलस्थलान्तरिक्षयानानि तत्र साधनत्वं व्रजन्ति ।

अथ मन्त्रार्थः । हे नासत्या नासत्यौ सत्यमार्गेण यानचालकौ, युवां भुज्युं भोग्यपदार्थसंग्रहीतारं वणिजं तिस्रः क्षपः त्रिसंख्याका रात्रीः त्रिः अहा त्रिवारमावृत्तानि अहानि च अतिव्रजद्भिः अतिव्याप्य निरन्तरं गच्छद्भिः शतपद्भि शतसंख्याककीलकलायन्त्रोपेतैः षडश्वैः षड् अश्वाः अश्वस्थानीया आशुगमका यन्त्रविशेषा येषु तैः त्रिभिः त्रिसंख्याकैः पतङ्गैः रथैः शीघ्रगमनशीलैः पतङ्गाख्यैः जलस्थलान्तरिक्षयानैः समुद्रस्य अन्तरिक्षस्य, **समुद्र इत्यन्तरिक्षनामसु पठितम्** (निघं. 1. 3), धन्वन् धन्वनः मरुप्रदेशस्य, आर्द्रस्य जलेनार्द्रीभूतस्य पार्थिवसमुद्रस्य च पारे ऊहथुः प्रापयामासथुः ।

अत्रेदं सायणभाष्यम्—"**हे नासत्यौ सेनया सह उदके निमग्नं भुज्युं तिस्र क्षपः त्रिसंख्याका रात्रीः त्रिरहा त्रिवारमावृत्तान्यहानि च अतिव्रजद्भिः अतिक्रम्य गच्छद्भिरेतावन्तं कालमतिव्याप्य वर्तमानैः पतङ्गैः[9] पतद्भिः त्रिभिः त्रिसंख्याकैः रथैः ऊहथुः युवामूढवन्तौ । क्वेति चेत् ? उच्यते । समुद्रस्थ अम्बुराशेर्मध्ये धन्वन् धन्वनि जनवर्जिते प्रदेशे आर्द्रस्य उदकेनार्द्रभूतस्य समुद्रस्य पारे तीरदेशे च कथंभूतै रथैः ? शतपद्भिः शतसंख्याकैश्चक्रलक्षणैः पादैरुपेतै षडश्वैः षड्भिरश्वैर्युक्तैः**" इति ।

9. स्कन्दस्वामिवेङ्कटमाधवौ तु पतङ्गैः अश्वैः त्रिभिः रथैश्चेति व्याचक्षाते ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथात्र स्वामिदयानन्दीयं भाष्यमुद्धियते—

पुनस्तमेव विषयम् (नौकादिनिर्माणविद्याम्) आह ।

पदार्थः—**(तिस्रः) त्रिसंख्याकाः (क्षपः) रात्रीः (त्रिः) त्रिवारम् (अहा)** त्रीणि दिनानि (अतिव्रजद्भिः) अतिशयेन गमयितृभिः [द्रव्यैः?] (नासत्या) सत्येन परिपूर्णौ (भुज्युम्) राज्यपालकम् (ऊहथुः) प्राप्नुतम् (पतङ्गैः) अश्ववद्वेगिभिः (समुद्रस्य) सम्यग् द्रवन्त्यापो यस्मिन् तस्यान्तरिक्षस्य (धन्वन्) धन्वनो बहुसिकतस्य स्थलस्य (आर्द्रस्य) षपङ्क्तस्य सागरस्य (पारे) परभागे (त्रिभिः) भूम्यन्तरिक्षजलेषु गमयितृभिः (रथैः) रमणीयैर्विमानादिभिर्यानैः (शतपद्भिः) शतैर्गमनशीलैः पादवेगैः (षडश्वैः) षट् अश्वा आशुगमकाः कलायन्त्रस्थितिप्रदेशा येषु तैः ।

अन्वयः—हे नासत्या सभासेनापती, युवां तिस्रः क्षपस्त्र्यहा दिनान्यतिव्रजद्भिः पतङ्गैः [सहयुक्तैः ?] षडश्वैः शतपद्भिस्त्रिभी रथैर्भुज्युं समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिरूहथुर्गमयेतम् ।

भावार्थः—अहो मनुष्या यदा त्रिष्वहोरात्रेषु समुद्रादिपारावारं गमिष्यन्त्यागमिष्यन्ति तदा किमपि सुखं दुर्लभं स्थास्यति ? न किमपि ।

मेघाः

तिस्रः क्षपस्त्रिरहेति मन्त्रः कृष्णयजुर्वेदीयतैत्तिरीयारण्यकेऽप्युद्धृतः (तै. आ. 1. 10. 3) । सायणो मेघपरं व्याचष्टे—**"नासत्या असत्यरहितौ अश्विनौ देवौ, तिस्रः क्षपो रात्रित्रयं त्रिरहा अहस्त्रयं च नैरन्तर्येण अतिव्रजद्भिरतिशयेन गच्छद्भिः पतङ्गैः पक्षिसदृशैरितस्ततः संचारिभिर्मेघैर्भुज्युं पालकं जलसमूहम्[10] ऊहथुर्युवां वहथः । कुत्र देश इति ? तदुच्यते आर्द्रस्य जलपूर्णस्य समुद्रस्य पारे परभागे धन्वन् निर्जले मरुदेशे । कीदृशैर्मेघैः ? त्रिभिः तत्तद्देशमनुसृत्योत्तममध्यमाधमभावेन त्रिविधैः । रथैः रथसदृशैः, यथा रथा उपरि महान्तं भारं वहन्ति तथा बहुजलभारवाहिन इत्यर्थः । शतपद्भिः शतसंख्याकाः पदो जलधाराः पादसदृशा येषां तादृशैः, अनन्तधारैरित्यर्थः । षडश्वैः षट्प्रकारव्याप्तियुक्तैः । उत्तमादीनां त्रयाणामागमनार्थास्तिस्रो व्याप्तयः पुनर्गमनार्थास्तिस्र इत्येवं षड्विधव्याप्तयः"** इति ।

अश्वाः

अश्वा अपि पतङ्गा उच्यन्ते । तथा च निघण्टौ **पतङ्गा इत्यश्वनामसु पठितम्** (निघं. 1. 14) । तेषामेषा भवति—

आ वां श्येनासो अश्विना वहन्तु रथे युक्तासो आशवः पतङ्गाः ।
ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति ॥

ऋग् 1. 118. 4

---

10. अत्रेदमवधेयम्, ऋग्भाष्ये सायणो भुज्युम् ऐतिहासिकव्यक्तिविशेषं स्वीकरोति, परमत्र नैरुक्तपद्धतिमनुसृत्य जलसमूहार्थे तं गृह्णाति ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्विनौ देवता । हे नासत्या नासत्यौ सत्यौ एव न असत्यौ सत्यनियमपालकौ इति यावत् अश्विनौ, रथे याने युक्तासः नियुक्ताः श्येनासः श्येनवेगाः आशवः मार्गं व्याप्नुवन्तः पतङ्गाः अश्वाः वाम् युवाम् आवहन्तु स्थानान्तरं नयन्तु, अप्तुरः आपः उदकानीव त्वरमाणाः, दिव्यासः गृध्राः न आकाशे उत्पतन्तः गृध्रपक्षिण इव वायुवेगेन गच्छन्तः ये पतङ्गाः अश्वाः प्रयः अभि लक्ष्यं प्रति वहन्ति प्रापयन्ति ।

अश्विनौ हि प्रतिक्षेत्रं भिन्नौ । अधिदैवतं द्यावापृथिव्यौ, सूर्याचन्द्रमसौ, अहोरात्रौ, उषःसूर्यौ इत्यादि । अध्यात्मं प्राणापानौ, चक्षुःश्रोत्रे, वाङ्मनसी जीवात्मपरमात्मानौ इत्यादि । अधिभूतं सभासेनाधीशौ, राजप्रजे, स्त्रीपुरुषौ, अध्यापकोपदेशकौ, यानचालकौ सारथी इत्यादि ।

स्वामिदयानन्दस्तु मन्त्रेऽस्मिन् स्त्रीपुरुषौ, इत्यर्थं गृह्णाति । रथश्च तन्मते विमानादियानं, तत्र नियुक्ता आशवः पतङ्गाश्च शीघ्रगामिनोऽश्वा इवाग्न्यादयः । भावार्थेऽ सौ लिखिति—"**अत्रोपमालङ्कारः । हे स्त्रीपुरुषाः, यथाकाशे स्वपक्षाभ्यामुड्डीयमाना गृध्रादयः पक्षिणः सुखेन गच्छन्त्यागच्छन्ति तथैव यूयं सुसाधितैर्विमानादिभिर्यानैरन्तरिक्षे गच्छतागच्छत**" इति ।

विस्फुलिङ्गाः

अग्नेर्विस्फुलिङ्गा अपि पतङ्गा उच्यन्ते । तदभिवादिन्येषर्ग् भवति—

तव भ्रमास आशुया पतन्ति अनु स्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतङ्गानसंदितो वि सृज विष्वगुल्काः ॥

ऋग् 4.4.2, वा. यजुः 13.10

"**हे अग्ने, तव सम्बन्धिनः भ्रमासः भ्राम्यन्तः आशुया शीघ्रगतयो रश्मयः पतन्ति सर्वतः प्रसरन्ति । शोशुचानः भृशं दीप्यमानस्त्वं धृषता अभिभवसमर्थेन तेजःसंघेन शत्रून् अनुक्रमेण स्पृश दह । दहनोपायं दर्शयति । असंदितः परैरनिरुद्धस्त्वं तपूंषि तापकानि तेजांसि पतङ्गान् पतनशीलान् विस्फुलिङ्गान् उल्काः च इत्येतत् त्रितयं जुह्वा हूयन्तेऽस्यामाहुतय इति जुहूर्ज्वाला तया विष्वक् सर्वतः वि सृज प्रसारय**" इति ऋग्वेदभाष्ये सायणः ।"

पिशाचाः

महीधरस्तु मन्त्रमेतम् उवटमनुसरन्—"**तैर्भ्रमैः तपूंषि तपन्ति संतापयन्ति तानि तपूंषि तापयितृणि रक्षांसि पतङ्गान् पतन्तः सन्तो गच्छन्तीति पतङ्गाः पिशाचास्तांश्चानुस्पृश, ज्वालाभिस्तान् दहेत्यर्थः**' इति व्याचख्यौ ।[11] अग्ने

11. ग्रिफिथमतेऽत्र पतङ्गा अग्नेः पक्षिवदुड्डयनशीला ज्वालाः ।
Spread with thy tongue the winged flames.—Griffith

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्षःपिशाचयातुधानादिसंहरणम् अन्यत्राप्युक्तम् । यथास्मिन्नेव सूक्ते मन्त्रान्तरेषु— **विध्य रक्षसस्तपिष्ठैः** (मन्त्रः 1 मः), **न्यङ्मित्रो ओषतात् तिग्महेते** (मन्त्रः 4 थः), **अवाधिरा तनुहि यातुजूनाम्** (मन्त्रः 5 मः), **दहाशसो रक्षसः पाह्यस्मान्** (मन्त्रः 15श:) । अपरत्र यथा—"**अयोदंष्ट्रो अर्चिषा यातुधानानुपस्पृश जातवेदः समिद्धः,**' '**अग्ने त्वचं यातुधानस्य भिन्धि**', **त्रेधा मूलं यातुधानस्य वृश्च**', '**यातुधानस्य रक्षसो बलं विरुज वीर्यम्** (ऋग् 10.87.2,5, 10,25) । उक्तश्चायं रक्षोहाऽग्निरिति । रक्षःपिशाचयातुधानादिसंज्ञिता एतेऽध्यात्मम् कामक्रोधलोभमोहादय आधिव्याधयो वा, अधिदैवतम् अतिवृष्ट्यनावृष्टिदुर्भिक्षभूकम्पादयः, अधिभूतं च दुष्टदुर्जनादय उत्कोचतस्करव्यापारवञ्चनलुण्ठनाद्याः समाजे कृतपदा दुष्प्रवृत्तयो वा । अग्निश्च यज्ञाग्निः, अग्रणी राष्ट्रवीरो वा ।

शलभः

शलभोऽपि पतङ्ग उच्यते । तस्यैषा भवति—

तर्द ह्यै पतङ्ग ह्यै जभ्य ह्या उपक्वस ।
ब्रह्मेवासंस्थितं हविरनदन्त इमान् यवानहिंसन्तो अपोदित ॥

अथर्व 6.50.2

अत्र यवादिकृष्यै हानिप्रदा जन्तवः क्षेत्रेभ्योऽपसार्यन्ते । तर्द इति पूर्वस्मिन् मन्त्रे आखोर्विशेषणम् '**हतं तर्दं समङ्क्ष्माखुम्**' इति तर्द हिंसायाम् । है तर्द हे हिंसक आखो, है पतङ्ग हे शलभ, है जभ्य, जभि नाशने, कृषिविनाशकत्वात् कृषीबलानां हिंस्य जन्तुविशेष, हे उपक्वस, क्वसतिरत्र दहतिकर्मा 'अपक्वसः' इति—पाठं मत्वा 'अदग्धाः सन्तः' इति सायणीयव्याख्यानात्, यः उपेत्य क्वसति दाहं जनयति तादृश कीटविशेष, यूयम् इमान् यवान् अहिंसन्तः अपोदित अपगच्छत । यतो हि इदं युष्मत्प्रतीकाराय क्रियमाणं हविः वह्नौ मारकौषधिद्रव्याणाम् आहुतिप्रदानं ब्रह्म इव मन्त्रप्रयोग इव असंस्थितं युष्माभिः प्रतिरोद्धुमशक्यं वर्तते इति ।

उपसंहारः

वैदिकसंहितासु पतङ्गशब्दो येष्वर्थेषु भाष्यकारैः स्वीकृतस्तेऽत्र निरूपिताः । शब्दस्यास्य संहितासु कादाचित्क एव प्रयोग उपलभ्यते न बहुतन्त्रः । आदौ प्रदर्शिता लोकप्रसिद्धा इतरे येऽर्थाः कोशेषु निर्दिष्टा न ते वेदेषु दृग्गोचरीकृताः । अतस्तेषां विकासः पश्चात्तनीन इति मन्तव्यम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६. महिषः

शब्दार्थकोशेषु महिषशब्दो बहुष्वर्थेषु परिगणितः। ते चार्थाः—पशुविशेषः, श्मश्रुधारिम्लेच्छजातिविशेषः, अर्हद्ध्वजविशेषः, महिषासुरः, माध्यमिकदेवगणभेदः, महान्, कुशद्वीपस्थपर्वतविशेषः, अप्सुजोऽग्निविशेषः, कुशद्वीपस्थवर्षविशेषः, कृताभिषेको भूपालः, देशभेदः, अनुह्लादस्य पुत्रभेदः, साध्यापुत्रः, सूर्यः, यजुःप्रतिशाख्यस्य भाष्यकर्ता कश्चिद् ऋषिः इत्युदीरिताः।[1] स्त्रीलिङ्गो महिषीशब्दश्च नृपयोषिति, सैरभ्यामोषधीभेदे च कीर्तितः[2]। वैदिकनिघण्टुकोषे महिषशब्दो महन्नामसु[3] पठितः। यास्कीयनिरुक्ते 'अपामुपस्थे महिषा अगृभ्णत, ऋग् 6. 8. 4' इति मन्त्रव्याख्याने **महिषा महान्तो माध्यमिका देवगणा** उक्ताः[4]। शतपथब्राह्मणेऽग्नयः प्राणा ऋत्विजश्चापि[5] महिषाः कथिताः। वैयाकरणसम्प्रदाये **'अविमह्योष्टिषच्** उ. 1. 45' इत्युणादिसूत्रेण मह पूजायाम् इति धातोष्टिषच्प्रत्यये महिषशब्दः सिध्यति। शतपथे महत्पूर्वकम् इष आभीक्ष्ण्ये इति धातोः शब्दोऽयं निष्पादितः[6]। महीधरस्तु **'महि माहात्म्यं सनोति ददाति स महिषः'** इत्याह[7]। अन्यत्र उवटमहीधरौ **'महान् इच्छावांश्च'** इत्यर्थं सूचयतः[8]।

लोकवद् वैदिकसंहितास्वपि महिषशब्दः प्रयुज्यते। तत्र केष्वर्थेषु केषां वा विशेषणत्वेनायं प्रयुक्त इति तावद् विचार्यते।

इन्द्रः

इन्द्रो महिष उच्यते, महिमान्वितत्वात् पूज्यत्वाद् वा। तस्यैषा भवति।

महाँ असि महिष वृष्ण्येभिर्धनस्पृदुग्र सहमानो अन्यान्।
एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान्॥

ऋग् 3. 46. 2

---

1. द्रष्टव्यानि—इलायुधविवृतिः (हिन्दीसमिति, लखनऊ) मोनियर-विलियम्स-कृतः संस्कृत-इंगलिश-कोशः।
2. महिषो नृपयोषिति सैरभ्यामोषधीभेदे। अनेकार्थसंग्रहः, 3.78.2
3. निघं. 3 . 3
4. निरु. 7.26
5. अग्निर्वै महिषः। श.ब्रा. 7.3.1.23, प्राणा वै महिषाः श.ब्रा. 6.7.4.5, ऋत्विजो वै महिषाः श.ब्रा. 12 8.1.2
6. महिषस्य धारामिति, अग्निर्वै महिषः, स हीदं जातो महान्त्सर्वमैष्णात्। श.ब्रा. 6.3.1.2
7. यजु. 3.7 भाष्ये।
8. महिषस्य महतः इच्छावतश्चाग्नेः (मह + इषु इच्छायाम्)। यजु. 12.105 भाष्ये।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे महिष महनीय पूजनीयतम उग्र उद्गूर्णबल इन्द्र परमेश्वर, त्वं महान् असि परममहिमान्वितोऽसि। धनस्पृत् यो धनानि स्पृणोति सेवते स परमैश्वर्यसम्पन्नस्त्वं वृष्ण्येभिः वृषसु बलवत्सु भवानि वृष्ण्यानि वीर्याणि तैः अन्यान् अधार्मिकान् शत्रून् सहमानः पराजयमानः असि। एकः केवलस्त्वं विश्वस्य भुवनस्य समस्तब्रह्माण्डस्य राजा अधीश्वरः असि। स तादृशस्त्वं जनान् मनुष्यान् योधय च हृदि प्रादुर्भवतः कामक्रोधादिरिपून् अभिभवितुं युद्धं कारय च तान् क्षयय सद्गुणैर्निवासय च[9]।

तस्यैषाऽपरा भवति[10]।

स्तम्भीद्द्यां स धरुणं प्रुषायद् ऋभुर्वाजाय द्रविणं नरो गोः।
अनु स्वजां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः॥

ऋग् 1. 121. 2

स इन्द्रः परमेश्वरः द्यां द्युलोकं स्तम्भीद् ह नियन्त्रितवान् खलु। ऋभुः ऋतेन भासमानः गोः सूर्यस्य भूमण्डलस्य वा नरः नेता स वाजाय ऐश्वर्याय बलाय वा धरुणं वृष्टिजलं द्रविणं धनं च प्रुषायत् सिक्तवान्। किं च महिषः महान् स इन्द्रः परमेश्वरः स्वजां स्वसकाशाज्जायमानां व्राम् सर्वेन्द्रियमाणाम् उषसम् अनुचक्षत प्रकाशेनानुगृह्णाति। अपि च अश्वस्य मेनां स्त्रियं, **मेना ग्ना इति स्त्रीणाम्** इति निरुक्तम् (3. 21.), वडवां, परि वैपरीत्येन गोः मातरं धेनोः जननीम् अकरोदिति प्रहेलिका। अश्वस्य व्यापकस्य सूर्यस्य मेनां योषितम् उषसमित्यर्थः, **'वाजिनीवती सूर्यस्य योषा** ऋग् 7. 75. 5' इति स्मरणात्, गोः किरणसमूहस्य मातरं जननीं चकारेति तत्समाधानम्[11]।

अग्निः

अग्निरपि महिष उच्यते। तस्यैषा भवति—

ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः।
श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा॥

ऋग् 10. 140. 6., यजु 12. 111, साम 1821, तै. 4. 2. 7 3

---

9. अस्य मन्त्रस्य राजपरोऽर्थः स्वामिदयानन्दभाष्येऽवलोकनीयः।
10. इन्द्रस्य महिषत्वप्रतिपादका अन्ये मन्त्राः-ऋग् 2.22.1, 4.18.11, 10.54.4, 10.128.8, साम. 457. 1485, अथर्व 5.3.8, तै. 4.7.14.3, 3.2,11.3
11. सायणेन ऋगियं सूर्यपरा व्याख्याता। तन्मते महिषः महान् सूर्यरूपी इन्द्रः। Ludwig would read मातरं गां instead of मातरं गोः, He thinks that the mare of the horse (सूर्य) is the earth, the motherly cow. Sayana says that Indra in sport made a mare bring forth a calf and Wilson following him translates, 'He made the female of the horse unnaturally the mother of the cow'—Griffith.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋतावानं सत्यवन्तं यज्ञवन्तं वा, महिषं महान्तं पूज्यं वा, विश्वदर्शतं सर्वैर्दर्शनीयम् अग्निं परमात्माग्निं यज्ञाग्निं वा जनाः उपासका मानवाः ऋत्विग्यजमानादयो वा सुम्नाय ब्रह्मानन्दलाभाय यज्ञजनितसुखप्राप्त्यै वा पुरो दधिरे सम्मुखं धारयन्ति। हे अग्ने, श्रुत्कर्ण श्रुत् स्तुतिश्रवणपरः कर्णः श्रोत्रं यस्य तम् उपासकानां याज्ञिकानां वा कामनाप्रपूरकम् इत्यर्थः, सप्रथस्तमम् अतिशयेन प्रख्यातं दैव्यं देवानां दिव्यगुणयुक्तानामुपासकानां याज्ञिकानां वा हितकरं त्वा त्वां युगा युगानि युगलरूपाणि पत्नीयजमानरूपाणि मानुषा मानुषाणि मनोरपत्यानि गिरा वेदवाचा स्तुवन्तीति शेषः।[12]

अथ महिषोऽग्निरयं पृथिव्यन्तरिक्षद्युस्थानेषु वह्निविद्युत्सूर्यात्मना तिष्ठतीत्याह—

प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति।
दिवश्चिदन्ताँ उपमाँ उदानळपामुपस्थे महिषो ववर्ध॥

ऋग् 10. 8. 1 साम 71, अथर्व 18. 3. 65

अग्निः तेजस्तत्त्वमिदं बृहता महता केतुना प्रकाशेन, प्रज्ञानेन, ज्वालारूपेण ध्वजेन वा सह रोदसी द्यावापृथिव्यौ प्र याति प्रकर्षेण गच्छति। वृषभः वृष्टिकर्ता अयं वृषभ इव बलीवर्द इव रोरवीति अन्तरिक्षे स्तनयित्नुरूपेण स्थितः भृशं गर्जति। आदित्यात्मना स्थितोऽयं दिवश्चित् द्युलोकस्यापि अन्तान् अन्तप्रदेशान् उपमान् समीपस्थप्रदेशांश्च उदानट् ऊर्ध्वं व्याप्नोति। किं च अयमेव महिषः महान् अग्निः विद्युद्रूपेण अपाम् उपस्थे अन्तरिक्षस्य मेघजलानां मध्ये ववर्ध वृद्धिं गच्छति।

सोमः

सोमोऽपि महिष उच्यते। तस्यैषा भवति—[13]

पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे।
स्वसार आपो अभि गा उतासरन्त्सं ग्रावभिर्नसते वीते अध्वरे॥

ऋग् 9.82.3, साम 1317

पर्णिनः पर्णवतः महिषस्य महतः बहुगुणान्वितस्य सोमस्य पर्जन्यः मेघः पिता जनको वर्तते। स सोमः पृथिव्याः भूमेः नाभा नाभौ मध्ये गिरिषु पर्वतेषु च क्षयं दधे निवसति। तं सोमं तस्य स्वसारः स्वसृभूता आपः जलानि उत्त अपि च गाः वेदवाचः अभि असरन् प्राप्तुवन्ति। स च सोमः वीते अध्वरे कमनीये यज्ञे ग्रावभिः शिलाभिः सं नसते संगच्छते अभिषवार्थम्।

---

12. अग्नेर्महिषत्वप्रतिपादका इतरे मन्त्राः—ऋग् 1.95.9, यजु. 3.7, 12.105

13. सोमस्य महिषत्वपरा एते मन्त्रा अपि द्रष्टव्याः—ऋग् 9.69.30, 9.86.40, 9.96.18, 19, 9.97.41, 9.113.3, साम. 542, 1176, 1177, 1255, तै. 3.4.11.1

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सविता

सवितोऽपि महिष उच्यते । तस्यैषा भवति—

युनक्तु देवः सविता प्रजानन्नस्मिन् यज्ञे महिषः स्वाहा ॥

अथर्व 5.26.2

अनेन सूक्तेन नवशालायां सर्पिर्मधुमिश्रं जुहोतीति कौशिकः ।[14] अस्मिन् यज्ञे नवशालाकर्मणि प्रजानन् शालावासिनां सुखस्वास्थ्यादिकं जानानः महिषः महान् सविता देवः दीप्तिमान् सूर्यः, देदीप्यमानः प्रेरकः सकलजगदुत्पादकः परमेश्वरो वा युनक्तु स्वात्मानं शालया सह योजयतु, येन गृहवासिनः सर्वे सूर्यप्रकाशे परमेश्वरानुग्रहे च सुखिनः स्युः । स्वाहा इयमस्माभिर्यज्ञे आहुतिः प्रदीयते ।

सूर्यः

सुपर्णः सूर्योऽपि महिष उच्यते । तस्यैषा भवति—

चित्रश्चिकित्वान् महिषः सुपर्ण आरोचयन् रोदसी अन्तरिक्षम् ।
अहोरात्रे परि सूर्यं वसाने प्रास्य विश्वा तिरतो वीर्याणि ॥

अथर्व 13.2.32

चित्रश्चित्रवर्णः, चिकित्वान् प्रज्ञापकः सुपर्णः शोभनरश्मिपर्णोपेतः सूर्यः रोदसी द्यावापृथिव्यौ अन्तरिक्षं च आरोचयन् प्रकाशयन् वर्तते । अहोरात्रे दिवसः रात्रिश्च तं महिषं सूर्यं परिवसाने परिधारयन्ती अस्य सूर्यस्य विश्वा विश्वानि वीर्याणि प्राणप्रदान-व्याधिनिवारणादिसामर्थ्यानि प्र तिरतः प्रवर्धयतः ।

तस्यैषाऽपरा भवति—

तिग्मो विभ्राजन् तन्वं शिशानोऽरंगमासः प्रवतो रराणः ।
ज्योतिष्मान् पक्षी महिषो वयोधा विश्वा आस्थात् प्रदिशः कल्पमानः ॥

अथर्व 13.2.33

तिग्मः तीक्ष्णकिरणः, विभ्राजन् विशेषेण भ्राजमानः तन्वं स्वकीयं मण्डलं शिशानः तीक्ष्णीकुर्वन्, अरंगमासः अरं पर्याप्तं गच्छन्तीति तान् प्रवतः प्रकृष्टनदनदी-प्रवाहान् रराणः प्रयच्छन्, ज्योतिष्मान् दीप्तिमान् पक्षी खगः अपि महिषः सैरिभः पशुरिति विरोधः, पक्षी रश्मिरूपपक्षोपेतः महिषः महानिति परिहारः, वयोधाः वयः आयुः प्राणं वृष्टिद्वारा अन्नं वा दधाति प्रयच्छतीति तादृशः सूर्यः विश्वाः प्रदिशः आशाः कल्पमानः रचयन् आस्थात् आगत्य तिष्ठति ।

अस्यैषा तृतीया—[15]

---

14. कौ. सू. 23.1

15. सूर्यस्य महिषत्वनिर्देशका अन्ये मन्त्राः—अथर्व 12.3.38, 13.2.30, 42, 53, 54 ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[16]अन्तर्चरति रोचनास्य प्राणादपानती ।
व्यख्यन् महिषो दिवम् ॥

ऋग् 10.189.2, यजु 3.7, साम 1377

आत्मा सूर्यो वा देवता । सूर्यपरात्र व्याख्यायते । अस्य सूर्यस्य रोचना दीप्तिः प्राणाद् अपानती प्राणनक्रियानन्तरम् अपानक्रियां कुर्वती अन्तः सर्वेषां प्राणिनां देहाभ्यन्तरे चरति मुख्यप्राणात्मना विचरति, **'प्राणः प्रजानामुदयत्येष सूर्यः'** (प्रश्न 1.8) इति स्मरणात् । यद्वा, अस्य सूर्यस्य रोचना प्राणादपानती अन्तः मंगलबुधगुरु-शुक्रशनिचन्द्रपृथिव्यादीनां ग्रहोपग्रहाणां मध्ये चरति, तेषां स्वप्रकाशविहीनत्वात् सूर्यप्रकाशेनैव च प्रकाशमानत्वात् । यद्वा, अस्य सूर्यस्य रोचना सर्वेषां प्राणिनां प्राणापानक्रिये कुर्वतो अथवा स्वयं प्राणात् प्रातरुदयानन्तरम् अपानती सायम् अस्तं गच्छन्ती, अन्तः द्यावापृथिव्योर्मध्ये चरति । महिषः महान् स सूर्यः दिवं शरीरस्योर्ध्व-प्रदेशं मस्तिष्कज्ञानेन्द्रियाद्यधिष्ठानं यद्वा द्युलोकं व्यख्यत् प्रकाशयति ।

आत्मा

आत्मापि महिष उच्यते । यथा अनुपदम् एव उद्धृतस्य मन्त्रस्य विकल्पतया आत्मदेवत्वात् तत्परोऽर्थः प्रदर्श्यते । आत्मशब्देन परमात्मजीवात्मानौ गृह्येते । अस्य परमात्मनः जीवात्मनो वा रोचना दीप्तिः प्राणादपानती सर्वप्राणिनां प्राणापान-व्यापारौ कुर्वती, तेभ्यो जीवनं प्रयच्छन्तीत्यर्थः, अन्तः हृदयाभ्यन्तरे चरति । स महिषः महान् परमात्मा जीवात्मा वा दिवं मनुष्यस्य मूर्धानमपि व्यख्यत् प्रकाशयति, ज्ञानप्रदानेनानुगृह्णातीति भावः ।

प्राणाः

प्राणाः अपि महिषा उच्यते । तेषामेषा भवति—

समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन् ॥

ऋग् 10.45.3, यजु 12.20, तै. 4.2.2.1

"समुद्रे त्वा नृमणा अप्स्वन्तरिति, प्रजापतिर्वै नृमणा अप्सु त्वा प्रजापतिरित्येतत् नृचक्षा ईधे दिवो अग्न ऊधन्निति, प्रजापतिर्वै नृचक्षा आपो दिव ऊधः, तृतीये त्वा रजसि तस्थिवांसमिति, द्यौर्वै तृतीयं रजः, अपामुपस्थे महिषा अवर्धन्निति प्राणा वै महिषाः दिवि त्वा प्राणा अवर्धन्नित्येतत्" इति ह शतपथब्राह्मणम् (श.ब्रा. 6.7.4.5)[17]

---

16. अयमेव मन्त्रः किंचित्पाठान्तरेण—अथर्व 6.31.2, 20.48.5, तै. 1.5.3.1 का. 7.13 । यजुर्वेदे उवटमहीधराभ्यामयम् यज्ञाग्निपरो व्याख्यातः ।

17. ऋग्वेदे सायणोऽस्य विकल्पतया 'महिषाः महान्तो माध्यमिका देवगणा मरुदादयः स्तोतारः, इत्यपि व्याचष्टे । यजुषि उवटमहीधरौ शतपथमनुसरतः—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुतः

मरुतोऽपि महिषा उच्यन्ते । तेषामेषा भवति—

महिषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो रघुष्यदः ।
मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वम् ॥

ऋग् 1. 64. 7

मरुतो देवताः । योद्धारः प्रेर्यन्ते । महिषासः महान्तः मायिनः प्रज्ञावन्तः चित्रभानवः विस्मयकारितेजस्काः, गिरयो न पर्वता इव स्वतवसः स्वकीयबलयुक्ताः रघुष्यदः क्षिप्रवेगाः हे मरुतः योद्धारः, हस्तिनो मृगाः इव हस्तवन्तः पशवो गजाः इव, ते यथा वनानि अरण्यानि खादन्ति तथा यूयं वनानि शत्रुसैन्यानि खादथ पराजयध्वम्, यत् यस्मात् आरुणीषु अरुणवर्णासु वडवासु तविषीः स्वकीयबलानि अयुग्ध्वं संयोजितवन्तः । इत्यधिभूतम् । अधिदैवतपक्षे तु मरुतो वायवः ।

माध्यमिका देवगणाः

माध्यमिका देवगणा अपि महिषा उच्यन्ते । तेषामेषा भवति—

[18]**अपामुपस्थे महिषा अगृभ्णत विशो राजानमुपतस्थुरृग्मियम् ।**
आ दूतो अग्निमभरद् विवस्वतो वैश्वानरं मातरिश्वा परावतः ॥

ऋग् 6. 8. 4

महिषाः महान्तो माध्यमिका देवगणाः पवना इत्यर्थः वैश्वानरम् अग्निम् अपाम् उदकानाम् उपस्थे उपस्थाने आधारे अन्तरिक्षे अगृभ्णत विद्युद्रूपेण अगृह्णन्, विशः प्रजाः । ऋग्मियम् अर्चनीयं राजानम् इव ते माध्यमिका देवगणाः तम् अग्निम् उपतस्थुः उपातिष्ठन्त । दूतः मातरिश्वा दूतकार्यकर्ता वायुः परावतः सुदूरवर्तिनः विवस्वतः आदित्यात् वैश्वानरम् अग्निम् आ अभरत् भूलोके आहरति । एक एवाग्निर्विवस्वति अन्तरिक्षे, भूलोके च आदित्यविद्युत्पार्थिवाग्निरूपेण प्राप्यत इत्यर्थः ।

वेनः

वेनोऽपि महिष उच्यते । तस्यैषा भवति—

जानन्तो रूपमकृपन्त विप्रा मृगस्य घोषं महिषस्य हि ग्मन् ।
ऋतेन यन्तो अधि सिन्धुमस्थुर्विदद् गन्धर्वो अमृतानि नाम ॥

ऋग् 10. 123. 4

"अपामुपस्थे महिषा अवर्धन् The steers increased thee in the water's bosom. The steers or the Mighty ones :: the Maruts." Griffith

18. ऋगियं निरुक्ते व्याख्याता (निरु. 7.26) ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेनो देवता । **वेनो वेनतेः कान्तिकर्मणः** (निरु. 10. 37)' । वेनः कान्तिमान् परमेश्वरः, तस्य रूपं स्वरूपं जानन्तः अवगच्छन्तः विप्राः मेधाविनः स्तोतारः तद् रूपम् अकृपन्त स्तुवन्ति । मृगस्य मार्गणीयस्य महिषस्य महतो वेनस्य घोषं प्रेरकशब्दं हि खलु ते ग्मन् प्राप्नुवन्ति । ऋतेन सत्यनियमेन यन्तः गच्छन्तः ते स्तोतारः सिन्धुम् अधि सद्गुणानां सिन्धौ परमेश्वरे अस्थुः तिष्ठन्ति । ततः गन्धर्वः गां वेदवाचं धरतीति गन्धर्वो विद्वान् स्तोता अमृतानि नाम अमृतरूपाणि मोक्षपदानि विदत् जानाति लभते इत्यध्यात्मम् । अधिदैवतपक्षे तु महिषो वेनः मध्यमस्थाना विद्युत् ।

तन्यतुः

तन्यतुरपि महिष उच्यते । तस्यैषा भवति—

धर्तारौ दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः ।
आप ओषधीः प्रतिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम् ॥

ऋग् 10. 66. 10

दिवः प्रकाशस्य धर्तारः सुहस्ताः निर्माणकुशलाः ऋभवः सूर्यरश्मयः, **'आदित्यरश्मयोऽप्यृभव उच्यन्ते'** इति निरुक्तम् (11. 14), महिषस्य महतः तन्यतोः स्तनयित्नुलक्षणस्य शब्दस्य कर्तारौ वातापर्जन्या वातश्च पर्जन्यश्च, आपः वृष्ट्युदकानि, ओषधीः ओषधयः एते सर्वे नः अस्माकं गिरः स्तुतिवाचः प्रतिरन्तु प्रवर्धयन्तु सफलीकुर्वन्तु । रातिः फलदायकः भगः भजनीयः आदित्यः, वाजिनः **'अग्निर्वायुः सूर्यस्ते वाजिनः** (तै.ब्रा. 1. 6. 3. 9) इति मन्त्रोक्ताः अग्निवायुसूर्या मे मम हवम् स्तोत्रं यन्तु प्राप्नुवन्तु, सफलयन्त्विति यावत् ।

कण्वः

कण्वोऽपि महिष उच्यते । तस्यैषा भवति—

तां सवितः सत्यसवां सुचित्रामाहं वृणे सुमतिं विश्ववाराम् ।
यामस्य कण्वो अदुहत् प्रपीनां सहस्रधारां महिषो भगाय ॥

अथर्व 7. 16. 1

हे सवितः सर्वप्रेरक परमेश्वर, तां सत्यसवां सत्यस्य प्रेरयित्रीं सुचित्रां शोभनचित्रां विश्ववारां विश्ववरणीयां सुमतिं सुबुद्धिम् अहम् आवृणे आभिमुख्येन याचे, अस्य तव सवितुः यां प्रपीनां प्रवृद्धां सहस्रधारां बहुधारां सुमतिं महिषः महान् कण्वः[19] मेधावी जनः, **कण्व इति मेधाविनाम,** निघं. 3. 15, भगाय ऐश्वर्याय अदुहत् दोग्धि ।

यज्ञः

यज्ञोऽपि महिष उच्यते । तस्यैषा भवति—

19. कण्वः एतन्नामा ऋषिः इति सायणः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः ।
शतं महिषान् क्षीरपाकमोदनं वराहमिन्द्र एमुषम् ॥

ऋग् 8. 77. 10

अत्र सायणः[20]—"हे इन्द्र ता तानि यानि त्वया प्रष्टव्यान्युदकानि सन्ति तानि विष्णुः व्यापनशील आदित्यः आभरत् आभरति लोकाय प्रयच्छतीत्यर्थः । कीदृशो विष्णुः ? उरुक्रमः बहुगतिः किं स्वविरोधेन ? नेत्याह । त्वेषितः त्वया प्रेरितः । न केवलमुदकान्येव, अपि च शतं महिषान् शतसंख्याकान् पशून् । महिषशब्दो गवादेरप्युपलक्षकः । अथवा शतशब्दोऽपरिमितवचनो, महिष इति महन्नाम । असंख्यातान् महतो यज्ञान् यजमानेभ्य आभरत् ददातीत्यर्थः । किं च क्षीरपाकं क्षीरपववम् ओदनं पायसम् । एतच्चरुपुरोडाशादेरुपलक्षकम् । तद् यजमानेभ्य आभरत् । अथवा सर्वार्थं वृष्टिप्रदानद्वारौदनं प्राहरत्[21] । किं च इन्द्रः वराहं जलपूर्णं मेघं हन्तीति शेषः । कीदृशं तम् ? एमुषम् आ इत्यस्य स्थाने छान्दस एकारः । आमुषम् उदकस्य मोषकमित्यर्थः ।"

तस्यैषाऽपरा भवति—निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूर्यः (ऋग् 1. 141. 3) इति । अत्र "ईम् एनमग्निं महिषस्स महतो यज्ञस्य बुध्नात् मूलात् आधानादारभ्य वर्पसः रूपस्य उपक्रमोपसंहारात्मकस्य सिद्धये ईशानासः स्वकीयव्यापारसमर्थाः सूरयः मेधाविन ऋत्विजः शवसा मन्त्रादिरूपेण शारीरेण वा निः क्रन्त निष्कुर्वन्ति साधयन्ति उत्पादयन्ति काष्ठात्" इति सायणीयोऽभिप्रायः ।[22]

यजमानाः

यजमाना अपि महिषा उच्यन्ते । तेषामेषा भवति—

[23]समानं नीळं वृषणो वसानाः सं जग्मिरे महिषा अर्वतीभिः ॥

ऋग् 10. 5. 2

"वृषणः आहुतीनां सेक्तारः समानम् एकं नीडं स्थानम् अग्निं वसानाः मन्त्रत आच्छादयन्तः महिषाः महान्तो यजमानाः अर्वतीभिः वडवाभिः सं जग्मिरे समगच्छन्त । अश्ववन्तोऽभूवन्" इति सायणः ।

---

20. सायणेनास्या ऋचौ द्विधार्थः कृतः । नैरुक्तपक्षे ऐतिहासिकपक्षे च । प्रस्तुतोऽर्थो निरुक्तपक्षीयः ।
21. तुलनीयम्: The buffaloes or dark Clouds and the rice and milk or fertilising rain—Griffith.
22. सायणेन वैकल्पिकतया द्वितीयोऽर्थः "एनमग्निं बुध्नात् आदितो मथनादारभ्य महिषस्य वर्पसो महतो रूपस्य आहुतिस्वीकारसमर्थस्य सिद्धये निष्कुर्वन्ति' इति कृतः ।
23. ग्रिफिथमते तु वृषणो महिषाः सूर्यकिरणाः अर्वत्यश्च अन्तरिक्षस्था आपः । Inhabiting one dwelling-place in common, strong stallions and the Mares have come together. Strong stallions: perhaps the flames of the sun. Mares: waters of the firmament—Griffith.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋत्विजः

ऋत्विजोऽपि महिषा उच्यन्ते । तेषामेषा भवति—'सम्यक् सम्यञ्चो महिषा अहेषत ऋग् 9. 73.2' इति ऋक्पादमिमं सायण एवं व्याचष्टे—"**महिषाः पूज्या महान्तो वर्त्विजः सम्यञ्चः परस्परं संगताः सन्तः सम्यक् अहेषत सोम सम्यक् प्रेरयन्ति अभिषुण्वन्तीति यावत् ।**"

तेषामेषाऽपरा भवति—'सुरावन्तं बर्हिषदꣳ सुवीरं यज्ञꣳहिन्वन्ति महिषा नमोभिः, यजु 19. 32' इति । अत्र शतपथब्राह्मणम्—"**सुरावन्तं बर्हिषदं सुवीरमिति, सुरावान्[24] वा एष बर्हिषद् यज्ञो यत् सोत्रामणो, बर्हिषैवैनं यज्ञेन समर्धयति । यज्ञं हिन्वन्ति महिषा नमोभिरिति, ऋत्विजो वै महिषा, यज्ञो नमः, ऋत्विग्भिरेव यज्ञं समर्धयति यज्ञेन** (श. ब्रा. 12. 8. 1. 2)" इति[25] ।

मनुष्याः

मनुष्या अपि महिषा उच्यन्ते । तेषामेषा भवति—

अपामुपस्थे अध्यायवः कविम् ऋतस्य योना महिषा अहेषत ॥

ऋग् 9.86.25

अत्र सायणः—"**कविं त्वाम् अपामुपस्थे अन्तरिक्षस्योत्सङ्गे ऋतस्य योनौ, उदकनामैतत् 'ऋतयोनिर्ऋतस्य योनिः 'इति तन्नामसु पाठात्, उदके महिषाः महान्तः आयवः मनुष्याः अधि अहेषत अधिकं प्रेरयन्ति**" इति ।

पशुः

लुलायः सैरिभः 'भैंसा' इति ख्यातः पशुविशेषोऽपि महिष उच्यते । पशुषु महिषो बलवत्त्वात् प्रभूतभारवाहित्वाच्च विशेषो मन्यते । अतएव तेन सोम उपमितः—

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥

ऋग् 9.96.6, साम, 944, तै. 3.4.11.1

सोमः किल देवानां स्तुतिकारिणाम् ऋत्विजां मध्ये ब्रह्मा तन्नामा प्रधानर्त्विग् भवति, कवीनां क्रान्तदर्शिनां मध्ये पदवीः पद लक्ष्यं वेति गच्छतीति पदवीः स भवति

---

24. अपां च वा एष ओषधीनां च रसो यत् सुरा । श. ब्रा. 12.8.1.4

25. स्वामिदयानन्दः स्वकीये यजुर्भाष्ये पूर्वार्ध्वागतं 'महिषा' इति पदम् उत्तरा र्द्धपठितस्य 'यजमानाः' इति पदस्य विशेषणमाह । "हे मनुष्याः, ये महिषाः स्वर्का यजमाना नमोभिः सुरावन्तं बर्हिषदं सुवीरं यज्ञं हिन्वन्ति ते दिवि देवतासु सोमनिन्द्रं दधानाः सन्तो वयं च मदेम" इति तन्मते मन्त्रस्थान्वयः । अयमर्थो यजमाना महिषा उच्यन्ते इत्यस्य पोषकः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्वा कवीनां काव्यकाराणां मध्ये पदवीः पदप्रयोगनिपुणः कविमूर्धन्यो भवति, विप्राणां मेधाविनां मध्ये ऋषिः तिरोहितमप्यर्थं हस्तामलकवत् साक्षात् पश्यति यः स भवति, मृगाणां पशूनां मध्ये महिषः लुलायो भवति, गृध्राणां गृध्रजातीयानां पक्षिणां मध्ये श्येनः श्येनपक्षी भवति, वनानां, वनतिर्हिंसाकर्मा इति सायणः, हिंसकानां छेदकानां मध्ये स्वधितिः छुरिका भवति । एतादृशः सोमः रेभन् शब्दं कुर्वन् पवित्रम् ऊर्णावस्त्रेण कृतां चालनीम् अत्येति अतिक्रामति । अत्र रूपकालङ्कारसौष्ठवम् ।

सोमः पुनानः कलशाँ अयासीत् सीदन् मृगो न महिषो वनेषु ॥

ऋग् 9.92.6

वनेषु उदकेषु सीदन् तिष्ठन् मृन्मलिनं स्वशरीरं जलावगाहेन पवित्रीकुर्वन् महिषो मृगो न महिषाख्यः पशुरिवः पुनानः उदकगमनेन स्वतैक्ष्ण्यं न्यूनं कुर्वन् सोमः सोमरसः कलशान् उदककलशान् आयासीत् गच्छति ।

"सोमं सुतं महिषेवाव गच्छथः, ऋग् 8.35.7-9' । **"महिषाविव यथा पिपासितौ महिषौ उदकान्युपगच्छतः तथा (हे अश्विनौ युवाम्)) सुतं सोमम् अव गच्छथः"** इति सायणः । **निरुद्धश्चिन्महिषस्तर्ष्यावान्,** ऋग् 10. 28. 10' । **"यथा केनापि बद्धपादो निरुद्धः महिषः तर्ष्यावान् उदकाभावे तृषावान् भवति, एवमिन्द्रः सोमाहरणात् पूर्वं सोमाभावे तृषितवानभूत्"** इति तत्र सायणीयं व्याख्यानम् । **'मापं स्थातं महिषेवावपानात्,** ऋग् 10.106.2 ।" **(हे अश्विनौ) महिषेव महिषाविव, यथा श्रान्तौ महिषौ अवपानात पीयतेऽस्मिन्निति पानं ह्रदादि, अधिकरणे ल्युट्, पानमेव अवपानम्, संनिकृष्टात् पानान्नापगच्छतः तद्वत् युवाम् अस्मदीयाद् हविषः स्तोत्राच्च माप स्थातं मापक्रम्य तिष्ठतम्"** इति सायणः ।

प्र सोमासो विपश्चितोऽपां न यन्त्यूर्मयः ।
वनानि महिषा इव ॥

ऋग् 9. 33. 1, साम 478, 764

विपश्चितः मेधाप्रदानसामर्थ्ययुक्ताः सोमासः ब्रह्मानन्दरसाः अपाम् ऊर्मयः न सलिलानां लहर्य इव प्र यन्ति उपासकस्य मम हृदि उद्भवन्ति, किं च महिषाः महिषाख्याः पशवः वनानि अरण्यानि इव मम आत्मप्राणबुद्धिज्ञानेन्द्रियादीनि प्रति प्र यन्ति प्रकृष्टतया गच्छन्ति ।

मेघः

मेघोऽपि महिष उच्यते । तस्यैषा भवति—

अर्भको कुमारकोऽधितिष्ठन्नवं रथम् ।
स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुम् ॥

ऋग् 8. 69. 15, अथर्व 20. 92. 12

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र सायणः—"**अयमिन्द्रः अर्भको न अल्पशरीरः कुमारको न कुमारक इव नवं स्तुत्यं रथम् अधि तिष्ठत् अधितिष्ठति । स इन्द्रः महिषं महान्तं मृगं मृगवद् इतस्ततो धावन्तं सर्वैर्मृग्यं वा विभुक्तुं बहुकर्माणं मेघं पक्षत् पचति, वृष्ट्यभिमुखं करोतीत्यर्थः ।**[26] सायणभाष्ये 'पित्रे मात्रे इति परित्यक्तम् । तस्यायमर्थः, भुवि ये पितरः पुरुषाः याश्च मातरः स्त्रियः सन्ति तेभ्यः सर्वेभ्य एवेति ।

इन्द्रस्य महिषभक्षणम्

अस्मिन् प्रसंगे इन्द्रद्वारा महिषभक्षणस्यापि तात्पर्यमन्वीक्षणीयम् । इन्द्रो हि महिषाणां त्रीणि शतानि भक्षयतीति श्रुतिर्व्याहरति ।

सखा सख्ये अपचत् तूयमग्निरस्य क्रत्वा महिषा त्री शतानि ।
त्री साकमिन्द्रो मनुषः सरांसि सुतं पिबद् वृत्रहत्याय सोमम् ॥
त्री यच्छता महिषाणामघो मास्त्री सरांसि मघवा सोम्यापाः ।
कारं न विश्वे अह्वन्त देवा भरमिन्द्राय यदहिं जघान ॥

ऋग् 5. 29. 7.8

अत्रेदं सायणीयं व्याख्यानम्—"**सखा इन्द्रस्य मित्रभूतः अग्निः महिषा महिषाणां पशूनां त्री त्रीणि शतानि शतसंख्याकानि सख्येः सख्युः**[27] **मित्रभूतस्य अस्य इन्द्रस्य क्रत्वा कर्मणा निमित्तभूतेन तूयं क्षिप्रम् अपचत् पपाच । किं च इन्द्रः परमैश्वर्ययुक्तः मनुषः मनोः संबन्धीनि त्री त्रीणि सरांसि पात्राणि, अत्र सरःशब्देन पूतभृदाधवनीयद्रोणकलशसंज्ञानि पात्राण्युच्यन्ते, तेषु स्थितं सुतम् अभिषुतं सोमं साकं युगपदेव वृत्रहत्याय वृत्रहननाय पिबत् अपिबत् पपौ ।**"—"**हे इन्द्र, त्वं यत् यदा त्री त्रयाणां शता शतसंख्यानां महिषाणां पशूनां मांसानि अघः भक्षितवानसि, घसेरत्तेर्वा रूपम्, यदा च मघवा धनवांस्त्वं सोम्या सोममयानि त्री त्रीणि सरांसि पात्राणि अपाः पीतवानसि, यत् यदेन्द्रः अहिं वृत्रं जघान हतवान् तदा विश्वे सर्वे देवाः भरं सोमपानादिना पूर्णम् इन्द्राय इन्द्रं**[28] **युद्धार्थम् अह्वन्त आह्वयन्त । तत्र दृष्टान्तः—कारं न स्वामिनः कर्मकरमिव तद्वत् ।**" इति ।

अयमत्र सारांशः—1. अग्निः स्वमित्राय इन्द्राय महिषाणां त्रीणि शतानि अपचत् । इन्द्रश्च तेषां मांसानि भक्षितवान् । 2. इन्द्रः त्रीणि सरांसि अपि अपिबत् ।

---

26. तुलनीयम्: His Mother and his Sire : Earth and Heaven The boffalo in the dark rain cloud which Indra pierces with his lightning or perhaps the demon Vala is intended.—Griffith.

27. विभक्तिव्यत्ययोऽयम् अनावश्यकः, सख्ये मित्रभूताय इन्द्राय इत्यर्थस्य समञ्जसत्वात् ।

28. अयमपि विभक्तिव्यत्ययो नादरणीयः, इन्द्राय भरं संग्रामम् अह्वयन्त इत्यर्थस्य सुकरत्वात्। 'भर इति संग्रामनाम भरतेर्वा हरतेर्वा' इति निरुक्तम् (4.23) ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रावधेयं यत् अनुपदमेवास्माभिरुद्धृते **'स पक्षन्महिषं मृगम्,** ऋग् 8. 69. 15.' इति मन्त्रे सायणः स्वयं महिषं मृगं च मेघार्थे गृह्णाति । तेनैव संकेतेनात्रापि महिषाणां महतां मेघानामित्यर्थः कुतो न ग्राह्यः । अग्निः अन्तरिक्षस्थविद्युदग्निः सखे स्वमित्राय इन्द्राय सूर्याय महिषाणां मेघानां त्रीणि शतानि त्रिंशतवचनं बह्वर्थद्योतकम्, बहुसंख्यकान् मेघान् अपचत् परिपक्वान् वर्षोन्मुखान् अकरोत् इन्द्रः सूर्यश्च तेषां मांसानि आचखाद । अभिवृष्टा मेघाः पुनर्गगने न दृश्यन्ते । ते कुत्र गताः ? तन्मासं सूर्येण भक्षितमिति कविदृष्टिः । किं च इन्द्रः त्रीणि सरांस्यपि पिबति । भारतभूखण्डे उत्तरस्यां दिशि हिमालयः, अवशिष्टासु दिक्षु एकैकस्याम् एकैकः सागरः । ते त्रयः सागरा एव त्रीणि सरांसि । तेषामुदकं सूर्यः स्वरश्मिभिः पिबत्येव । भूमण्डलेऽपि सागराः त्रिधा विभज्यन्ते, येषां रसाः सूर्येण पीयन्ते ।

सायणः सरःशब्देन त्रीणि सोमपात्राणि गृह्णाति । तत्साम्येन तु महिषाः पुरोडाशाः स्युः **'पशवो वै पुरोडाशाः**[29]' इति स्मरणात् ।

अधिदैवतमधियज्ञं च प्रोक्तम् । अथाध्यात्मम् । अग्निः परमात्मा, इन्द्रो जीवात्मा, तौ परस्परं सखायौ **'द्वा सुपर्णा सयुजा सखाया,'** ऋग् 1. 164. 20 इति वचनात् । महिषाः प्राणाः **'प्राणा वै महिषा'** श. ब्रा. 6. 7. 4. 5 इति स्मरणात् । त्रीणि सरांसि ज्ञानकर्मोपासनाख्यानि यद् वा मनोमयविज्ञानमयानन्दमयचैतन्यानि । परमात्माग्निः स्वसख्ये जीवात्मने इन्द्राय प्राणमहिषान् परिपचति, जीवात्मा च तान् परिपक्वान् प्राणानास्वादयति, त्रीणि सरांसि चापि पिबति ।

महिषी

इति महिषः । तस्य स्त्रियां महिषी, महिषस्य पत्नी वा ।[30] या हि राज्ञः कृताभिषेका पत्नी सा महिषीत्युच्यते । तत्साम्याद् राजभिन्नानामपि जनानां भार्या महिष्य उच्यन्ते । शतपथब्राह्मणे राज्ञः प्रथमपरिणीता स्त्री, पृथिवी, वाक् चापि महिषीपदेनोक्ताः—**महिषी हीयम् (पृथिवी), तद् यैव प्रथमा वित्ता (भार्या) सा महिषी** श.ब्रा. 6.5.3.1), **महिषी हि वाक्** (श.ब्रा. 6.5.3.4) । महिषीशब्दप्रयोगो वैदिकसंहितासु विरल एव ।

भार्या

भार्या महिष्युच्यते । तस्या एषा भवति—

वधूरियं पतिमिच्छन्त्येति य ईं वहाते महिषीभिषिराम् ।
आस्य श्रवस्याद् रथ आ च घोषात् पुरू सहस्रा परि वर्तयाते ॥

ऋग् 5.37.3

---

29. तै. 7.1.9.1, तां. ब्रा. 21.10.10, तै. ब्रा. 1.8.6.3

30. 'महति पूजयति स्वपुरुषार्थेन इति महिषः महान्, राजा वा, तद्योगात् महिषी राज्ञी पशुविशेषो वा' इत्युणादिकोश 1.45 भाष्ये दयानन्दः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्रोऽयं नवपरिणीताया वध्वाः पतिगृहगमनप्रसङ्गे विनियोक्तमुचितः। इयं वधूः नवपरिणीता पत्नी पतिं भर्तारम् इच्छन्ती एति पत्युरन्तिकं याति, यः पतिः ईम् एनां महिषीं राज्ञीतुल्यां भार्यां वहाते स्वगृहं प्रति नयति। अस्य पत्युः रथः भार्यावहनप्रयोजनः स्यन्दनः भार्यायै आ श्रवस्यात् कीर्तिमानयेत् आ घोषात् च मधुरध्वनिं च कुर्यात्, पुरू अत्यधिकं सहस्रा सहस्राणि धनानि च परि वर्तयाते प्रापयेत् इत्याशीः।

तस्या एषाऽपरा भवति—

इयमग्ने नारी पतिं विदेष्ट सोमो हि राजा सुभगां कृणोति।
सुवानां पुत्रान् महिषीं भवाति गत्वा पतिं सुभगा वि राजतु॥

ऋग् 2.36.3

"हे अग्ने, इयम् अस्मदीया नारी कुमारी पतिं विदेष्ट विन्दतां लभताम्····। हि यस्मात् सोमो राजा सुभगां सौभाग्ययुक्तां कृणोति करोति ···। पतिलाभानन्तरं पुत्रान् सुवाना जनयन्ती····महिषी महनीया श्रेष्ठा भार्या भवाति भवतु····। इत्थं पतिं गत्वा लब्ध्वा सुभगा सौभाग्ययुक्ता सती विराजतु विशेषेण तेजस्विनी भवतु" इति सायणभाष्यम्।

तस्या एषा तृतीया—

यद् वाहिष्ठं तदग्नये बृहदर्च विभावसो।
महिषीव त्वद् रयिस्त्वद् वाजा उदीरते॥

ऋग् 5.25.7, यजु 26.12, साम 86, तै. 1.1.14-4, काठ. 39.14

अत्र महीधरः—हे उद्गातः, अग्नये अग्न्यर्थं तत् बृहत् साम अर्च गाय बृहत्साग्नो गानं कुरु। तत् किम्? यत् वाहिष्ठम् वाहयति प्रापयति इष्टमिति वाहयितृ ···अत्यन्तं वाहयितृ वाहिष्ठम्···। किं च सामगानेन प्रत्यक्षम् अग्निं ब्रूहि। किम्? हे विभावसो, विभा कान्तिरेव वसु धनं यस्य स विभावसुः, हे अग्ने, रयिः धनं वाजा अन्नानि च त्वत् त्वत्तः सकाशात् उदीरते उद्गच्छन्ति। तत्र दृष्टान्तः। महिषीव यथा महिषी[31] प्रथमपरिणीता स्त्री गृहात् भोगार्थं पतिं प्रति उदीर्ते उद्गच्छति····।[32] इति।

अरणिः

अरणिरपि महिष्युच्यते। तस्यैषा भवति—

कमेतं त्वं युवते कुमारं पेषी बिभर्षि महिषी जजान।
पूर्वीर्हि गर्भः शरदो ववर्धापश्यं जातं यदसूत माता॥

ऋग् 5.2.2

---

31. 'महिषीव यथा राज्ञी तथा' इति दयानन्दः।

32. अस्य स्थाने एतद् व्याख्यानमुचितं स्यात्—यथा महिषी परिणीता श्रेष्ठा भार्या धर्मार्थकाममोक्षप्रापकशुभकर्मकरणाय उदीर्ते उद्गच्छति।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निरत्र कुमारः, तस्य जन्मदात्री अरणिर्महिषी । अग्निं गर्भे धारयन्तीम् अरणिं प्रत्युच्यते । हे युवते अरणे, पेषी रूपवती, **'पेष इति रूपनाम पिंशतेः विपिंशितं भवति** (निरु. 8.11)' इति निरुक्तम्, तद्वती त्वं कम् एतं कुमारं बिभर्षि गर्भे धारयसि । ततश्च अग्निरूपं पुत्रम् उत्पादितवतीम् अरणिं दृष्ट्वा उच्यते । अहो, पश्यत, महिषी महतीयम् अरणिः जजान अग्निम् सुषुवे । गर्भः अग्निरूपो गर्भः अरण्यां पूर्वीः हि शरदः पूर्वान् अनेकान् संवत्सरान् ववर्ध ववृधे । साम्प्रतं यत् यदा माता अरणिः असूत अग्निरूपं पुत्रम् जनयामास तदा जातम् उत्पन्नं तम् पुत्रम् अहम् अपश्यम् पश्यामि ।[33]

पशुः

'भैंस' इत्याख्यः स्त्रीपशुविशेषोऽपि महिषीत्युच्यते । यथा यजुर्वेदीय-काठक-संहितायाम्—**"देवाश्च वा असुराश्च संयत्ता आसंस्तान् यदस्यास्तेजो यज्ञियमासीत् तत् ततृ सिंहीरूपमिव महिषीरूपमिव भूत्वान्तरातिष्ठत्"** (काठ 25.6) इत्यादि ।

उपसंहारः

एवमस्माभिर्वैदिकसंहितासु पुंस्त्रीरूपयोः प्रयुज्यमानस्य महिषशब्दस्य विशेष्यार्था निरूपिताः । 'महान्, वृद्धिमान्, पूजनीयः' इति मूलार्थमादाय बहवः पदार्था महिष-महिषीशब्दाभ्याम् अभिहिताः तत्र केचिदर्थास्तु स्वयं संहितास्वेव विशेष्यत्वेन प्रतिपादिताः केचिच्च भाष्यकारैर्व्याख्याताः । एतदतिरिक्ता येऽर्था लौकिकसंस्कृतग्रन्थेषु काव्यपुराणादिषु समुपलभ्यन्ते तदर्थे महिषशब्दो वैदिकसंहितासु न प्रयुक्तः ।

---

33. सायणोऽप्यरणिपरमेव व्याचख्यौ—'महिषी महती पूजनीयाऽरणिः' इति । परं तस्य मन्त्र-व्याख्यानं किंचिद् भिद्यते ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७. वराहः

पौराणिकसाहित्ये वराहः सलु विष्णोरवतारेषु प्रसिद्धः। हिरण्याक्षो नाम असुरः पृथिवीमपहृत्य पातालमनयत्। तदा विष्णुर्वराहरूपः सन्नेकेनैव दन्तेन पृथिवीमुद्धृत्य समुद्राद् बहिरानीतवान् शेषनागस्य मस्तके च तां स्थापितवानिति पौराणिकी कथा।[1] वराहस्य विष्णोरवतारत्वं वेदेषु नोपलभ्यते।

शब्दार्थकोशेषु वराहशब्दस्य नैकेऽर्थाः परिगणिताः, तद्यथा—शूकरः, वराहावतारो विष्णुः, मानभेदः, पर्वतभेदः, मुस्ता, शिशुमारः, मेषः, बलीवर्दः, मेघः, शूकराकृतिसैन्यव्यूहः, वाराहीकन्दः, पुराणविशेषः, अष्टादशद्वीपान्तर्गतक्षुद्रद्वीपविशेषः, वराहमिहिरो नाम ज्योतिर्वित्, कृष्णपिण्डीरः, वराहकर्णो नाम बाणविशेषः, वराहकल्पः[2]। वेदेषु कस्मिन्नर्थे शब्दोऽयं प्रयुक्त इति तावन्निरूप्यते। यास्कीयनिरुक्ते शूकरः, मेघः, अंगिरसः इति त्रयोऽर्था वराहस्य प्रतिपादिताः, पर्वतवाचकोऽप्ययं स्वीकृतः। वराहवश्च माध्यमिका देवगणा उक्ताः।[3]

शूकर :

शूकरो वराह उच्यते। **"अयमपि इतरो वराहः (शूकरः) एतस्माद् (वराहारात्) एव। बृहति मूलानि वरं वरं मूलं बृहतीति वा"** इति निरुक्तम् (5.4)। वन्यमुस्तादिवराहारग्रहणाद् वराहः। यद्वा बृहधातोः बर्हः, आकारागमे वराहः। यद्वा वरोपपदाद् वृहधातोः "वरवर्हं" तस्य वराहः। **"वराय अभीष्टाय मुस्तादिलाभाय आहन्ति (खनति) भूमिम्"** इति वाचस्पत्यम्। वरोपपदाद् आङ्पूर्वाद् हन्धातोर्डः-प्रत्ययः। तस्यैषा भवति—

वराहो वेद वीरुधं नकुलो वेद भेषजीम्।
सर्पा गन्धर्वा या विदुस्ता अस्मा अवसे हुवे॥

अथर्व 8.7.23

ओषधीसूक्ते चिकित्सकस्योक्तिरियम्। वराहः वन्यः शूकरः वीरुधम् ओषधीं वेद जानाति, नकुलः 'नेवला' इत्याख्यो जन्तुरपि भेषजीम् औषधं वेद वेत्ति। याश्च ओषधीः सर्पाः नागाः गन्धर्वाः, अन्ये च बिलेशया जन्तवः, गोषु भूमिषु बिलं कृत्वा

---

1. भाग. 1.3.7; 2.7.1; 3.13.31, लिग. 1.94, वायु 97.7, ह. वं. 1.41. पद्म उ. 169.237
2. अनेकार्थसंग्रहः 3.811,12; हलायुधकोशः; हिन्दीसमिति, लखनऊ, आप्टेकृतः संस्कृत-इंगलिशकोशः
3. निरु. 5.4 किंच मेघवाचिनां पदानां व्याख्यानप्रसंगे निरुक्तकार आह "आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामभि" रिति निरु. 2.22। तेषु वराहशब्दस्यापि पाठात् वराहशब्दोऽपि मेघपर्वतोभयवाचकः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धरन्ति स्वजीवनमिति गन्धर्वाः, विदुः जानन्ति, ताः ओषधीः अहम् अस्मै रुग्णाय अवसे रक्षणाय हुवे आह्वयामि । वराहादीनां प्राणिनां नैसर्गिकज्ञानमिदं कस्मै रोगाय कतमा ओषधी सेवनीयेति । ते च वैद्यं विनैव स्वयमेवापेक्षितभेषजसेवनेन व्याधिमुक्ता जायन्ते । तथैवाहमपि सर्वा औषधीः तासां गुणं सेवनविधिं च वेद्मि, रुग्णाय च प्रयच्छामीति । निरुक्ते **वराहमिन्द्र एमुषम्** ऋग् 8.77.10 इत्युदाहृतम् । तत् परस्तात् व्याख्यास्यामः ।

मेघः पर्वतो वा

मेघोऽपि वराह उच्यते । तथा च निघण्टौ (1.10). मेघनामसु पठितः । **"वराहो मेघो भवति वराहारः, वरमाहारमाहार्षीरिति च ब्राह्मणम्"** इति निरुक्तम् (5.4) । मेघः खलु उदकरूपं वरमाहारं प्रयच्छति, यदा वृष्टिप्रदानेन ओषधिवनस्पति-कृषिशस्योत्पत्तौ निमित्ततां व्रजन् वरमाहारमुत्पादयतीति वराहारः, तस्माद् वराह उच्यते । सायणस्त्वाह-वरमुदकमाहारो यस्य, यद्वा वरमाहरतीति वराहारः सन् पृषोदरादित्वात् वराह इत्युच्यते ।[4] तस्यैषा निरुक्ते समुदाहृता—

अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना ।
मुषायद् विष्णुः पचतं सहीयान् विध्यद् वराहं तिरो अद्रिमस्ता ॥

ऋग् 1.61.7; अथर्व 20.35.7

इन्द्रो देवता । स च सूर्यः, स एव तृतीयचरणे विष्णुरप्युदीरितः, स्वकिरणैर्लोक-त्रयव्याप्तिमत्वात् । सवनेषु अहोरात्रमासत्वादियज्ञेषु प्रवर्तमानेषु सद्यः सपदि अस्येदु अस्यैव मातुः निर्मातुरिन्द्रस्य सूर्यस्य माहात्म्यं वर्ण्यते, तच्छृणुत । अयम् इन्द्राख्यः सूर्यः वृष्टिहेतोः महः पितुं महत् जलं पपिवान् स्वरश्मिभिः पीतवान् भवति, जलं पीत्वा तद्वर्षणेन चारु अन्ना चारूणि अन्नानि चोत्पादयति । वृष्टिप्रकार एवोच्यते—सहीयान् अतिशयेन अभिभवसामर्थ्ययुक्तः विष्णुः व्याप्तिमान् स सूर्यः पचतं परिपक्वं वाष्पीभूतं जलं मुषायत् अपहरति अपहृत्य आकाशं नयति । ततश्च यदा तद् वाष्पीभूतं जलं गगनं गत्वा कृष्णमेघो भूत्वा वराहाकारतां प्राप्तः कृष्णवराहवद् इतस्ततो धावति तदा अद्रिम् विद्युद्वज्रं तिरः तिरश्चीनम् अस्ता प्रक्षेप्ता सन् तं वराहं मेघं विध्यत विध्यति वृष्ट्यर्थं विदारयति ।

तस्यैषाऽपरा भवति मेघस्य वा भूदारस्य वा पर्वतस्य वा ।

विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः ।
शतं महिषान् क्षीरपाकमोदनं वराहमिन्द्र एमुषम् ॥

ऋग् 8.77.10

---

4. अध उदीरितस्य ऋग् 1.61.7 मन्त्रस्यैव भाष्ये ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रो देवता। सायणोऽस्या ऋचो नैरुक्तैतिहासिकमतभेदेन द्विधा योजनां चकार। नैरुक्तपक्षोऽत्र दीयते—"हे इन्द्र[5], ता तानि यानि त्वया स्रष्टव्यान्युदकानि सन्ति तानि विष्णुः व्यापनशील आदित्यः आभरत् आभरति, लोकाय प्रयच्छतीत्यर्थः। कीदृशो विष्णुः? उरुक्रमः बहुगतिः। किं स्वविरोधेन? नेत्याह। त्वेषितः त्वया प्रेरितः। न केवलमुदकान्येव, अपि च शतं महिषान् शतसंख्याकान् पशून्। महिषशब्दो गवादेरप्युपलक्षकः। अथवा शतशब्दोऽपरिमितवचनो, महिष इति महन्नाम असंख्यातान् महतो यज्ञान् यजमानेभ्य आभरत् ददातीत्यर्थः। किं च क्षीरपाकं क्षीरपक्वम् ओदनं पायसम्। एतच्चरुपुरोडाशादेरुपलक्षकम्। तद् यजमानेभ्य आभरत्। अथवा सर्वार्थं वृष्टिप्रदानद्वारौदनं प्राहरत्। किंच इन्द्रः वराहं जलपूर्णं मेघं हन्तीति शेषः। कीदृशं तम्? एमुषम्, आ इत्यस्य स्थाने छान्दस एकारः। आमुषमुदकस्य मोषकमित्यर्थः।" इति सायणः।

निरुक्तकारस्तु वराहशब्दस्य भूदारवाचकत्वे मन्त्रमेतम् उदाजहार। केचित्तु वराहशब्दोऽत्र यास्केन पर्वतार्थे गृहीत इत्याहुः।[6] पर्वतपक्षे तु एमुषं स्वाभ्यन्तरे स्वर्ण-लोहादिधातूनाम् इतरेषां खनिजानां स्रोतसां च मोषयितारं गोपकं वराहं वराहारयुक्तं पर्वतमिति योजनीयम्।

अथैषापि भवति मेघस्य वा भूदारस्य वा—

इदं सु मे जरितराचिकिद्धि प्रतीपं शापं नद्यो वहन्ति।
लोपाशः सिंहं प्रत्यञ्चमत्साः क्रोष्टा वराहं निरतक्त कक्षात्॥

ऋग् 10. 28. 4

इन्द्रो वसुक्रं ब्रवीति[7]। इन्द्रः परमेश्वरः, वसु अध्यात्मधनं क्रीणातीति वसुक्रो जरिता स्तोतेति यावत्। हे जरितः स्तोतः, इदम् एतन्माहात्म्यं सु सम्यग् मे मम आचिकिद्धि जानीहि। किम्? नद्यः सरितः प्रतीपं विपरीतम् अधःप्रदेशादुपरिप्रदेशं प्रति शापं सलिलं वहन्ति नयन्ति। लोपाशः[8] मृगः प्रत्यञ्चम् आत्मानं प्रति आगच्छन्तं सिंहम् अत्साः जिघत्सति। क्रोष्टा शृगालः वराहं भूदारं कक्षात् गहनकुञ्जात् निरतक्त निर्गमयति। मदीयमाहात्म्याद् असंभवमपि संभवं भवितुमर्हतीत्यर्थः। इयं प्रहेलिका। समाधानं त्वेवं स्यात् नद्यः शरीरस्य रक्तवाहिन्यो नाड्यः, ताः अधस्तादुपरि रक्तोदकं

---

5. इन्दोऽत्र परमेश्वरो ग्राह्यः, सत्प्रेरणया विष्णुरादित्यः मन्त्रोक्तं कार्यजातमाचरति, यद्यपि सायणस्य तथा नाभिमतं स्यात् पृथग्देवताकल्पनात्।
6. द्रष्टव्यं श्रीचन्द्रमणिविद्यालंकारकृतं वेदार्थदीपकनि क्तभाष्यम्। स्वामिब्रह्ममुनिपरिव्राजककृतो निरुक्तसम्मर्शोऽप्यवलोकनीयः।
7. सायणेन तु वसुक्रवाक्यमिदं स्वीकृतम्। तन्न विचारसहम्।
8. लुप्यमानं तृणमश्नातीति लोपाशो मृगः। सायणः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवहन्ति । सिंहः अग्निः[9] मृगो जलम् । जलम् अग्निं भक्षयति, शमयति । क्रोष्टा मध्यस्थाना विद्युत्, वराहो मेघः । विद्युन्मेघं कक्षात् अन्तरिक्षात् निर्गमयति । एवं वराहशब्दोऽत्र श्लेषेण द्व्यर्थकः, भूदारपरो मेघपरश्च ।

सोमः

सोमोऽपि वराह उच्यते । वराय श्रेष्ठाय कर्मणे यज्ञाय स आह्रियते । वरः श्रेष्ठः आहारो वा, यो हि स्वादुर्मधुमान् रसवान् तीव्रः, यश्च सेवितः सन् शारीरं मानसं च बलं वर्द्धयति, मनीषां च उदियर्ति[10] । तस्यैषा भवति—

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥

ऋग् 9. 97. 7

पवमानः सोमो देवता । काव्यं वेदकाव्यं ब्रुवाणः गायन् उशना इव वष्टि परमेशं कामयते इत्युशना, वश कान्तौ, परब्रह्मासक्तः स्तोता इव, देवः दिव्यगुणयुक्तः सोमः सोमलतासमूहः देवानां चान्द्रतिथीनां जनिं जन्म विवक्ति सूचयति, सोमलतासमूहमवलोक्य कतमा चान्द्रमसी तिथिरिति सुज्ञायते इत्यर्थः सोमलतापत्राणां चान्द्रतिथ्यनुगामित्वात् । यथोक्तं सुश्रुते[11]—

सर्वेषामेव सोमानां पत्राणि दश पञ्च च ।
तानि शुक्ले च कृष्णे च जायन्ते निपतन्ति ॥
एकैकं जायते पत्रं सोमस्याहरहस्तदा ।
शुक्लस्य पौर्णमास्यां तु भवत् पञ्चदशच्छदः ॥
शीर्यते पत्रमेकैकं दिवसे दिवसे पुनः ।
कृष्णपक्षक्षये चापि लता भवति केवला ॥

किं च महिव्रतः महि महद् व्रतं कर्म यज्ञरूपं यस्य सः, शुचिबन्धुः शुचीनां निर्मलानां गोपयसां यवरसानां वा बन्धुः, तेषां तत्र मिश्रणात् । पावकः मलानां शोधकः वराहः सोमरसः रेभन् क्षारणकाले धारापातशब्दं कुर्वन् पदा पदानि पात्राणि अभ्येति गच्छति । सायणोऽत्र सोमार्थे वराहशब्दमेवं निर्वक्ति—**वरं च तदहश्च वराहः, राजाहः सखिभ्यष्टच् इति टच् समासान्तः, तस्मिन्नहनि अभिषूयमाणत्वेन तद्वान्, अर्शआदित्वात् मत्वर्थीयोऽच्, तादृशः सोम** इति ।

---

9. प्रतीची सिंहं प्रति जोषयेते, ऋग् 1.95 5 अत्र अग्निः सिंहनाम्ना स्मृतः ।
10. ऋग् 6.47.1, 3
11. सुश्रुतम्, चिकित्सितस्थानम्, 29.20-22

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असुरः

असुरोऽपि वराह उच्यते । वरं श्रेष्ठं वस्तु आ समन्तात् हन्ति विनाशयतीत्यतः । तस्यैषा भवति—

स इद् दासं तुवीरवं पतिर्दन् षळक्षं त्रिशीर्षाणं दमन्यत् ।
अस्य त्रितो न्वोजसा वृधानो विपा वराहमयो अग्रया हन् ॥

ऋग् 10. 99. 6

इन्द्रो देवता । पतिः सर्वेषामधिपतिः स इन्द्रः परमेश्वरः तुवीरवं बहुविधम् कर्कशशब्दं कुर्वाणं दासं दस्युं गर्दभासुरं कर्कशप्रलापिका गर्दभप्रवृत्तिमित्यर्थः दन् दमयन्—उक्तं चान्यत्र, 'समिन्द्र गर्दभं मृण नुवन्तं पापयामुया, ऋग् 1.29.5" इति—षळक्षं कामक्रोधादिषड्रिपुरूपषण्नेत्रोपेतं त्रिशीर्षाणं तापत्रयरूपत्रिशिरस्कं पापासुरं दमन्यत् अवधीत् । अस्य परमात्मनः ओजसा बलेन वृधानः वर्धमानः त्रितः शारीरमानसप्राणिकबलत्रययुक्तो जीवात्मापि अयो अग्रया लोहकीलकवत् तीक्ष्णया विपा विवेकबुद्या वराहं सद्विचारविघातकम् असद्विचाररूपम् वराहासुरं हन् निजघान ।

अंगिरसः मरुतो वा ।

अङ्गिरसोऽपि वराहा उच्यन्ते इति निरुक्तम् (5.4) । तदभिवादिन्येषा तत्रैवोक्ता—

स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः ।
ब्रह्मणस्पतिर्वृषभिर्वराहैरघर्मस्वेदेभिर्द्रविणं व्यानट् ॥

ऋग् 10.67.7 अथर्व 20.91.7
मै. 4.14.10

बृहस्पतिर्देवता । स ब्रह्मणस्पतिः ब्रह्मणः उदकस्य पाता वा पालयिता वा बृहस्पतिः सूर्यः सत्येभिः सत्यनियमवद्भिः सखिभिः समानधर्मकैः शुचद्भिः दीप्यमानैः धनसैः प्रकाशदीर्घायुष्यादिधनस्य संभक्तृभिः वृषभिः वृष्टिकरैः घर्मस्वेदेभिः घर्मात् तापात् स्वेदो यैस्तैः तापवशात् गात्रेषु स्वेदोत्पादकैः वराहैः वरस्य उदकस्य आहर्तृभिः वराहारजनकैः, वरेण स्वज्योतिषा तमसां हरणशीलैर्हननशीलैर्वा अंगिरोभिः रश्मिभिः गोधायसं गवाम् उदकानां धारकं मेघं वि अदर्दः विशेषेण विदारितवान्, द्रविणं वृष्ट्युदकरूपं धनं च व्यानट् भूमो प्रसारितवान् इत्यधिदैवतम् ।

अथाध्यात्मम् । स ब्रह्मणस्पतिः ब्रह्मणः ज्ञानस्य पतिः जीवात्मा सत्येभिः सत्यैः सखिभिः मित्रभूतैः शुचद्भिः पवित्रैः धनसैः अष्टसिद्धिरूपधनप्रदायकैः वृषभिः ब्रह्मानन्दं वर्षद्भिः धर्मस्वेदेभिः प्राणायामपरायणं कदाचित् स्विन्नगात्रं कुर्वद्भिः, वराहैः वरस्य श्रेष्ठफलस्याहर्तृभिः अङ्गिरोभिः प्राणैः, **प्राणो वा अङ्गिराः श. ब्रा. 6.1,2.28'** इति शातपथोक्तेः गोधायसं गवां ज्योतिष्मतीनां प्रवृत्तीनामवरोधकं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याधिस्त्यानसंशयप्रमादालस्यादिरूपम् अन्तरायजातं वि अदर्दः विदारयति, द्रविणं मोक्षानन्दरूपं फलं च व्यानट् विस्तारयति ।

अथ मरुत्पक्षेऽपि योजनीयम् ।[12] स ब्रह्मणस्पतिः माध्यमिको विद्युद्देवः सत्येभिः प्राकृतिकसत्यनियमानुसारं प्रवहद्भिः सखिभिः सहायभूतैः शुचद्भिः पवित्रैः धनसैः स्वास्थ्यप्रदायकैः वृषभिः वृष्टिकरैः घर्मस्वेदिभिः क्षरदुदकैः वराहैः वराहर्तृभिः मरुद्भिः गोधायसं जलाधारं मेघं वि अदर्दः व्यदारयत्, द्रविणं तत्र निहितम् उदकरूपं धनं च व्यानट् प्रायच्छत् । यथैष मन्त्रवर्णः—

अश्नापिनद्धं मधु पर्यपश्यद् मत्स्यं न दीन उदनि क्षियन्तम् ।
निष्टज्जभार चमसं न वृक्षाद् बृहस्पतिर्वि रवेणा विकृत्य ॥

ऋग् 10.68.8

रुद्र :

रुद्रोऽपि वराह उच्यते, स हि दिवो वराहः । मध्यमस्थानत्वाद् रुद्रो वायुः प्राणो वा । स दिवः अन्तरिक्षस्य वराहः, अन्तरिक्षसंचारित्वात् । वराहः पुनः योगिनां वराहारत्वाद् वराहवत् संचरणशीलत्वाद् वा । तस्यैषा भवति—

दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद् भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥

ऋग् 1.114.5

दिवः अन्तरिक्षस्य मध्यस्थस्य प्राणमयकोशस्य वा वराहं वराहरूपं रुद्रं वातं प्राणं वा वयं नमसा हविषा, हविर्दानपूर्वकम् नि ह्वयामहे स्वोपयोगाय नितराम् अकारयामः । कीदृशम् अरुषम् अहिंसकम्, कपर्दिनं केशिनम् । सूर्योऽग्निर्वायुः त्रयोऽप्येते केशिनः, सूर्यः रश्मिकेशैः केशी, अग्निः धूमकेशैर्ज्वालाकेशैर्वा केशी, वायुः रजोरूपकेशैः केशी । उक्तं च यास्केन—केशी केशा रश्मयस्तैस्तद्वान् भवति····**अथाप्येते इतरे ज्योतिषी केशिनी उच्येते, धूमेनाग्नी रजसा च मध्यमः** (निरु. 12.27) प्राणपक्षे कपर्दिनं शीर्षण्यं **'शीर्षन् प्राणो हितः'** जै. ब्रा. 12.415 इति वचनात् । त्वेषं तीव्रं वेगवन्तं, रूपं रूपप्रदायकं, रूप रूपक्रियायां चुरादिः, रूपस्य दर्शनं करणं वा वा रूपक्रिया, सं दिवो वराहः रुद्रः हस्ते स्वकीये पाणौ स्वाभ्यन्तरे इत्यर्थः, वार्याणि वरणीयानि रोगनिवारकाणि वा भेषजा भैषज्यानि बिभ्रत् धारयन् अस्मभ्यं शर्म आरोग्यलक्षणं सुखं, वर्म रोगाणामाक्रमणात् स्वात्मानं परित्रातुं कवचरूपं प्रतिरोधसामर्थ्यं, छर्दिः, प्राप्तरोगाणां वमनसामर्थ्यं च, छर्द वमने यंसत् प्रयच्छेत् । वायुचिकित्सया प्राणायामेन च सर्वे रोगा अपह्रियन्ते इति प्रसिद्धम् । यथोक्तम्—

12. सायणो मरुत्पक्षं गृह्णाति ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आ वात वाहि भेषजं वि वात वाहि यद् रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥

ऋग् 10.137.3

या ते प्राण प्रिया तनूर्यो ते प्राण प्रेयसी ।
अथो यद् भेषजं तव तस्य नो धेहि जीवसे ॥

अथर्व 11.4.9

दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥

मनु. 3. 72

वराहेण संविदाना पृथिवी

वराहप्रसङ्गेऽथर्ववेदीयपृथिवीसूक्तस्य मन्त्र एष विचारणीयः—

मल्वं बिभ्रती गुरुभृद् भद्रपापस्य निधनं तितिक्षुः ।
वराहेण पृथिवी संविदाना सूकराय विजिहीते मृगाय ॥

अथर्व 12. 1. 48

पृथिवी वर्ण्यते मल्वं गुरितरं लघु वस्तु बिभ्रती धारयन्ती गुरुभृत् भारवद् वस्तुजातं शिलोच्चयादिकं च दधाना, भद्रपापस्य भद्रः सज्जनः पापः पापात्मा च तस्योभयस्य निधनं मरणं तितिक्षुः सहमाना, वराहेण मेघेन संविदाना संयुक्ता पृथिवी सूकराय शोभनकिरणाय मृगाय शोधकाय सूर्याय, तादृशं सूर्यं परित इत्यर्थं विजिहीते विशेषेण गच्छति परिक्रामति । "वराहेण संविदाना" इति कथनेन पृथिवी स्वकीयेन वातावरणेन सहैव सूर्यं परितो गच्छतीति सूच्यते ।

प्रजापतिरपि वराह उच्यते । स हि सृष्ट्यादौ अपां गर्भात् पृथिवीमाहरत् । सैषा कथा तैत्तिरीयसंहितायामुपलभ्यते—"**आपो वा इदम् अग्रे सलिलम् आसीत् । तस्मिन् प्रजापतिः वायुर्भूत्वाऽचरत् । स इमामपश्यत् । तां वराहो भूत्वाऽहरत् । तां विश्वकर्मा भूत्वा व्यमार्ट् । साऽप्रथत, सा पृथिव्यभवत्,** तै. 7. 1. 5. 1 [13] । आलङ्कारिकीयं कथा । वराहः पशुर्यदा पल्वलेभ्यो मुस्तादिकम् उद्धरति तदा तन्मुखाग्रे आर्द्रा मृत् संसज्यते, तथैव प्रजापतिः परमेश्वरः अपां गर्भात् पृथिवीमुद्धरन् वराहत्वेन कल्प्यते । वराहो भूत्वा स भूमिं बहिराहरत् । तस्मिन् काले भूमिः पंकिला बभूव । ततश्च विश्व-

13. तुलनीयम् : काठ. 8.2, श. ब्रा. 14.1.2.11

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मा भूत्वा, कुशलः शिल्पी सन्नित्यर्थः, स तां प्रामार्जयत्, अप्रथयच्च, ततः प्रथनात् सा पृथिवी अभवत् ।

तैत्तिरीयब्राह्मणेऽपि कथेयं प्रकारान्तरेण समागच्छति—"**आपो वा इदमग्रे सलिलम् आसीत् । तेन प्रजापतिरश्राम्यत्-कथमिदं स्यादिति । सोऽपश्यत् पुष्करपर्णं तिष्ठत् । सोऽमन्यत—अस्ति वै तत् यस्मिन्निदम् अधितिष्ठतीति । स वराहो रूपं कृत्वा उपन्यमज्जत् । स पृथिवीम् अधः आच्छीत् तस्या उपहत्य उदमज्जत् तत् पुष्करपर्णे प्रथयत् । यद् अप्रथयत् तत् पृथिव्यै पृथिवीत्वम्** (तै. ब्रा. 1. 1. 3. 5-7) ।" अत्रेदं सायणीयं भाष्यम्—"**इदमिदानीं दृश्यमानं गिरिनदीसमुद्रादिकं स्थावरं मनुष्यगवादिकं जंगमं च सृष्टेः पूर्वम् ईदृशं नासीत्, किन्तु सलिलरूपमासीत् ।....तदानीं प्रजापतिस्तेन सिसृक्षितजगन्निमित्तेन अश्राम्यत् पर्यालोचनरूपं तपोऽकुरुत । कथं नामेदं सर्वं जगद् भवेदिति विचार्य तस्य सलिलस्य मध्ये दीर्घनालाग्रेऽवस्थितमेकं पद्मपत्रमपश्यत् । तच्च दृष्ट्वा मनस्येवमतकर्यत् । यस्मिन्नाधारे इदं सनालं पद्मपत्रमधिश्रित्य तिष्ठति तद् वस्तु किंचद् अधस्ताद् अस्त्येवेति तर्कयित्वा च स प्रजापतिर्वराहो भूत्वा तदीयं रूपं च सम्यक् कृत्वा तस्य पद्मपत्रनालस्य समीपे जलमध्ये निमग्नोऽभूत् । मग्नश्चासौ अधस्ताद् भूमिं प्राप्तवान् । तस्याः भूमेः सकाशात् कियतीमपि आर्द्रां मृदं स्वदंष्ट्रया पृथक्कृत्य सलिलस्योपरि उन्मज्जनं कृत्वान् । तच्च मृद्रूपं पुष्करपर्णे प्रसारितवान् । यस्मादियं मृत्तिका प्रथिता तस्मात् पृथिवीनाम संपन्नम्**" इति ।

तैत्तिरीयसंहितावद् इयं कथाप्यालङ्कारगर्भा । पुष्करपर्णस्य कल्पनाऽत्र नूतना । पुष्करं नाम आकाशः, **पुष्करम् अन्तरिक्षम्** इति निरुक्तम् (5. 14.) । तत्पत्रे आकाशैकदेशे पृथिवीं प्रजापतिः अद्भ्यः उद्धृत्य प्रथयतीति समञ्जसम् ।

एतत्प्रामाण्यात् उपरितने मन्त्रे "पृथिवी वराहेण प्रजापतिना संविदाना" इत्यपि व्याख्यातुं शक्यते । पुराणप्रसिद्धवराहावतारस्य कल्पनायामिदमेव मूलं प्रतीयते ।

धनापहर्ता चौरः

तैत्तिरीयसंहितायां वराहश्चौरो निगदितः, स हि धनमपहृत्य सुदूरे सुगुप्ते च स्थाने निलीनं करोति—"**वराहोऽयं वाममोषः सप्तानां गिरीणां परस्ताद् वित्तं वेद्यम् असुराणां बिभर्त्ति** (तै. 6. 2. 4. 2. 1)" इन्द्रस्तं हन्ति । यज्ञरूपो विष्णुश्च धनं तत्सकाशादाहृत्य पुनर्यथास्थानं वितरति । एवं राष्ट्रे ये लुण्ठकाः सन्ति ते वराहाः, इन्द्रेण राज्ञा ते हन्तव्याः, तद्धस्तगतं धनं च यज्ञभावनया येषां तद धनं तेभ्यः समर्पणीयं स्वामिनोऽनुपलब्धौ च निर्धनेभ्यो वितरणीयमिति सूच्यते ।

एवं वराहशब्दस्यार्थविचारप्रसङ्गेऽस्माभिर्दृष्टं यद् वराहशब्दो वैदिकसंहितासु शूकरः, मेघः, पर्वतः, सोमः, असुरः, चौरः, अङ्गिरसः, मरुतः, रुद्रः, प्रजापतिरित्येतेष्वर्थेषु भाष्यकारैः स्वीकृतः । वराहशब्दसमकक्षमेव वराहुशब्दोऽपि वेदे प्रयुक्तः, सोऽपि परीक्ष्यते ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वराहुः

शब्दोऽयं वेदेषु ऋग्वेद एव समुपलभ्यते, तत्रापि च द्वयोरेव स्थलयोः । तयोरेकतरं निरुक्ते पूर्वोद्धृते वराहप्रसङ्गे (5. 4) यास्केन समुद्धृतम्, अर्थश्चापि प्रतिपादितः—"**अथाप्येते माध्यमिका देवगणा वराहव उच्यन्ते**" इति मन्त्रस्त्वेवम्—

एतत् त्यन्न योजनमचेति सखर्हं यन्मरुतो गोतमो वः ।
पश्यन् हिरण्यचक्रानयोदंष्ट्रान् विधावतो वराहून् ॥

ऋग् 1. 88. 5

गोतम ऋषिः, मरुतो देवता । मन्त्रो यास्केन न व्याख्यातः । मरुद्रथा अत्र वराहवः उक्ताः लक्षणया । वराहुशब्दः स्कन्देनैवं निरुक्तः—"**वराहून् वरमुत्कृष्टं श्रेष्ठमिति पर्यायाः । हु शब्दोऽपि हन्तेर्वा ह्वयतेर्वा हरतेर्वा जुहोतेर्वाऽदनार्थस्य । उत्कृष्टस्य शत्रोः हर्तॄन् आह्वातॄन् वा उदकस्य वाऽहर्तॄन् हविषो वा भक्षयितॄन्**" इति । सायणोपि प्रकारान्तरेण तथैवाह—"**वरस्योत्कृष्टस्य शत्रोर्हन्तॄन्, यद्वा उत्कृष्टस्य वृष्ट्युदकस्याहर्तॄन्, अथवा उत्कृष्टानां देवतानामाह्वातॄन् वरस्य हविषो भक्षयितॄन् वा**" इति । अथ मन्त्रार्थः । हे मरुतः वायवः एतत् त्यत् तत् पूर्ववर्णितम् "**आ विद्युन्मद्भिर्मरुतः स्वर्कं रथेभिर्याति ऋष्टिमद्भिरश्वपर्णैः** (मन्त्रः प्रथमः)" इत्यादिप्रकारकं योजनं रथादौ नियोजनम् अस्माभिः न अचेति न ज्ञायते किम् ? अपितु ज्ञायत एव । कीदृशं योजनम् ? यत् वः योजनं गोतमः **गौरिति स्तोतृनाम** (नि. 3.16) प्रतिशयेन गौः गोतमः अतितरां सकलविद्यास्तोता जनः सस्वः [14] ह वर्णयति खलु । कथम् ? हिरण्यचक्रान् विद्युच्चक्रमयान् अयोदंष्ट्रान् लोहयन्त्रयुक्तान् वराहून् मरुद्रथान् पश्यन् अवलोकमानः । यदा स्तोता पश्यति यदहो मरुद्रथाः अथं मनोवेगेन धावन्ति तदा सहसा तन्मुखात् प्रशंसावचनानि निःसरन्तीति भावः ।

वृत्रोऽपि वराहुरुच्यते । तस्यैषा भवति—

अनु त्वा मही पाजसी अचक्रे द्यावाक्षामा मदतामिन्द्र कर्मन् ।
त्वं वृत्रमाशयानं सिरासु महो वज्रेण सिष्वपो वराहुम् ॥

ऋग् 1.121.11

इन्द्रो देवता । इन्द्रस्य वृत्रवधः श्रुतिषु प्रसिद्ध एव । वृत्रो मेघ इत्यधिदैवतम् । हे इन्द्र सूर्य, कर्मन् वृत्रवधकर्मणि महो महत्यौ पाजसी बलवत्यौ अचक्रे अचङ्क्रमणे स्थिरे द्यावाक्षामा द्यावापृथिव्यौ त्वा अनुमदताम् अनुमोदितवत्यौ । महः महान् त्वं

14. सस्वः अन्तर्हितम् इति स्कन्दः । सस्वर्ह उच्चारितवान् खलु, स्वृ शब्दोपतापयोः, लङि तिपि बहुलं छन्दसीति शपः श्लुः, गुणे हल्ङ्याब्भ्यः इति तलोपः, धातुस्वरेणान्तोदात्तत्वम् इति सायणः । सस्वः उपदिशति इति दयानन्दः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिरासु आकाशनदीषु, **सीरा इति नदीनाम** (नि, 1.13), छान्दसं ह्रस्वत्वम्, आशयानं तिष्ठन्तं वराहुं वराहाकारं वराहारं वा वृत्रं मेघं वज्रेण रश्मिसमूहरूपेणायुधेन सिष्वपः अस्वापयः, हत्वा भूमौ पातितवानित्यर्थः ।

अथाधिभूतम् । इन्द्रो राजा, वराहवो वृत्राश्च राष्ट्रे प्रच्छन्ना दस्यवो लुण्ठकाश्चौरास्तस्कराश्च । द्यावाक्षामा राष्ट्रवासिनः स्त्रीपुरुषाः । हे राजन्, त्वं सिरासु प्रजासु आशयानं प्रच्छन्नरूपेण विद्यमानं वराहुं वृत्रं वरस्य श्रेष्ठस्य राष्ट्रोत्थानस्य आहन्तारं विघातकं दस्युं वज्रेण सिष्वपः दण्डेन दण्डयसि, तस्मिन् कर्मणि च सर्वेऽपि राष्ट्रवासिनस्त्वामनुमन्यन्ते इति भावः ।

एवं वराहो वराहुश्चेति प्रत्ययमात्रभदेन शब्दद्वयम् एकार्थवाचकम् इत्युन्नेयम् । निरुक्तेऽपि वराहुशब्दो वराहप्रकरणे व्याख्यातः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. सुरा

सुरा शब्दो लोके बाहुल्येन मदिरार्थे प्रयुज्यते शब्दार्थकोशेषु मद्यं, जलं, चषकः, सर्पविशेषः इति चत्वारोऽर्थाः सुराशब्दस्य परिगणिताः[1]। वैदिकनिघण्टुकोशे उदकनामसु सुराशब्दः पठितः (1. 12)। वैयाकरणसम्प्रदाये षुञ् अभिषवे इति धातोः **"सुसूधाञ्गृधिभ्यः क्रन्** उ. 2. 25" इति क्रन्प्रत्यये, स्त्रियां टापि शब्दोऽयं साध्यते। सूयते इति सुरा। यद्वा सुष्ठु राति याम् (रा दाने), अथवा सु अतीव रायन्त्यनया (रै शब्दे), सा सुरा, **"अातश्चोपसर्गे"** पा. 3.3.106 इति कः। सुरा शब्दो वेदेषु प्रशस्तार्थे निन्दितार्थे चोभयथापि प्राप्यते।

सौत्रामण्यां सुरापानम्

सौत्रामण्यां सोमेन सह संमिश्र्य सुरा पीयते। वाजसनेयिमाध्यन्दिनशुक्लयजुर्वेदस्य 19-21 अध्यायेषु सौत्रामणीयागो वर्णितः। सुरं सोमेन मिश्रयति— **स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेण अमृतां अमृतेन मधुमतीं मधुमता सृजामि सं सोमेन** (19.1) इति। सुरेयं स्वाद्वी, तीव्रा, अमृता, मधुमती च विद्यते। ननु केयं सुरा? अत्राह शतपथब्राह्मणम्—**"अपां च वा एष ओषधीनां च रसो यत् सुरा"** (श. ब्रा.12. 8.1.4.) ओषधयः काश्चन अद्भिः सह संमेल्य निश्च्योत्यन्ते, प्राप्तो रस एव सुरा। सोमलतायाश्च रसः सोमः, सोऽप्येवं वर्णितः—**"स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम्** (ऋग् 6.47.1)" इति। सुरया मिश्रितः सोमः किं करोतीत्युच्यते।

ब्रह्म क्षत्रं पवते तेज इन्द्रियꣳ सुरया सोमः सुत आसुतो मदाय॥

यजु 19. 5

सुतः अभिषुतः सोमः सोमरसः सुरया इतरैरेषौषधिरसात्मिक्या निष्पीडितया आसुतः मिश्रितः पीतः सन् मुदाय हर्षाय भवति। किंच ब्रह्म ब्राह्मणत्वं, क्षत्रं क्षत्रियत्वं, तेजः कान्तिम्, इन्द्रियम् इन्द्रियसामर्थ्यं च पवते जनयति।

सामान्यतः सोमरसाय सुरारसाय च पृथक् पृथगेव पात्राणि भवन्ति। सति प्रयोजने मिश्रणं क्रियते, न सर्वदा। अत उच्यते—

---

1. "सुरा चषकमद्ययोः" इत्यनेकार्थसंग्रहः (2.472)।

1. A spirituous liquor, wine, 2. water, 3. drinking vessel, 4. A snake —इत्याप्टेकोशः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाना हि वां देवहितꣳसदस्कृतं मा सꣳसृक्षाथां परमे व्योमन् ।
सुरा त्वमसि शुष्मिणी सोम एष मा मा हिꣳसीः स्वां योनिमाविशन्ती ॥

यजु 19. 7

हे सुरे सोम च, नाना हि पृथक् पृथगेव वां युवयोः सदः स्थानं कृतं निष्पादितं, यद् देवहितं देवैः ऋत्विग्भिः यजमानैर्वा हितं निहितम् अवस्थापितम् । अतः परमे उत्कृष्टे व्योमन् व्योमवद्विशाले हवनस्थाने युवां मा संसृक्षाथां संसर्गं मा कुरुतम् । हे सुरे, त्वं शुष्मिणी बलवती सुरा असि, एष च सोमः, त्वं स्वां योनिं स्वकीयं पात्रम् आविशन्ती गच्छन्ती मा मां मा हिंसीः । अत्राह महीधरः—'**आहवनीये पयो हूयते, दक्षिणाग्नौ सुरा हूयते, अतो न संसर्गः**' इति ।

सुरावान् हि सौत्रामणी यज्ञः—

सुरावन्तं बर्हिषदꣳ सुवीरं यज्ञꣳ हिन्वन्ति महिषा नमोभिः ।
दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ॥

यजु 19. 32

महिषा महान्तः ऋत्विजः यज्ञं सौत्रामणीसंज्ञं हिन्वन्ति वर्धयन्ति । किंभूतं यज्ञम् ? बर्हिषदं बर्हिषि सीदन्ति यजमानर्त्विजो यत्र तम् । तथा सुरावन्तं सुरा पूर्वोक्ता विद्यते यत्र तम् "**सुरावान् वा एष बर्हिषद् यज्ञो यत् सौत्रामणी** (श. ब्रा. 12. 8. 1.2) इति ह शतपथब्राह्मणम् । सुवीरं शोभना वीराः पुत्रादयो यत्र स्थिताः तम् । नमोभिः नमस्कारैः श्रद्धाभावैः हविरन्नैर्वा । दिवि द्योतनात्मके यज्ञे सोमं सोमरसं देवतासु देवेषु विद्वत्सु दधानाः स्थापयन्तः, तान् सोमरसं पाययन्तः, स्वर्काः शोभनमन्त्राः "**अर्को मन्त्रो भवति यदेनेन अर्चन्ति**" इति निरुक्तम् (5.4), इन्द्रं परमेश्वरं यजमानाः पूजयन्तो वयम् मदेम आनन्दं प्राप्नुयाम ।

अथ दक्षिणेऽग्नौ सुराग्रहान् जुहोति—

यस्ते रसः संभृत ओषधीषु सोमस्य शुष्मः सुरया सुतस्य ।
तेन जिन्व यजमानं मदेन सरस्वतीमश्विनाविन्द्रमग्निम् ॥

यजु 19. 33

हे सुरे, ओषधीषु वर्तमानो यः ते तव रसः संभृतः एकीकृतः, सुरया सह सुतस्य अभिषुतस्य सोमस्य च यः शुष्मः यद् बलम् मदेन आनन्दजनकेन तेन सुारसेन सोम-शुष्मेण च यजमानं जिन्व प्रीणीहि । न केवलं यजमानं किन्तु सरस्वतीम् अश्विनौ इन्द्रम् अग्निं चापि जिन्व प्रीणीहि ।

एतत्तु याज्ञिकविधिमनुसृत्योक्तम् । स्वामिदयानन्दमते त्वत्र सुरा शोभनदानशीला स्त्री । तत्कृतः पदार्थोऽन्वयमुखेन परिवर्त्य लिख्यते—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"हे विद्वन्, यस्ते ओषधीषु सोमलतादिषु वर्तमानस्य सुतस्य निष्पादितस्य सोमस्य अंशुमदादिसंज्ञस्य चतुर्विंशतिधा भिद्यमानस्य सुरया शोभनदानशीलया स्त्रिया संभृतः सम्यग् धृतः शुष्मः शुष्मं बलं विद्यते यस्मिन् सः रसः अस्ति तेन मदेन आनन्दप्रदेन रसेन यजमानं सर्वेभ्यः सुखं ददमानं यजमानं सरस्वतीं प्रशस्तविद्यायुक्तां स्त्रियम् अश्विनौ विद्याव्याप्तावध्यापकोपदेशकौ इन्द्रम् ऐश्वर्ययुक्तं सभासेनेशम् अग्निं पावकवच्छत्रुदाहकं योद्धारं च जिन्व प्रीणीहि ।"

अधस्तनकण्डिकायाः पूतसुरादाने विनियोगः—

सिञ्चन्ति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च ।
सुरायै बभ्रुवै मदे किंत्वो वदति किंत्वः ॥

यजु 20. 28

बभ्रुवै बभ्रुवर्णायै तस्यै सुरायै, षष्ठ्यर्थे चतुर्थी, सुरायाः मदे आनन्दे पाता खलु किंत्वः किंत्वः 'किं त्वं किं त्वम्,' अहो, कियद्विलक्षणगुणयुक्ता त्वम् इति वदति व्याहरति । याम् एतां सुरां सिञ्चन्ति पात्रे ऋत्विजः, परिषिञ्चन्ति पयआदिभिः, उत्सिञ्चन्ति ग्रहैः, पुनन्ति च गोवालपवित्रहिरण्यादिभिः ।

पशुबन्धनं सुरासोमपानं च

अथ पशुबन्धनसुरासोमपानविषयकमेतन्मन्त्रद्वयम् अवलोकनीयम्—

अग्निनद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोडाशान् ।
बध्नन्नश्विभ्यां छागꣳ सरस्वत्यै मेषमिन्द्राय ऋषभꣳ सुन्वन्नश्विभ्याꣳ
सरस्वत्या इन्द्राय सुत्राम्णे सुरासोमान् ॥ यजु 21.59

अयं यजमानः अद्य होतारं, हु दानादनयोः, अत्तारं हविषां दातारं च फलानाम्, अग्निं यज्ञाग्निम् अवृणीत वृतवान् । किं कुर्वन् ? पक्तीः पक्तव्यानि हवींषि पचन्, पुरोडाशान् व्रीहियवमयान् अपूपकांश्च पचन्, अश्विभ्यां मातापितृभ्यां छागम् अजम् अजां च, सरस्वत्यै नार्यै मेषम् मेषीं च, इन्द्राय पुरुषश्रेष्ठाय, ऋषभं वृषभं गां च सर्वत्र द्वयोरेकशेषः, बध्नन् पाशयन् । मातापितरौ अजम् अजां च परिपाल्य, नार्यो मेषं मेषीं च परिपाल्य, पुरुषाश्च वृषभं गां च परिपाल्य अजादुग्धं गोदुग्धम्, ऊर्णां च प्राप्नुवन्तु, वृषभांश्च कृष्यादिकर्मसु नियोजयन्ताम् एतदर्थमेतेषां पशूनां बन्धनमभिप्रेतम् । किं च अश्विभ्यां मातापितृभ्यां सरस्वत्यै नार्यै सुत्राम्णे रक्षकाय इन्द्राय पुरुषश्रेष्ठाय च सुरा-सोमान् सुरामिश्रितान् सोमान् सुन्वन् अभिषुण्वन् ।

यद्वा, **"मन एवेन्द्रः, वाक् सरस्वती, श्रोत्रे अश्विनौ"** इति वै शातपथी श्रुतिः (12. 9. 1. 13) । अश्विभ्यां श्रोत्राभ्यां छागं तद्विषयं शब्दम्, आच्छाद्यते आकाशे शब्दस्य आकाशगुणत्वात् इति शब्दः छादः, छाद एव छागः । सरस्वत्यै वाचे मेषं तद्विषयं वक्तव्यं शास्त्रादिकम्, उन्मेष्यते व्याख्यायते प्रज्ञया इति शास्त्रादिकं मेषः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्राय मनसे ऋषभं तद्विषयम् मननीयं वस्तुजातं, ऋषिः दर्शनार्थः, ऋष्यते दृश्यते मन्यते विचार्यते मनसा इति विचारणीयो विषयो ऋषभः, ऋषेरभच् प्रत्ययः, बध्नन् निश्चिन्वन् । किं च अश्विभ्यां श्रोत्राभ्यां, सरस्वत्यै वाचे, इन्द्राय मनसे च तेषां पुष्टचर्थमिति भावः सुरासोमान् सुन्वन् इत्यर्थो बोध्यः ।

सुपस्था अद्य देवो वनस्पतिरभवद् अश्विभ्यां छागेन सरस्वत्यै मेषेणेन्द्राय ऋषभेणाक्षंस्तान् मेदस्तः प्रति पचतागृभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः सुत्रामा सुरासोमान् ॥ यजु 21. 60

देवो दीप्यमानो वनस्पतिः वनानां पाता वा पालयिता वा अग्निः अद्य सूपस्थाः सुष्ठु उपतिष्ठते यज्ञमिति तादृशः अभवत्, अश्विभ्यां छागेन, सरस्वत्यै मेषेण, इन्द्राय ऋषभेण । एते अश्विप्रभृतयः पूर्वमन्त्रव्याख्याताः । तान् छागादीन् अक्षन् यथायोग्यम् उपभुक्तवन्तः । उपभोगोऽत्र यथोचितम् उपयोगो, न तु भक्षणम् । मेदस्तः अजगोक्षीरतः प्राप्तेन नवनीतेन पचता पचतानि परिपक्वानि अन्नानि प्रति अगृभीषत प्रत्यगृह्णन् पुरोडाशैश्च अवीवृधन्त परिपुष्टा जाताः । अश्विना अश्विनौ मातापितरौ, सरस्वती नारी, सुत्रामा इन्द्रः रक्षकः पुरुश्रेष्ठश्च सुरासोमान् अपुः पीतवन्तः ।

उवटमहीधराभ्यां त्तत्र छाग-मेष-ऋषभपशूनामेव तत्तद्देवतानामर्थाय यूपे बन्धनं ताभिर्देवताभिश्च तेषां भक्षणं स्वीकृतम् । **अक्षंस्तान् मेदस्तः प्रतिपचतागृभीषत'** इति मन्त्रांशं महीधर एवं व्याचख्यौ—**'अश्व्यादयो मेदस्तः मेदो वपामारभ्य तान् छागादीन् अक्षन् अभक्षयन् । पुनः पचना पच्यन्ते तानि पचता पचतानि पक्वानि अवदानानि (खण्डितानि अङ्गानि) अत्यगृभीषत प्रत्यगृह्णन्'** इति । तन्न ग्राह्यं वेदभावनाविरुद्धत्वात् ।

सुरासोमयोः अपरोऽर्थः

अथैतदपि मन्त्रयुगलं सुरासोमपानविषयकमेव—

युवं सुरामश्विना नमुचावासुरे सचा ।
विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥

ऋग् 10. 131. 4, यजु 10. 33, अथर्व 20. 125. 4

अत्रेयं शातपथी कथा । नमुचिर्नामासुर इन्द्रस्य इन्द्रियम् अन्नस्य रसं सोमस्य भक्षं सुरया सह पपौ । तत इन्द्रोऽश्विनौ सरस्वतीं चोवाच—अहं नमुचिना पीतववीर्योऽस्मि । ततोऽश्विनौ सरस्वती चापां फेनरूपं वज्रमिन्द्राय ददुः । तेनेन्द्रो नमुचेः शिरश्चिच्छेद । तत्र लोहितमिश्रः सुरासोमोऽतिष्ठत् । ततः ससुरः सोमोऽश्विभ्यां पीतः इन्द्राय चार्पितः[2] । कथामेतामुद्धृत्य भाष्यकृद् उवट आह—**"हे अश्विनौ, युवां**

2. द्रष्टव्यम् : श. ब्रा. 12.7.3, कथेयम् उवटमहीधराभ्यां यजुर्भाष्ये शतपथब्राह्मणादेव गृहीता ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुरामं सुरामयं सोमं सुरमणीयं वा नमुचौ आसुरे अवस्थितं, सचा सहभूत्वा एकीभूय विपिपाना विविधं पिबन्तौ, हे शुभस्पती स्वामिनौ इन्द्रं कर्मसु निमित्तभूतेषु स्वकर्मकरणार्थम् आवतं पालयतम् स्वकर्मक्षमं कुरूतमित्यर्थः ।

कोऽयं नमुचिः । अस्मिन्नेव प्रकरणे शतपथकारः स्वयमेवाह—**"पाप्मा वै नमुचिः, पाप्मानं वाव तद् द्विषन्तं भ्रातृव्यं हत्वा इन्द्रियं वीर्यमस्यावृङ्क्त"** इति । विस्तरेणैवं व्याख्यातुं शक्यते । इन्द्रो राजा । **"क्षत्रं वै पयः (सोमः), विट् सुरा** (श. ब्रा. 12.7.3.8)" । स्वराष्ट्रे राजा क्षत्रं विशं च—राजन्यं प्रजां च, राजशक्तिं प्रजाशक्तिं च—सम्यक् सम्मेल्य राष्ट्रं रक्षति । यद्वा सोमो ज्ञानं, सुरा धनम्, तयोर्योऽनिवार्यो राष्ट्रोत्कर्षाय । नमुचिः पापात्मा शत्रुः यो हि इन्द्रस्य राज्ञः सोमसुरारूपं क्षत्रबलं विड्बलं च, ज्ञानधनादिकं वाऽपहृत्य स्ववशे स्थापयति । अश्विनौ सभासेनाध्यक्षौ[3] राज्याधिकारिणौ यौ नमुचेः सकाशात् तत् सोमसुरारूपम् ऐश्वर्यम् आच्छिद्य प्रत्यानयतः, इन्द्राय च समर्पयतः । तदेवोच्यते—

पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः ।
युत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥

ऋग् 10. 131. 5, यजु 10. 34, अथर्व 20. 125. 5.

हे इन्द्र राजन्, पुत्रमिव पितरौ मातापितरौ यथा पुत्रं रक्षतः, तथा उभा अश्विना उभौ सभासेनाध्यक्षौ काव्यैः ज्ञानैः दंसनाभिः कर्मभिश्च त्वाम् आवथुः रक्षितवन्तौ, अवतेर्लिटि मध्यमद्विवचनं, पुरुषव्यत्ययः । किं च यत् यदा त्वं शचीभिः प्रज्ञाभिः कर्मभिश्च नमुचिवधादिरूपैः साकं **शचीति कर्मनामसु, प्रज्ञानामसु च पठितम्** (निघं. 2. 1. 3. 9), सुरामं सुरामयं सोमं व्यपिबः पीतवान्, क्षत्रं विशं च संयुक्तं पालयामासेत्यर्थः, तदा हे मघवन् ऐश्वर्यशालिन् राजन्, सरस्वती प्रजाभिः कृता स्तुतिवाणी त्वा त्वाम् अभिष्णक् अभिषक्ता ।

सुरानिर्माणविधिः

"अपां च वा एष ओषधीनां च रसो यत् सुरा (श. ब्रा. 12. 8. 1. 4) इति शातपथी श्रुतिः प्राक् प्रतिपादिता । अथ कासाम् ओषधीनां रसोऽद्भिः सहितः सुरा कथ्यते इति प्रश्नः समुदेति । तत्रापि किं निष्पीडितानां कासांचिदोषधीनाम् प्रत्यग्रो रसः सुरा, यद्वा पर्युषितः आसवारिष्टादिरूपे परिवर्तितः ।

कात्यायनश्रौतसूत्रे एकोनविंशाध्यायस्य प्रथम-कण्डिकायां सुरानिर्माणविधिरुपदिष्टः । स एव यजुर्वेदीयोनविंशाध्यायभाष्यस्य प्रारंभे महीधरेणापि प्रदर्शितः । तत्संक्षेपोऽत्र दीयते । प्रथमं तावत् शष्पं तोक्मान् लाजान् नग्नहुं चानयेत् । विरूढा व्रीहयः शष्पं, विरूढा यवास्तोक्माः, भृष्टव्रीहयो लाजाः, सर्जत्वक्-त्रिफला-शुण्ठी-

3. अश्विनोः सभासेनेशयोः इति ऋग् 1.120.10 भाष्ये दयानन्दः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनर्नवा– चतुर्जातक– पिप्पली– गजपिप्पली–वंशावका–बृहच्छत्रा– चित्रक–इन्द्रवारुणी-अश्वगन्धा-धान्यक–यवानी–जीरकद्वय–हरिद्राद्वय–विरूढयव–व्रीहयः एकीकृता नग्नहुः। एतान् शष्प–तोक्म–लाज–नग्नहून् संचूर्ण्य व्रीहिश्यामाकयोश्चरू बहुजले पक्त्वा शृतालम्भनानन्तरं तयोश्चवोनिः स्रावम् उष्णं पृथक्पात्रयोरादाय शष्पादिचतुर्णां चूर्णैः संसृज्य स्थापयेत्। ततश्च संसर्गं कृत्वा कुम्भ्यां प्रक्षिप्य त्रिरात्रं गर्ते निदध्यात्। सा सुरा। तदुक्तम्—"तिस्रो रात्रीः सुरा सुता, यजु 19. 14" इति। इयं च सुरा द्राक्षाद्यासववत् रोगापहा, शक्तिप्रदायिनि, चेतःप्रसादकरी, प्रज्ञोन्मेषयित्री ब्रह्मत्वक्षत्रत्ववर्द्धिका, इन्द्रियाणां प्राणानां च बलप्रदा, न चोन्मादकारिणी। कात्यायनेन या ओषधयः संकेतितास्तासु यथायोग्यं परिवर्तनं परिवर्द्धनं चापि कर्तुं शक्यते, यतो नायं वेदादेशो यदेता एवौषधयः सुरानिर्माणे ग्राह्याः।

सुरासोमपानमन्त्रः

सुरामिश्रितं सोमम् अधस्तनमन्त्रेण पिबति। यथोक्तं शतपथे—"**स भक्षयति, तदत्र रिप्तं रसिनः सुतस्येति** (श. ब्रा. 12. 8. 1. 5)"।

यदत्र रिप्तꣳ रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः।
अहं तदस्य मनसा शिवेन सोमꣳ राजानमिह भक्षयामि॥

यजु 19. 35

रसिनः रसवतः सोमस्य यद् यो भागः अत्र सुरायां रिप्तं लिप्तं मिश्रीभूतम्, यद् यं सुरामिश्रं सोमभागम् इन्द्रः श्रेष्ठो यागकर्ता कश्चित् शचीभिः प्रज्ञापूर्वकैः कर्मभिः अपिबत् पिबति, अस्य सुरामिश्रस्य सोमस्य तत् तं भागम् अहम् इह अस्मिन् यज्ञे शिवेन मनसा प्रफुल्लेन चेतसा, भक्षयामि भुञ्जे पिबामि वा। किं च 'सोमो राजाऽयम्' इत्येव मत्वा भक्षयामि, नतु सुरामिश्रितमिदं द्रव्यम् अपूतमिति बुद्धचा सेवे इति भावः।

अत्रोक्तं शतपथे—**'अहं तदस्य मनसा शिवेन' इति अशिव इव वा एष भक्षो यत् सुरा ब्राह्मणस्य, शिवम् एव एनम् एतत् कृत्वा आत्मन् धत्ते। 'सोमं राजानमिह भक्षयामि' इति सोम एवास्य राजा भक्षितो भवति। तद्धैतद् अन्ये अध्वर्यवः राजन्यं वा वैश्यं वा परिक्रीणन्ति स एतद् भक्षयिष्यतीति, तदु तथा न कुर्यात्। यो ह वा एतद् भक्षयति तस्य हैव पितॄन् पितामहान् एष सोमपीथोऽन्वेति**'—इति।

अयं भावः—सुरा तावत् रसस्य तिस्रो रात्रीः कुम्भ्यां रक्षितत्वात् पर्युषिता भवति, सुरामिश्रितत्वाच्च सोमोऽयम् अपवित्रः, अभोज्यश्च ब्राह्मणस्येति केचिन्मन्यते। ते च तत्पानाय शुल्कं दत्त्वा क्षत्रियं वा वैश्यं वा परिक्रीणन्ति, अयमेतं पास्यति, फलं चास्माकं भविष्यतीति। तस्य निषेधः क्रियते। नैतद् ब्रह्मणो मन्येत 'अपवित्रेयं सुरा' इति। विविधौषधीनां रस आसवरूपेण परिणतः शरीराय मनसे च पोषकः, अतः सोमवदेव पवित्रः। किं च येन यत्कार्यं क्रियते, तत्फलमपि तेनैव प्राप्यते। अतस्तत्पानाय

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजन्यो वा वैश्यो वा न परिक्रेतव्यः । यः पास्यति स एव शरीरेण मनसा प्रज्ञया च पुष्टो यशस्वी च सन् स्वपितृपितामहानपि यशोभाजः करिष्यतीति ।

उदकं सुरा

उदकमपि सुरोच्यते, तथा च निघण्टौ (1. 12) तदर्थे स्मृता । सुष्ठु राति ददाति जीवनम् आयुष्यं च तस्मात् सुरा, सुष्ठु रमते मेघपर्वतसमुद्रसरोवरादिषु, सुष्ठ् रमयते स्वाभ्यन्तरे जलचरनौपोतादीन् वा । तस्यैषा भवति—

युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरन्धिम् ।
कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः ॥

ऋग् 1. 116. 7

अश्विनौ देवता । कक्षीवान् ऋषिः । अश्विनौ वाय्वादित्यौ[4] । कक्षीवान् कक्ष्यावान् वद्धपरिकरः पुरुषार्थी जनः । हे नरा नयनकर्तारौ अश्विनौ वाय्वादित्यौ, युवं युवाम् पज्रियाय पद्यते गच्छति अनेनेति पज्रो बलं, पद धातोर्बाहुलकेन रक् प्रत्ययः, वर्णव्यत्ययेन दकारस्य जकारः, तत्र साधुः पज्रियः तस्मै बलवते कक्षीवते पुरुषार्थयुक्ताय स्तुवते प्रभुस्तुतिपरायणाय जनाय पुरन्धिं पुरुं बहुविधां धियम् अरदतं प्रायच्छतम् । किंच वृष्णः वर्षकस्य अश्वस्य व्याप्तिमतो मेघस्य,[5] कारोतरात् चालनीरूपात् शफात् स्रोतसः सुरायाः वृष्ट्युदकस्य शतं कुम्भान् असंख्यातान् कलशान्, प्रचुरं वृष्टयुदकमित्यर्थः, असिञ्चतम् अवर्षयतम् । अन्यत्राप्युक्तम्—"अपां बिलमपिहितं यदासीद् वृत्रं जघन्वां अप तद्वार, ऋग् 1. 32. 11" इति । मेघानां समीपे चालनी (कारोतरः) विद्यते, यस्याश्छिद्राणि यदा पिहितानि भवन्ति तदा न वर्षति, यदा चोद्घाट्यन्ते अथ वर्षतीति कविकल्पना ।

लक्ष्मीः सुरा

स्वर्णरजतादिसम्पत्तिरपि सुरोच्यते, सुष्ठु रातुं दातुं योग्या या भवति निर्धनाय, रा दाने । तस्या एता भवन्ति—

स विशोऽनु व्यचलत् तं सभा च समितिश्च सेना च सुरा चानु व्यचलन् ।
सभायाश्च वै समितेश्च सेनायाश्च सुरायाश्च प्रियं धाम भवति य एवं वेद ॥

अथर्व 15.2.1-3

अथर्ववेदीयव्रात्यकाण्डस्य प्रकरणमिदम् । **'सोऽरज्यत ततो राजन्योऽजायत'** इति पूर्वमुक्तम् । तं राजन्यमेवोपाश्रित्य वर्ण्यते । स राजन्यः विशः अनुव्यचलत् प्रजा

4. अश्विनौ वाय्वादित्यौ इति ऋग् 1.164.27 भाष्ये सायणः ।

5. "दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः, ऋग् 5 83.6" इत्यत्र पर्जन्यो वृषा अश्वः उक्तः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुससार । प्रजानुसरणस्य फलमिदं यत् तं सभा च समितिश्चेति राज्यपरिषदौ, सेना सैन्यं च, सुरा राजलक्ष्मीश्च सर्वाणि अनुव्यचलन् आनुकूल्यमभजन् । यो राजन्यः एवं वेद एतद् रहस्यं वेत्ति वित्त्वा च प्रजा अनुसरति स वै सभायाश्च समितेश्च सेनायाश्च सुरायाः राजलक्ष्म्याश्च प्रियं धाम भाजनं भवति ।

यथा मांसं यथा सुरा यथाक्षा अधिदेवने ।
यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः ।
एवा ते अघ्न्ये मनोऽधि वत्से निहन्यताम् ॥

अथर्व 6.70.1

एषा गोवत्सयोरन्यविरोधशान्तिरूपे सांमनस्यकर्मणि विनियुक्ता । यथा मांसं शरीरे सर्वेभ्यो रोचते, मांसपूरितायैव गात्राय यथा मनः स्पृहयति न तु दुर्बलाय अस्थिपञ्जर-मात्रशेषायेत्यर्थः । यथा सुरा लक्ष्मीः सर्वेभ्यो रोचते, यथा अधिदेवने द्यूतालये अक्षाः द्यूतपाशाः मनः आकर्षन्ति, उक्तं, च 'अक्षासो अस्य वितिरन्ति कामं प्रतिदीव्ने दधत आ कृतानि, ऋग् 10.34.6' इति । यद्वा, अधिदेवने अधिदीव्यन्ति व्यवहरन्ति अस्मिन् इति अधिदेवनं व्यवहारक्षेत्रं जगत् तस्मिन् यथा अक्षा इन्द्रियाणि रमन्ते । यथा वृषण्यतः पुंसः कामुकस्य पुरुषस्य स्त्रियां मनः निहन्यते अनुरज्यते, एव एवं हे अघ्न्ये धेनो, ते तव मनः वत्से अधि उपरि निहन्यताम् अनुरज्यताम् । अथवा गोवाचकानि पदानि नार्यर्थद्योतकान्यपि भवन्ति । तस्माद् नार्येव सम्बोध्यते । हे अघ्न्ये मातः, ते मनः वत्से अधि स्वसन्ततौ निहन्यताम् अनुरज्यताम् । यदुक्तम्—सहृदयं सांमनस्यमविद्वेषं कृणोमि वः । अन्योअन्यमभिहर्यत वत्सं जातमिवाघ्न्या, अथर्व 3.31.1' इति ।

यच्च वर्चो अक्षेषु सुरायां च यदाहितम् ।
यद् गोष्वश्विना वर्चस्तेनेमां वर्चसावतम् ॥

अथर्व 14.1.33

विवाहकाण्डे वधूविषये मन्त्रोऽयम् । हे अश्विनौ द्यावापृथिव्यौ मातापितरौ यद् वर्चस्तेजः अक्षेषु रथस्य धूर्षु, तत्रैव रथस्यावलम्बनात्, यत् च वर्चः सुरायां लक्ष्म्याम् आहितं स्थितं, यद् वर्चः, गोषु धेनुषु, पृथिवीषु, सूर्यकिरणेषु, वेदवाणीषु वा आहितं, तेन वर्चसा तेजसा इमां वधूम् अवतम् रक्षेतम् ।

भोजा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्ध्वꣳया सुवासाः ।
भोजा जिग्युरन्तःपेयं सुराया भोजा जिग्युर्ये अहूताः प्रयन्ति ॥

ऋग् 10.107.9

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोजयन्तीति भोजा दातारः अग्रे प्रथममेव सुरभिं योनिं सौरभयुक्तं गृहं जयन्ति अधिगच्छन्ति । भोजा दातारः वध्वं वधूं जिग्युः, जयन्ति, या सुवासाः शोभनवस्त्राद्यलङ्कृता भवति । भोजा दातारः सुरायाः लक्ष्म्याः अन्तःपेयम् अन्तर्भोगं जिग्युः जयन्ति । भोजा दातारः जिग्युः तान् सर्वान् पदार्थान् जयन्ति अधिगच्छन्ति, ये अहूताः अनिमन्त्रिता एव प्रयन्ति तत्समीपं स्वयमेव समायान्ति । इति दानमहिमा ।

फलादीनां रसः सुरा

रसपूरितानां कन्दमूलफलादीनां रसोऽपि सुरा । तदभिवादिन्य एता ऋचो भवन्ति—

घृतह्रदा मधुकूलाः सुरोदकाः क्षीरेण पूर्णा उदकेन दध्ना ।
एतास्त्वा धारा उपयन्तु सर्वाः स्वर्गे लोके मधुमत् पिन्वमाना उप त्वा
तिष्ठन्तु पुष्करिणीः समन्ताः ॥ अथर्व 4.34.6

गार्हस्थ्यस्वर्गस्य वर्णनमिदम् । हे सद्गृहस्थ, घृतह्रदाः घृतपूर्णह्रदयुक्ताः मधुकूला मधूनि माक्षिकाणि एव कूलानि यासां ताः, सुरा फलादीनां रस एव उदकं यासां ताः, क्षीरेण पयसा, उदकेन स्वच्छवारिणा, दध्ना च पूर्णाः, मधुमत् मधुयुक्तं यथा स्यात् तथा पिन्वमानाः सिञ्चन्त्यः एता धाराः स्वर्गे लोके गृहस्थाश्रमे त्वा त्वाम् उपयन्तु उपगच्छन्तु । किंच समन्ताः पर्यन्तवर्तिन्यः पुष्करिणीः पुष्करपुष्पालङ्कृताः सरस्यः त्वा त्वाम् उप तिष्ठन्तु प्राप्नुवन्तु ।

गिरावरगराटेषु हिरण्ये गोषु यद् यशः ।
सुरायां सिच्यमानायां कीलाले मधु तन्मयि ॥
अथर्व 6.69.1

यशो मधु च प्रार्थ्यते । गिरौ पर्वते मेघे वा, अरगराटेषु अरेण वेगेन गच्छन्तीति अरगाः नद्यः तासां राटेषु शब्देषु, हिरण्ये सुवर्णे गोषु धेनुषु भूमिषु सूर्यादिलोकेषु आदित्यरश्मिषु वा यद् यशः कीर्तिरस्ति, यच्च सुरायां सिच्यमानायां फलादिरसेषु पात्रेषु आसिच्यमानेषु कीलाले पयसि च मधु माधुर्यमस्ति तत्सर्वं मयि स्यात् ।

यद् गिरिषु पर्वतेषु गोष्वश्वेषु यन्मधु ।
सुरायां सिच्यमानायां यत् तत्र मधु तन्मयि ॥
अथर्व 9.1.18

मधु प्रार्थ्यते । गिरिषु मेघेषु पर्वतेषु शैलेषु यद् मधु, गोषु धेनुषु अश्वेषु तुरगेषु यद् मधु, सुरायां सिच्यमानायां कन्दमूफलादीनां रसेषु पात्रेषु आसिच्यमानेषु तत्र तत्र यद् मधु माधुर्यमस्ति तद् मयि स्यात् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निन्दिता सुरा

वैदिकसंहितासु प्रायेण प्रशस्तार्थे एव सुराशब्दो व्यवहृतः । विरलमेव निन्दितार्थे समायाति । द्वित्राण्येव स्थलान्यस्माभिस्तथाविधानि प्राप्तानि । यथा—

न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान् कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ॥

ऋग् 7.86.6

कानि तानि वस्तूनि यानि मनुष्यमनृते प्रवर्तयन्तीत्युच्यते । तेषु सुरापि परिगणिता । इयं सा मदिरा या किल उन्मादं जनयति, बुद्धिं लुम्पति, चित्तं विकलयति, विवेकं नाशयति, मूर्च्छामानयति । नाहं स्वेच्छयेव पापे प्रवृत्तो भवामि, किन्तु कानिचिद् व्यसनानि बलान्मां पापे प्रवर्तयन्तीति स्वकीया दशा वरुणं परमात्मानं प्रति निवेद्यते । हे वरुण, स स्वः दक्षः मदीयं स्वकीयं बलमेव ध्रुतिः गतिस्थैर्ययोः कर्तरिक्तिन् सन्मार्गाच्च्यावकः न नास्ति, किन्तु सा प्रसिद्धा उन्मादजनिका सुरा मदिरा, मन्युः क्रोधः, विभीदकः द्यूतसाधनोऽक्षः, अचित्तिः असावधानता चापि ध्रुतयः सन्मार्गाच्च्यावकाः सन्ति । किंच कनीयसः लघीयसः पुरुषस्य पापप्रवृत्तेः उपारे उपागमे ज्यायान् महीयान् पुरुषोऽपि कदाचित् कारणं जायते, **'यद्यदाचरति श्रेष्ठस्तदेवेतरो जनः'** इति न्यायेनेति भावः । अपि च स्वप्नः चन स्वप्नोऽपि अनृतस्य पापस्य प्रयोता प्रकर्षेण मिश्रयिता, पापे प्रेरक इति यावत् भवति । अतः किमिति मां त्वं जिघांससि, ममापराधं क्षमस्व, यथोचितदण्डप्रदानेन वा मर्षय, भाविजीवनेऽहं सावधानः स्थास्यामि ।

नकीं रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं समूहस्यादित् पितेव हूयसे ॥

ऋग् 8.21.14, अथर्व 20.114.2

इन्द्रो देवता । हे इन्द्र, त्वं रेवन्तं केवलधनवन्तं दानादिरहितम् अयष्टारं मानवं सख्याय सखिभावाय न विन्दसे न स्वीकरोषि, यतो हि सुराश्वः सुरया मदिरया शूनाः वृद्धाः प्रमत्तास्ते नास्तिकाः, टुओश्वि गतिवृद्धयोः, पीयन्ति पीडयन्ति सज्जानान् समाजे हिंसोपद्रवं वा कुर्वन्ति, पीयतिर्हिंसाकर्मा । यदा त्वं नदनुं संग्रामं, **नदनुरिति संग्रामनाम** (निघं 2.17) तैः ऐश्वर्यमदत्तैः सुरापानव्यसनपतितैः सह तान् विनाशयितुं युद्धं कृणोषि आचरसि, समूहसि च तान् समूह्य पीडयसि च, आद् इत् तदनन्तरमेव तैस्त्वं पिता इव जनक इव हूयसे प्रार्थ्यसे । यदा तेषामुपरि त्वत्प्रेरिताः संकटा आगच्छन्ति तदैव ते त्वां स्मरन्ति, स्वधनस्य दाने च संलग्ना जायन्ते इति भावः । अत्र 'सुराश्वः' इति शब्दो जघन्याचरणद्योतकः सुरापानस्य गर्हितत्वं सूचयति ।

हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम् ।
ऊधर्न नग्ना जरन्ते ॥ ऋग् 8.2.12

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमरसैः सह आशिरं संमिश्रच तत्पानं विहितम् । गवां पयो दधि यवजलं वाऽऽशीरुच्यते[6] । अत एव सोमा गवाशिरो[7] दध्याशिरो[8] यवाशिरो[9] वा प्रोच्यन्ते । शुद्धाः सोमास्तीव्रत्वाद्धानिकराः । अत एव तैः साकम् आशिरो योज्यन्ते । प्रस्तुतप्रकरणे दशमे मन्त्रे तदेवोक्तम्—**"इमे त इन्द्र सोमास्तीव्रा अमत्रे सुतासः । शुक्रा आशिरं याचन्ते"** इति । आशीर्विरहितसोमपानस्य कः परिणाम इति प्रकृतमन्त्रे प्रोच्यते ।

पीतासः आस्वादिता इमे आशीर्विरहिताः सोमरसाः हृत्सु उदरेषु युध्यन्ते परस्परं युद्धमिवाचरन्ति, उपद्रवं जनयन्तीत्यर्थः । तत्रोपमा—सुरायां दुर्मदासो न । नेत्युपमार्थीयः, सुरायां मदिरायां मदिरां पीत्वा दुर्मदासः उन्मादयुक्ता मदिराव्यसनिनो यथा परस्परं युध्यन्ते तथेत्यर्थः । ते पीताः नग्नाः आशीर्वर्जिताः सोमाः ऊधः उदरे न जरन्ते न शीर्णा भवन्ति न पच्यन्ते इति यावत्[10] ।

उपसंहारः

तदेवं वैदिकी सुराऽस्माभिः परीक्षिता । वैदिकसुराविषये जनसामान्यस्य मनःसु विचारोऽयं बद्धमूलो यत् सुरेयं सर्वत्र लोकप्रसिद्धा मदिरैव, अतः सोमेन सह तस्या मिश्रणं गर्हितमेव स्यात् । परम् उपरितनेषु पृष्ठेषु यद् विचारितं तेन सुस्पष्टमेतद् यद् वेदानां नवतिप्रतिशतस्थलेषु सुरेयं स्पृहणीया लाभकरी च प्रोक्ता । अनेकरूपेषु सा प्राप्यते । यदा सा सोमेन सह संमिश्रच तदा ओषधीनां रसरूपा, अन्यत्र लक्ष्मीरूपा, वृष्ट्युदकरूपा कन्दमूलफलादिरसरूपा च । इयं सुरा ब्रह्मविद्याऽध्यात्मसम्पद् वापि भवितुमर्हति । पूर्वोक्तेष्वेव मन्त्रेषु केचन तथा व्याख्यातुं शक्यन्ते । यथा—**"कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिंचतं सुरायाः** (ऋग् 1. 116. 7)" इत्यत्र वृषा अश्वः विद्यावर्षकः ज्ञानव्यापकः आचार्यः, तत्सकाशात् सुरायाः ब्रह्मविद्यायाः शतं कुम्भाः कक्षीवतः शिष्यस्य हृदये संसिच्यन्ते ।

प्रतिशतं दशसु स्थलेषु ततोऽपि वा न्यूनेषु सुरेयं गर्हितरूपा स्मृता । तत्रेयम् उन्मादकारिणी परित्याज्या च । अतः शुभा वैदिकी सुराऽस्माभिरूपादेया, गर्हिता च परिहेया ।

---

6. ऋग् 1. 87. 9
7. ऋग् 1. 137. 1, 9. 64. 28
8. ऋग् 1. 5. 5, 9. 22. 3, 9. 63. 15
9. ऋग् 2. 22. 1, 8. 92. 4
10. अस्य मन्त्रस्य सायणदुर्गाचार्यग्रिफिथादिकृतोऽर्थः परस्परं विभिन्नो न च सन्तोषावहः । अस्माभिर्वेङ्कटमाधवस्य व्याख्यानमनुसृतम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६. हंसः

लौकिकसंस्कृतसाहित्ये हंसः कवीनां प्रियः पक्षी । अयं हि ब्रह्मणो वाहनत्वेन विशिष्टं महत्त्वमावहति । नीरक्षीरविवेकेऽस्य शक्तिः श्रूयते । वर्षारम्भे हंसा मानसं यान्तीति प्रसिद्धिः । वर्णतो हंसाः श्वेतपक्षा भवन्ति । केचिल्लोहितचञ्चुरणाः सितशरीराश्च ये राजहंसा इत्युच्यन्ते । अपरे मलिनचञ्चुचरणाः श्वेतदेहा मल्लिकाख्याः । इतरे च कृष्णचञ्चुचरणाः श्वेतच्छदा धार्तराष्ट्रा इति ख्याताः[1] ।

परं हंसशब्दो न केवलं पक्षिविशेषवाचकः प्रत्युत लोकेऽस्य बहवोऽर्थाः प्रसिद्धाः । तद्यथा—सूर्यः, पक्षिविशेषः, निर्लोभनृपः, विष्णुः, परमात्मा, जीवात्मा, प्राणः, कामदेवः, अमत्सरः. संन्यासिविशेषः, मन्त्रविशेषः, गुरुः, पर्वतः, तुरंगमप्रभेदः, शिवः, विशुद्धः, अग्रतः स्थितः, श्रेष्ठः, गोविशेषः, जरासन्धनृपतेः सेनापतिविशेषः, मेरोरुत्तरस्थपर्वतविशेष इति मुख्यार्थाः कोशेषु[2] प्रतिपादिताः । उणादिकोषे[3] हन् हिंसागत्योरिति धातोः स प्रत्यये हंसशब्दः साध्यते । हन्ति गच्छतीति हंसः । अथ वैदिकसंहितासु हंसशब्दः केष्वर्थेषु प्रयुज्यते इति विचारयामः ।

हंसपक्षी

हंसाः पक्षिविशेषाः । **'हंसा हन्तेः, घनन्त्यघ्वानम्'** इति निरुक्तम् (4.13) वैदिकसंहितासु बहुत्र हंसा उपमानरूपेण प्रयुक्ताः । तैश्च प्रसङ्गैर्हंसानां स्वभावादिकमपि सूचितं भवति । अग्निरप्सु तथैव सीदति यथा हंसो जलेषु सीदंस्तरति—

श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत् ॥

ऋग् 1. 65. 5

अग्निर्देवता । क्रत्वा स्वकीयेन प्रकाशप्रदानादिकर्मणा विशां प्रजानां चेतिष्ठः अतिशयेन प्रज्ञापयिता उषर्भुत् यज्ञाग्निरूपेण उषःकाले प्रबुद्धोऽयमग्निः अप्सु नदीसरोवरादिगतेषु जलेषु सीदन् उपविशन् हंसो न हंसपक्षीव अप्सु मेघवर्तिषु उदकेषु

---

1. हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः । राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः । मलिनैर्मल्लिकाख्यास्ते धार्त्तराष्ट्राः सितेतरैः ॥ इत्यमरः 2.23,24

2. यथा-हंसो विहगभेदे स्यादर्के विष्णौ ह्यान्तरे । योगिमन्त्रादिभेदेषु परमात्मन्यमत्सरे । निर्लोभनृपतौ हंसः शारीरमरुदन्तरे ॥ इति विश्वः (1.74,8-9) हंसोऽर्केऽमत्सरेऽच्युते । खगाश्वयोगिमन्त्रादिभेदेषु परमात्मनि । निर्लोभनृपतौ प्राणवाते श्रेष्ठेऽग्रतः स्थितः, इत्यनेकार्थसंग्रहः. 2.598-99 । अन्ये कोशाः—मेदिनी (170.12-14) मौनियरविलियम्स-कृतः संस्कृत-इंगलिशकोशः । आप्टेकृतः संस्कृत-इंगलिशकोशः ।

3. वृतृवदिवचिवसिहनिकमिकषिभ्यः सः । (उ. 3.62)

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्युदात्मना सीदन् श्वसिति प्राणिति । श्वस प्राणने । अनेन हंसस्यायं स्वभावो द्योत्यते यदसौ जलतरङ्गाणामुपरि सीदन् श्वासोच्छ्वासं करोतीति ।

हंसा इमे समूहेषु बद्धाः सीदन्तीत्यपि कैश्चिन्मन्त्रैः सूच्यते । सोमवर्णनप्रसङ्गे कविर्व्याहरति—**"आदीं हंसो यथा गणं विश्वस्यावीविशन्मतिम्"** ऋग् 9. 32. 3 इति । हंसो यथा गणं समूहं विशति तथैव अयं सोमः विश्वस्य सर्वस्य मतिम् अवीविशत्, सर्वजनप्रियो जात इत्यर्थः ।

अथापि दिवि धावन्तः सूर्याश्वा वर्ण्यन्ते—

ईर्मान्तासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः ।
हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः[4] ॥

ऋग् 1. 163. 10

ईर्मान्तासः ईर्माः समीरिताः चालिताः अन्ता येषां ते, सिलिकमध्यमासः संसृतमध्याः, शूरणासः शूराः, अत्याः अतनवन्तः दिव्यासः दिवि भवाः अश्वाः सूर्यस्य वाजिनः यदा दिव्यम् अज्म आकाशमार्गम् आक्षिषुः आपुः तदा हंसा इव हंसपक्षिण इव श्रेणिशः श्रेणिबद्धाः सन्तः संयतन्ते सम्यक् प्रयत्नं कुर्वन्ति । अनेन हंसानाम् उड्डयनस्वभावःसूचितो भवति । तेऽपि संघीभूय उड्डीयन्ते, किं च उत्पतनकाले तच्छरीराणामपि मध्यभागोऽन्तभागश्च चलति ।

भूमौ श्रेणिशो निखाता अन्तरिक्षे उच्छ्रिता यज्ञियूपाः पङ्क्तिबद्धैर्हंसैरुपमीयन्ते—

हंसा इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः ।
उन्नीयमानाः कविभिः पुरस्ताद् देवा देवानामपियन्ति पाथः ॥

ऋग् 3. 8. 9

श्रेणिशः पङ्क्तिशः यतानाः प्रवर्तमानाः हंसा इव शुक्रा शुक्राणि शुभ्राणि वस्त्राणि, हंसपक्षे शुभ्ररूपाणि वसानाः धारयन्तः स्वरवः यूपाः नः आगुः अस्मान् प्रापुः । कविभिः क्रान्तदर्शिभिः ऋत्विग्भिः पुरस्तात् वेद्याः पूर्वभागे उन्नीयमानाः उच्छ्रीयमाणाः देवाः दीप्तिमन्तस्ते यूपाः देवानाम् अन्तरिक्षस्थानीयानां वायूनां स्थानं पाथः अन्तरिक्षम् अपियन्ति प्राप्नुवन्ति । गगने उच्छ्रितान् श्रेणिबद्धान् शुभ्रवसनान् यूपान् दृष्ट्वैवं प्रतीयते यत् शुभ्रवर्णा हंसा एव उपरि समुत्पतन्तीत्युत्प्रेक्ष्यम् ।

अथ च यज्ञे सोमाभिषवणानन्तरम् ऋत्विग्भिः क्रियमाणाः श्लोकाः हंसानां कलध्वनिभिरुपमिताः—

---

4. मन्त्रोऽयं निरुक्ते व्याख्यातः । निरु. 4.13

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हंसा इव कृणुथ श्लोकमद्रिभिर्मदन्तो गीर्भिरध्वरे सुते सचा ॥

ऋग् 3. 53. 10

हे विप्राः, अध्वरे यज्ञे अद्रिभिः ग्रावभिः सोमे सुते सति मदन्तः हृष्यन्तो यूयम् सचा सह मिलित्वा हंसा इव श्लोकं कृणुथ स्तोत्रमुच्चारयथ । अत्र हंसानामियं प्रकृतिः सूच्यते यत् ते परस्परं मिलित्वा शब्दं कुर्वन्तीति ।

अन्यत्राप्युक्तम्—

हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् ।
बृहस्पतिरभिकनिक्रदद् गा उत प्रास्तौदुच्च विद्वाँ अगायत् ॥

ऋग् 10. 67. 3

सखिभिः स्वसहचरैः सह वावदद्भिः संलपद्भिः हंसैरिव वावदद्भिः भूयो भूयः वीरतासूचकं शब्दं कुर्वद्भिः सखिभिः मित्रभूतै मरुद्भिः अश्मन्मयानि दृढानि नहना बन्धनानि व्यस्यन् विक्षिपन्, उत गाः पणिभिरपहृताः नद्याः पारे पर्वतगुहासु निरुद्धा धेनूः अभिकनिक्रदत् अभिशब्दयन् बृहस्पतिः प्र अस्तौत् प्रकर्षेण स्तुतिं चकार, विद्वानसौ उदगायच्च सामगानं च कृतवान् । अत्रापि हंसाः स्वसखिभिः सह मिलित्वा संलपन्तीति सूच्यते ।

एकस्यामृचि मरुतां वर्णनप्रसङ्गे हंसा नीलपृष्ठा उक्ताः ।

सस्वश्चिद्धि तन्वः शुम्भमाना आ हंसासो नीलपृष्ठा अपप्तन् ॥

ऋग् 7. 59. 7

सस्वः[5] चिद्हि निश्चयरूपेणैव तन्वः स्वशरीराणि शुम्भमानाः अलङ्कुर्वाणा मरुतः नीलपृष्ठा हंसा इव असितपृष्ठा हंसपक्षिण इव आ अपप्तन् आगच्छन्निति । एतेन ज्ञायते यद् हंसेषु केचिन्नीलपृष्ठा धवलशेषभागाश्च भवन्ति ।

आदित्यः

आदित्योऽपि हंस उच्यते । हन्ति विनाशयति तमः, हन्ति सततं गच्छतीति वा । तस्यैषा सौरी ऋग् भवति—

हंसः शुचिषद् वसुरन्तरिक्षसद् होता वेदिषदतिथिर्दुरोणसत् ।
नृषद् वरसद् ऋतसद् व्योमसद् अब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥

ऋग् 4. 40. 5

मन्त्रस्य सूर्यदेवताकत्वाद् हंसः सूर्यः । स एक एव सूर्यः पृथक् स्थानेषु पृथङ्-नाम्ना स्मर्यते । स एक एव शुचिषद् शुचौ दीप्ते द्युलोके सीदतीति तादृशः सन् हंस

5. सस्व इति निर्णीतान्तर्हितनाम । निघं. 3.25

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उच्यते, स एव अन्तरिक्षे सीदतीत्यन्तरिक्षसत् सन् वसुः उच्यते । स एव वेद्यां सीदतीति वेदिषत् सन् होता उच्यते । स एव दुरोणे गृहे सीदतीति दुरोणसत् सन् अतिथिः उच्यते । स एव नृषु मनुष्येषु सीदतीति नृषद्, वरेषु श्रेष्ठेषु सीदतीति वरसत्, ऋते यज्ञे सीदतीति ऋतसद्, व्योम्नि आकाशे सीदतीति व्योमसद्, अप्सु उदकेषु जायते इप्यब्जाः, गोषु धेनुषु रश्मिषु वा जायते इति गोजाः, ऋते जायते इति ऋतजाः, अद्रिषु पर्वतेषु मेघेषु वा जायते इत्यद्रिजाः, ऋतम् सत्यस्वरूपश्च वर्त्तते । सूर्यतत्वं खलु सर्वेषु जङ्गमस्थावरेषु व्याप्तम्, सूर्याभावे हि समस्तेयं पृथिवी समस्ताश्च गहोपग्रहा व्याकुलतां प्राप्नुयुरिति सूर्यस्य महिमानमाचष्टे ।

शौनकः ऋचोऽस्या विनियोगमाह—

हंसः शुचिषदित्यृचा शुचिरीक्षेद् दिवाकरम् ।
अन्तकाले जपन्नेति ब्रह्मणः सद्म शाश्वतम् ॥[6]

ऋगियम् ऐतरेयब्राह्मणे,[7] ऋग्वेदभाष्ये, माध्यन्दिनशुक्लयजुर्वेदसंहिताया[8] उवटमहीधरकृते भाष्ये चापि सूर्यपरत्वेन व्याख्याता । तैतिरीयसंहिताया: 1.8.15 भाष्ये भट्टभास्करेण अध्यात्मम् अधिदैवम् अधियज्ञं चाधिकृत्य त्रेधायं मन्त्रो व्याख्यातः– आत्मपरः, आदित्यपरः रथपरश्च ।

ऋग्वेदीयदशममण्डलस्य **'बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम्'** ऋग् 10. 124. 9' इत्यादिमन्त्रेऽपि हंसशब्दः सूर्यपर एव व्याख्यातो भाष्यकृद्भिः । तथा च सायणः—**"बीभत्सूनां कम्पमानावयवानां यद् वा मेघेन बद्धानाम् । हन्ति गच्छतीति हंसः सूर्यः । तं सयुजं सखायम् आहुः ब्रह्मवादिनः कथयन्ति"** इति ।

अथास्मिन् यजुष्यापि हंसशब्द आदित्यार्थे प्रयुक्तः—

सोमंमद्भ्यो व्यपिबच्छन्दसा हंसः शुचिषद् ॥

यजु 19. 74

'हंस आदित्यः अद्भ्यः सकाशात् छन्दसा वेदेन वेदरूपैः किरणैर्यथा सोमं व्यपिबत पिबति, सोमोदकाभ्यां रविः सोममेव पिबति' इति महीधरः[9] ।

---

6. ऋग्विधानम् 2.240
7. ऐ. ब्रा. 4.20
8. यजु 10.24, 12.14 । यजुष्यन्ते बृहत्' इत्यधिकः पाठः ।
9. 'सोमोदकयोः संसृष्टयोः सोमं वियुत्यापिबत् अद्भ्यः सकाशात्, छन्दसा छन्दोनिबद्धेन, हंस आदित्यः शुचिषत्' इत्युवटः ।
   The Hamsa : The Swan, the Sun who floats through the sky.—Griffith.
   वैदिक इंडैक्स कोशे तु मन्त्रोऽयं हंसपक्षिपर एव गृहीतः । सोमोदकयोः संसृष्टयोः हंसः पक्षी सोममेव पिबतीति च व्याख्यातम्—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदित्यरश्मयः

आदित्यरश्मयोऽपि हंसा उच्यन्ते । तथा च निरुक्तम्—**हंसाः सूर्यरश्मयः** (निरु. 14. 29) इति ।

तदभिवादिन्येषर्ग् भवति—

आ हंसासो न स्वसराणि गन्तन मधोर्मदाय मरुतः समन्यवः ॥

ऋग् 2. 34. 5

हे मरुतः, समन्यवः मन्युयुक्ता यूयं मधोः मदाय सोमस्य मदार्थम् स्वसराणि अस्मद्गृहाणि आगन्तन आगच्छत । तत्र दृष्टान्तः हंसासो न सूर्यरश्मयो यथा स्वसराणि[10] दिनानि आगच्छन्ति तद्वत् । उपमाऽलङ्कारः 'स्वसराणि' इत्यत्र श्लेषः ।

अश्वाः

अश्वा अपि हंसा उच्यन्ते । तथाहि निघण्टौ **हंसासः इत्यश्वनामसु पठितम्** (निघं 1. 14) । हंसा वै अश्विनो रथं वहन्तीत्युक्तम्—

हंसासो ये वां मधुमन्तो अस्रिधो हिरण्यपर्णा उहुव उषर्बुधः ॥

ऋग् 4. 45. 4

हे अश्विनौ, ये वां मधुमन्तः मधुरगत्युपेताः अस्रिधः अविघ्नकराः उहुवः वोढारः उषर्बुधः उषसि बुध्यमानाः हिरण्यपर्णाः स्वर्णिमपक्षाः स्वर्णिमपक्षहंसवत् उज्ज्वला द्रुतगामिनश्च[11] हंसासः अश्वाः सन्ति तैर्युवाम् अस्मदीयानि सवनानि गच्छथः इति ।

केचित्तु हंसपक्षिण एवाश्विनो रथं वहन्तीत्याहुः[12] । तत्तु न समञ्जसं प्रतिभाति । क्वचिदपि तथानुक्तत्वात् । रासभा अश्वाश्चैव तद्रथवाहकत्वेनोक्ताः । हंसशब्दस्तु द्रुतगतिद्योतनायैव तद्वाहकानां कृते प्रयुक्तः । सोऽपि ऋग्वेदस्य केवलं प्रस्तुत-

---

The Hamsa is credited with the power of separating Soma from water (as later milk from water) in the Yajurveda.—Vedic Index.

10. स्वसराणि इति गृहनामसु पठितम्, (निघं 3.4), स्वसराणि अहानि भवन्ति स्वयंसारीणि, अपि वा स्वरादित्यो भवति स एनानि सारयति । निरु. 5.22

11. 'हंसासः अध्वनि शीघ्रं गन्तारः—अश्वाः' इति सायणः 'हंसा इव सद्यो गन्तारोऽश्वाः' इति दयानन्दः, । तुलनीयम् :
Swans : the Asvins chariot steeds—Griffith.

12. Their car is drawn by horses (Rig 1.117.2 etc) more commonly by birds (वि 6.63.6 etc, or पतत्रिन् 10.143.5, swans 4.45.4, eagles 1.1.8.4, bird steeds 6.63.7 or eagle steeds 8.5.7). Macdonell, vedic Mythology, 1971, P. 50.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्र एव । अस्यैव सूक्तस्य द्वितीये सप्तमे च मन्त्रे साक्षादश्वशब्द एव प्रयुक्तः[13] । तेन द्योत्यते यत्तन्मध्यपतितः हंसशब्दोऽपि अश्ववाचक एव । अश्विनोरश्वैः सम्बधः तन्नाम्नैव प्रतीयते, यथोक्तं निरुक्ते **'अश्वैरश्विनौ इत्यौर्णवाभः'** (निरु. 12.1) इति ।

रथः

रथोऽपि हंस उच्यते । तैत्तिरीयसंहिताया भाष्ये भट्टभास्करः सायणश्चोभावपि पूर्वोक्तं **"हंसः शुचिषद्** तै. 1.8.5" इत्यादि मन्त्रम् अधियज्ञं रथपरतयैव व्याचक्षाते । तद् यथा—**"अथाधियज्ञे—हंस रथः, हन्ति पृथिवीमिति, शुचौ देवयजने रथवाहने च सीदतीति शुचिषत् । शुचिर्यजमानः सीदत्यस्मिन्निति वा शुचिषत् । होतेव वेद्यां सीदतीति वेदिषत् । अतिथिः सर्वत्राप्रतिहतगतिः । नृषत् मनुष्यार्थं शूरार्थं वा सीदतीति नृषु वा उपकारार्थं सीदतीति नृषत् । ऋतार्थं सत्यार्थं यज्ञार्थं वा सीदतीति ऋतसत् । अब्जाः उदकाज्जातः । गोजाः गोविकारचर्मादिग्रथितत्वात् ततो जात इत्युच्यते । अद्रिभिर्दारुभिरुत्पादितत्वात् ततो जात इत्युच्यते अद्रिजाः । गतमन्यत्"** । इति भट्टभास्करः । उक्तं चापस्तम्बश्रौतसूत्रे **"हंसः शुचिषदिति सह संग्रहीत्रा रथवाहने रथमत्यादधाति** (18. 17. 14)" । तदेवानुसरन् सायणो मन्त्रमिमं व्याचष्टे—**"हन्ति पृथिवीम् इति हंसः रथः । शुचौ देयवजने रथवाहने च सीदति इति शुचिषत् स्वस्योपरि यजमानं वासयतीति वसुः । तरुगुल्माद्यनवरुद्धेऽन्तरिक्षे सीदतीति अन्तरिक्षसत् । होता होतृसमानः । तदेव कथमित्युच्यते-वेद्यां सीदतीति वेदिषत् । अतिथिसदृशश्च । तदपि कथमित्युच्यते-दुरोणेषु गृहेषु सीदतीति दुरोणसत् । यो यस्तमारोढुं नयति तस्य तस्य गृहे सीदति । नृषु मनुष्येषु उपकारं कर्तुं सीदतीति नृषत् । वरे श्रेष्ठे राजादिगृहे सीदतीति वरसत् । ऋते यज्ञे राजसूयादौ सीदतीति ऋतसत् । सूर्यं वोढुं व्योमति आकाशे सीदतीति व्योमसत् "अप्सुयोनिर्वा अश्वः"** तैसं 5.3.12 इति श्रुतेरद्भ्यो जातैरश्वैरुपेतत्वात् **अब्जाः । गोशब्दवाच्याद्गुज्राज्जायत इति गोजाः । अतश्च "स्पयस्तृतीयꣳ रथस्तृतीयम्"** तैसं 5. 2. 6 इत्याम्नातम् । **ऋतजाः प्रष्टिवाहिन ऋतार्थं यज्ञार्थं जातत्वात् । अद्रिभ्यः पाषाणसदृशेभ्यो दृढेभ्यः काष्ठेभ्यो जातत्वात् अद्रिजाः । ईदृशो रथो बृहत्प्रौढं राजसूयाख्याम् ऋतं यज्ञं संपादयत्विति शेषः ।"** इति ।

वायुः प्राणश्च

वैदिक संहितासु क्वचिद् वायुः प्राणश्चापि हंस उदीरितः ।

ये अर्वाङ् मध्य उत वा पुराणं वेदं विद्वांसमभितो वदन्ति ।
आदित्यमेव ते परिवदन्ति सर्वे अग्निं द्वितीयं त्रिवृतं च हंसम् ॥

अथर्व 10. 8. 17

---

13. उद्वां पृक्षासो मधुमन्त ईरते रथा अश्वास उषसो व्युष्टिषु ऋग् 4.45.2 प्र वामवोचमश्विना धियंधा रथः स्वश्वो अजरो यो अस्ति ऋग् 4.45.7

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथर्ववेदीयोऽयं मन्त्रः किञ्चित्पाठभेदेन तैत्तिरीयारण्यकेऽपि समाम्नातः। **'ये अर्वाङ् उत वा पुराणे वेदं विद्वांसमभितो वदन्त्यादित्यमेव ते परिवदन्ति सर्वे अग्निं द्वितीयं तृतीयं च हंसमिति'** (तै. आ. 2.15)। तत्रेद सायणीयं व्याख्यानम्—

"वेदं विद्वांसं पाठादर्थाच्च वेदतत्त्वाभिज्ञं महात्मानं, ये मूर्खा अभितो वदन्ति तत्र तत्र निन्दन्ति ते मूर्खाः सर्वेऽप्यादित्यमेव निन्दन्ति। ततो द्वितीयमग्निं निन्दन्ति। ततस्तृतीयं हंसं गमनशीलं वायुं निन्दन्ति। अस्य वेदविदोऽग्निवाय्वादित्यसायुज्ययोग्यत्वादेतन्निन्दैव तेषां निन्दा, इत्यनेनैव मन्त्रेणाग्न्यादिरूपत्वलक्षणं वेदविन्माहात्म्यं दर्शितम् इति। एवमत्र सायणेन हंसशब्दो वाय्वर्थे गृहीतः।

अथर्ववेदेऽस्य सूक्तस्य सायणभाष्यं नोपलभ्यते। केचित्त्वत्रापि हंसशब्दं सूर्यवाचकत्वेन गृह्णन्ति[14]। परम् 'आदित्यः, अग्निः, हंसः' इति त्रयाणां पृथक् पठितत्वादत्र हंस आदित्याग्निभ्यां भिन्न एव कश्चिद् इति प्रतीयते।

अथर्ववेदीये प्राणसूक्ते प्राणपर्यायत्वेन हंसशब्दः प्रयुक्तः—

एकं पादं नोत्खिदति सलिलाद्धंस उच्चरन्।
यदङ्ग स तमुत्खिदेन्नैवाद्य न श्वः स्यान् न रात्री नाहः स्यान्न व्युच्छेत् कदाचन ॥ अथर्व 11.4.21

हन्ति सततं गच्छति शरीरे श्वासोच्छ्वासरूपेणेति हंसः प्राणः। असौ हंसः प्राणः सलिलात् रक्तकेशिकाजालाधारभूतात् फुप्फुसप्रदेशात् उच्चरन् बहिर्गच्छन्नपि एकं पादं नोत्खिदति एकमंशं बहिर्न निः सारयति। प्राणापानव्यानादिवृत्तिभिः शरीराभ्यन्तरमेव तिष्ठतीत्यर्थः। यदा हि प्राणी श्वासं त्यजति तदापि प्राणः आंशिकरूपेण शरीराभ्यन्तरे तिष्ठत्येवेति भावः। हे अङ्ग हे भ्रातः, यत् यदि स प्राणात्मको हंसः तं द्वितीयं पादमपि उत्खिदेत् बहिर्निःसारयेत्, सर्वात्मना शरीराद् बहिर्गच्छेत् तदा शरीरं मृतिमुपगच्छेत, तदा च मृत शरीरस्य कृते न अद्य स्यान्न श्वः स्यात्, न रात्रिः स्यान्न अहः दिनं स्यात्, नापि कदाचन व्युच्छेत् उषसः प्रादुर्भावः स्यादिति[15]।

---

14. Aditya : the Sun, Agni and Hamsa also are names, of the Sun. The latter is called threefold from his three strides or Vishnu or from pervading heaven, firmament and earth—Griffith.

15. सायणेन मन्त्रोऽयं विकल्पतया सूर्यपरोऽपि व्याख्यातः। हन्ति गच्छति हंसः जगत्प्राणभूतः सूर्यः—अथवा हन्ति गच्छति कृत्स्नं शरीरं व्याप्य वर्त्तत इति हंसः प्राणः····। ग्रिफिथः सूर्यार्थमेव गृह्णाति। ह्विटनेभाष्ये यद्यपि सायणमतोद्धरणपूर्वकम् उभयोऽप्यर्थो निर्दिष्टस्तथापि तन्मते वास्तविकोऽर्थः सूर्य एव। परं प्राणसूक्तेऽस्य मन्त्रस्य पठितत्वात् प्रकृतोऽर्थः प्राण एवेति मन्यामहे। सूर्यपरकोऽर्थस्तु शब्दशक्त्युद्भवेन ध्वनिना गृह्यते इति बोध्यम्। यद्वा "प्राणः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवात्मा परमात्मा च

निरुक्तपरिशिष्टे **'अथात्मनो महतः प्रथमं भूतनामधेयान्युत्क्रमिष्यामः'** इति प्रतिज्ञाय परिगणितेषु नामसु सर्वप्रथमं एव उदीरितः (निरु. 14. 11)'। पूर्वमादित्य-प्रकरणे लिखितो **'हंसः शुचिषद्'** इत्यादि मन्त्रोऽध्यात्मदृष्ट्या जीवात्मपरमात्म-परमर्थं द्योतयति। निरुक्तेऽस्य मन्त्रस्य भाष्यं यद्यपि न सुसंगतं, तथापि तत्र **'हंस इति हंसाः सूर्यरश्मयः परमात्मा परं ज्योतिः** (निरु. 14. 29)' इति परमात्मवाचकत्वसंकेतः सुस्पष्ट एव। तेन वेदे हंसशब्दो निरुक्तमतेनाऽऽत्मवाचकोऽपीति स्पष्टम्।

तैतिरीयसंहितायाः 1.8.15 भाष्ये भट्टभास्करोऽपि "**हꣳसः शुचिषद्**" इत्यादिमन्त्रम् अध्यात्मदृशा आत्मपरं व्याचष्टे। तद् यथा—"**अध्यात्मे तावत्, हंस आत्मा। शुचिषु स्थानेषु सीदतीति शुचिषत्। वासयिता वसुः वरिष्ठो वा। अन्तरिक्षे हृदयाकाशादिषु सीदतीति अन्तरिक्षसत्। होता आह्वाता देवानामादाता वा। वेद्यां यागार्थं सीदति इति वेदिषत्। अतिथिः सततगतिः तिथिकृतविशेषरहितो वा। दुःखरक्षणेषु गृहादिषु सीदतीति दुरोणसत्। नृषु प्राणिशरीरेषु तद्भावेन सीदतीति नृषत्। वरेषु फलेषु भोक्तृत्वेन सीदतीति वरसत्। ऋते यज्ञे सत्ये वा सीदतीति ऋतसत्। विविधे रक्षणे तृप्तौ वा सीदतीति व्योमसत्। अद्भ्यो जातः अब्जाः शरीराभिप्रायं, शुक्लाज्जातत्वात्। यथा—'पंचम्यामाहुतावापः पुरुषवचसो भवति' (छा. उ. 5. 3. 3) इति। अपां वा यागद्वारेण जनयिता। अन्तर्भावितण्यर्थात् 'जनसनखन' पा 6. 4. 42 इति विट्। "विड्वनोः" पा 6. 4. 41 इत्यात्वम्। गोषु पशुषु अनुग्राहकतया जातः गोजाः। ऋते यज्ञे ऋतार्थं वा जातः प्रादुर्भूतः ऋतजाः पर्वतादिष्वपि प्रादुर्भूतः। ऋतं सत्यरूपम्। बृहत् ब्रह्म।**" इति।

स्वामिदयानन्दः ऋचमेताम् ऋग्वेदभाष्ये जीवात्मपरां यजुर्वेदभाष्ये च दशमाध्याये परमात्मपरां द्वादशाध्याये च ब्रह्मजीवपरां व्याचष्टे।

यथा—"**हंसः यः संहन्ति सर्वान् पदार्थान् स जगदीश्वरः। हे मनुष्याः, भवन्तो यः परमेश्वरो हंसः शुचिषद् वसुरन्तरिक्षसद् होता वेदिषद् अतिथिर्दुरोणसन्नृषद् वरसद् ऋतसद् व्योमसद् अब्जा गोजा ऋतजा अद्रिजा ऋतं बृहदस्ति तमेवोपासीरन्**" इति 10.14 यजुर्भाष्ये।

अथर्ववेदे सर्पविषचिकित्साप्रसङ्गे मन्त्रोऽयं दृश्यते—

परि द्यामिव सूर्योऽहानां जानिमागमम्।
रात्री जगदिवान्यद्ध्वंसात् तेना ते वारये विषम्॥

अथर्व 6. 12. 1

प्रजानामुदयत्येष सूर्यः प्रश्नोप. 1.8" इति सूर्यस्यापि प्राणात्मकत्वात् प्रधानतया प्राणजनकत्वाद् वा प्राणसूक्ते सूर्यस्तुतिरपि प्रकृतैव। तदा तु श्लेषेणोभयार्थप्रतिपादकोऽयं मन्त्रः।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र हंसशब्दः सायणेन जीवात्मार्थे गृहीतः—"**सूर्यो द्यामिव अन्तरिक्षमिव अहीनां सर्पाणां जनिं कृत्स्नं जन्म सर्पकुलम् अहं पर्यागमं परिप्राप्तवानस्मि । रात्री जगदिव···· यथा रात्रिः स्वकीयेन तमसा कृत्स्नं जगद् व्याप्नोति एवं हंसात् हन्ति गच्छति व्याप्नोतीति हंस आत्मा तस्माद् अन्यत् कृत्स्नं शरीरं यद् विषं व्याप्नोति, हे विषग्रस्त ते त्वदीयं तद् विषं तेन प्रसिद्धेन भैषज्येन वारये निवारयामि**" इति ।

अथर्ववेदस्यायमपि मन्त्रो द्रष्टव्यः—

सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन् याति भुवनानि विश्वा ॥

अथर्व 10.8.18

स्वर्गं प्रति पततः उड्डयमानस्य अस्य हरेः हंसस्य पक्षौ सहस्राह्ण्यं परःसहस्रदिनपर्यन्तं वियतौ विततौ भवतः । स हि सर्वान् देवान् उरसि उपदद्य दत्त्वा विश्वा भुवनानि समस्तानि भूतजातानि संपश्यन् निभालयन् याति उत्पतति ।

सायणभाष्ये मन्त्रोऽयं न व्याख्यातः । एष खलु वायुसूर्यपरः, प्राणपरः, जीवात्मपरमात्मपरश्चापि व्याख्यातुं शक्यते । तथाप्यध्यात्मसूक्तेऽस्य पठितत्वाद् जीवात्मपरमात्मपरोऽर्थो मुख्यः । जीवो हि सततं मोक्षार्थं यतते । स हि पक्षित्वेन चित्रितः । मोक्षलोकं प्रत्युत्पततोऽस्य परःसहस्रदिनानि सञ्जातानि । स हि इन्द्रियमनोबुद्धिप्राणादिदेवान् स्वाभ्यन्तरे संस्थाप्य सर्वं विश्वं पश्यन्, पश्यन्नित्युपलक्षणम् सर्वं भोगजातं भुञ्जान इत्यर्थः, याति संसारयात्रां निर्वहति । तथैव परमात्माख्योऽपि हंसः ब्रह्मभाण्डरूपेऽस्मिन् स्वर्गे सनातनकालादुत्पतति । स हि सर्वान् देवान् अग्निवायुविद्युदादित्यादीन् स्ववशे संस्थाप्य विश्वानि भुवनानि संपश्यन् निरीक्षमाणः, न तु भुञ्जानः याति । तथा च श्रुतिः—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

ऋग् 1.164.20

उपनिषत्साहित्ये हंसस्य जीवात्मपरमात्मवाचकत्वं वेदसंहितातोऽधिकतरं स्पष्टत्वेन समायाति । यथा श्वेतावतरोपनिषदि—**सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे** (1.6), **नवद्वारे पुरे देही हंसो लेलायते बहिः । वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च** (3.18), **एको हंसो भुवनस्यास्य मध्ये** (6.15) । अस्य लेखस्य वेदसंहितास्वेव सीमितत्वान्न तद्विषयेऽधिकं लिख्यते । हंसशब्दस्येतरेऽपि प्राक् प्रतिपादिता अर्था उत्तरवर्त्तिसाहित्ये समुपलभ्यन्ते । न ते वैदिकसंहितासु प्राप्यन्ते ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०. हरिः

शब्दार्थकोशेषु हरिशब्दस्य बहवोऽर्थाः प्रसिद्धाः।[1] यथा—इन्द्रः, विष्णुः, शिवः, ब्रह्मा, यमः, अग्निः, सूर्यः, सूर्यकिरणः, वायुः, सोमरसः, मनुष्यः, परलोकः, अश्वः, सिंहः, वानरः, मण्डूकः, शुकः, सर्पः, मयूरः, कोकिलः, हंसः, पिङ्गलवर्णः हरिद्वर्णः। वैयाकरण-सम्प्रदाये हृधातोः **हृषिषिरुहिवृतिविदिछिदिकीर्तिभ्यश्च** (उ. 4.119) इति इन्प्रत्यये शब्दोऽयं निष्पाद्यते। हरतीति हरिः। केचित्तु[2] हर्यगतिकान्त्योरिति धातोर्हरिशब्दं साधयन्ति। हर्यधातुना हरिशब्दस्य सम्बन्धे स्वयं श्रुतिरपि प्रमाणम्[3]। लोकवत् वैदिकसंहितास्वपि हरिशब्दोऽयं बाहुल्येन प्रयुक्तः। तत्र केष्वर्थेष्वयं समायातीति परीक्षामहे।

इन्द्रः

इन्द्रवाचकत्वेन यद्यपि लोके हरिशब्दः प्रायः प्रयुज्यते, तथापि वेदेष्वयं तदर्थे दुर्लभ एव ऋग्वेदेऽधोलिखितमन्त्रस्य भाष्ये सायणो हरिमिन्द्रस्य पर्यायत्वेन स्वीकरोति—

द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्पसत्।
अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत्॥

ऋग् 3.44.3

'ययोश्च द्यावापृथिव्योः अन्तः मध्ये हरिः इन्द्र चरत् चरति ते द्यावापृथिव्यौ इन्द्रः अधारयत् इत्यर्थः' इति सायणः। परमत्रापि हरिशब्दस्य इन्द्रोऽर्थः सन्दिग्ध एव। स्वामिदयानन्देनात्र वायुरर्थो गृहीत—**'हरिः हरणशीलो वायुः।'** स चार्थः समञ्जसः प्रतिभाति। ययोर्द्यावापृथिव्योर्मध्ये हरिः हरणशीलो वायुश्चरति ते द्यावापृथिव्यौ अपि इन्द्रः अधारयदिति। ययोर्मध्ये हरिः चन्द्रः चरतीत्यपि व्याख्यानं सुकरम्। यद्यपि हरेरिन्द्रवाचकत्वेऽन्यत् किमपि स्थलं वेदेष्वस्माभिर्नोपलब्धम्, तथापि हरिभिरिन्द्रस्य कश्चन प्रगाढः सम्बन्धः। इन्द्रस्य तुरगौ हरी, इन्द्रस्य पेयः सोमरसो हरिः, इन्द्रस्य ग्रावाणो हरयः, इन्द्रस्य वज्रो हरिः, इन्द्रः स्वयं हरिश्मशारुः, हरिश्मश्रुः, हरिकेशः,

---

1. यथा, 'हरिर्दिवाकरसमीरयोः। यमवासवसिंहांशुशशांककपिवाजिषु पिङ्गवर्णे हरिद्वर्णे भेकोपेन्द्रशुकाहिषु। लोकान्तरे च' इत्यनेकार्थसंग्रहः (2.473.74)। इतरे कोशाः—अमर 3.3.174-75, मेदिनी 27.99-100, शाश्वतः 87. विश्वः 131.78-79, निघण्टुः 2.3. निरुक्तम् 4.44, मोनियरविलियम्स-कृतः संस्कृतइंगलिशकोशः, आप्टेकृतः संस्कृतइंगलिशकोशः।

2. हर्य गतिकान्त्योरिति धातोः हरिपदनिष्पत्तौ कान्त्यर्थसिद्धिः सुगमा भवति। हर्यश्वः हरिकेशः, हरिवर्पसम्, हरिधायसम् इत्यादिप्रयोगे कमनीयत्वं भास्वरत्वं वा द्योतितं भवति। ऋग् 1.5.4 मन्त्रे कपालीशास्त्रिकृतसिद्धाञ्जनभाष्यम्।

3. वेदे हरिविशेषणत्वेन 'हर्यतौ' इत्यादि श्रूयते। यथा ऋग् 10.96.6।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिपाः, हर्यश्वः, हरिशिप्रः, हरिवर्पाः, हरिश्रीः, हरिमन्युसायकः, हरिभरः, हरिप्रियः, हरिजातः, हरिष्ठाश्च[4] प्रोच्यते ।

इन्द्रस्याश्वाः—

इन्द्रस्याश्वा हरय उच्यन्ते, रथहरणात् । वैदिकनिघण्टौ देवानां वाहनपरिगणन-प्रसङ्गे हरी इन्द्रस्य वाहनत्वेन परिगणितौ—

हरी इन्द्रस्य । रोहितोऽग्नेः । हरित आदित्यस्य ।
रासभौ अश्विनोः । अजाः पूष्णः । पृषत्यो मरुताम् ।
अरुण्यो गाव उषसाम् । श्यावाः सवितुः । विश्वरूपा ।
बृहस्पतेः । नियुतो वायोः । इति दशादिष्टोपयोजनानि ॥

निघ. 1.5

श्रुतिरपि भवति—सहस्रमश्वा हरयश्चमूषदः (ऋग् 9. 78. 2), अर्वद्भिर्यो हरिभिर्जोषमीयते (ऋग् 10. 96. 7) इति । ऋभवो हि हरी इन्द्राय सुयुजावश्वौ चक्रुरिति प्रसिद्धम्—ये हरी मेधयोक्था मदन्त इन्द्राय चक्रुः सुयुजा ये अश्वा (ऋग् 4. 33. 10), तक्षन् हरी इन्द्रवाहा वृषण्वसू (ऋग् 1. 111. 1) ।

इन्द्रः स्वकीये रथे हरिनामकानश्वान् नियुङ्क्ते, न तु तत्पृष्ठमारोहति । उक्तं च—रथिरासो हरयो ये ते अस्रिधः (ऋग् 8. 50. 8) । कति हरयस्तेन नियुज्यन्ते इति चेत्, क्वचिद् द्वयोः संकेतः, क्वचिच्च बहूनाम् । द्विप्रभृतिशतसंख्यापर्यन्ता हरय ऐन्द्रे रथे नियुज्यन्ते इति ऋग्वेदीयस्य सूक्तस्याधः-स्थैर्मन्त्रैः सोसूच्यते—

हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन ।
मोषु त्वामत्र बहवो हि विप्रा नि रीरमन् यजमानासो अन्ये ॥
आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः ।
आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥
आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः ।
आ पञ्चाशता सुरथेभिरिन्द्रा षष्ट्या सप्तत्या सोमपेयम् ॥

---

4. हरिश्मशारुः, हरिकेशः, हरिपाः ऋग् 10.96.8, हरिश्मश्रु सोम 1.74, हर्यश्वः ऋग् 3.44.4, हरिशिप्रः ऋग् 10.96.4, हरिवर्पाः ऋग् 3 44.3, 10.96.1, हरिश्रीः ऋग् 8.15.4, हरिमन्युसायकः ऋग् 10.96.3, हरिभरः ऋग् 10.96.4, हरिप्रियः ऋग् 3.41.8. हरिजातः ऋग् 10.96.5, हरिष्ठाः ऋग् 6.17.2 ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आशीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः ।
अयं हि ते शुनाहैत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ॥

ऋग् 2. 18. 3-6

ऐन्द्ररथे नियुज्यमानानां हरीणां संख्या न केवलं शतावधिः, परं सहस्रं हरयोऽपि तद् रथं वहन्ति—

आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्रकेशिनो वहन्तु सोमपीतये ॥

ऋग् 8.1.24

वेदेष्वधिकतरं यद्यपि हरी, हरिभ्याम्, हर्योः इति द्विवचनान्त एव प्रयोग उपलभ्यते शतक्रतुरथाश्वसूचकः, तथापि हरयः, हरिभिः, हरीणाम् इति बहुवचनान्तोऽपि नः न्यूनः । क्वचिदेकस्मिन्नेव सूक्ते कस्मिंश्चिन्मन्त्रे द्वित्वप्रयोगस्तर्हि परस्मिन्नेव मन्त्रे द्वित्राणां व्यवधानेन वा बहुत्वप्रयोगः । यथा ऋग्वेदीये 3. 43 सूक्ते द्वितीये मन्त्रे **'आयाहि····उप नो हरिभ्याम्'** इति द्वित्वं तृतीये मन्त्रे **'इन्द्र देव हरिभिर्याहि तूयम्'** इति बहुत्वम्, तुरीये मन्त्रे **'हरी'** इति पुनर्द्वित्वं, षष्ठे मन्त्रे **'हरय'** इति पुनर्बहुत्वम् । उन्मत्तप्रलपितं किमेतत् ? न हि । सकारणमिदम् । इन्द्रस्य रथे द्वौ वाश्वौ नियुज्येताम्, बहवो वाश्वाः पदं लभन्ताम्, तिष्ठन्ति ते युगलतयैव । एव यदा शतमश्वा नियुज्यन्ते तदापि पञ्चाशद् युगलतयैव तेषां स्थितिः । द्वौ द्वौ मिलित्वा ते रथवहनकर्मण्युद्यच्छन्ते । अत एवोक्तम्—

आ त्वा बृहन्तो हरयो युजाना अर्वागिन्द्र सधमादो वहन्तु ।
प्र ये द्विता दिव ऋञ्जन्त्याताः सुसंमृष्टासो वृषभस्य मूरा ॥

ऋग् 3. 43. 6

हे इन्द्र, बृहन्तो विशालाः युजानाः रथे नियुज्यमानाः सधमादः सह माद्यन्तः हरयः अश्वाः त्वा त्वाम् अर्वाक् अस्मदभिमुखम् आवहन्तु आनयन्तु । सुसंमृष्टासः सम्यक् संमृष्टाङ्गा मूराः मूढाः स्वविवेकमप्रयुज्य इन्द्रस्यैव विवेकेन चलन्तः, इन्द्रो हि अमूरः तत्तुलनायामितरे खलु मूराः, वृषभस्य अपां वर्षितुरिन्द्रस्य ये हरयः द्विता[5] द्वौ द्वौ भूत्वा दिवः द्युलोकस्य आता दिशः प्र ऋञ्जन्ति प्रसाधयन्ति इन्द्ररथानयनेनालङ्कुर्वन्तीति भावः ।

ननु कोऽयमिन्द्रो यस्य रथे हरयो नियुज्यन्ते । उच्यते—अध्यात्म-अधिदैवत-अधिभूताद्यर्थ-प्रक्रियामनुसरति वैदिकव्याख्यानपद्धतिः । अध्यात्मदिशा परमात्मा, आत्मा,

5. 'द्विता द्विधा यथा भवति तथा····द्विशब्दात् 'संख्याया विधार्थे धा' इति धा प्रत्ययः, धकारस्य तकारश्छान्दसः' इति सायणः । वस्तुतस्त्वत्र वीप्सायां प्रत्ययो मन्तव्यः, द्विता द्विशः द्वयोर्द्वयोर्युगलत्वेनेत्यर्थः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणो वा इन्द्रः। सकलजगदुत्पत्तिस्थितिकृन्निरवयवोऽपि परमात्माऽश्वरथमारोहतीत्यालङ्कारिकीयमुक्तिः। यथा कश्चिन्मानुषाधिराजो रथमारुह्य राष्ट्रस्य कार्यजातं निभालयति, तथैव परमात्मापीति। आत्मपक्षे प्राणपक्षे वा भोगायतनं शरीरमिदं रथः, तत्र च ज्ञानेन्द्रियकर्मेन्द्रियरूपौ हरी, इन्द्रियवृत्तिरूपा हरयो वा नियुज्यन्ते। अधिदैवतव्याख्याने सूर्य इन्द्रः, सोऽपि प्रभातवेलायां रथाधिरूढ इवाविर्भवति, रश्मिरूपा वा हरयस्तद्रथे नियुक्ताः—

उदु त्यं जातवेदसं देवं वहन्ति केतवः।
दृशे विश्वाय सूर्यम्॥ ऋग् 1.50.1

इत्यादिवर्णनात्। अधिभूत-प्रक्रियायां कश्चिद् राजाधिराज इन्द्रपदभाक्। स हि कदाचिदेकमश्वयुगलं कदाचिदनेकान्यश्वयुगलानि स्यन्दने नियुज्य प्रजासध्ये समागच्छति।

सोमः

सोमोऽपि हरिरुच्यते। इन्द्रस्य पेये सोमे हरिशब्द ऋग्वेदे प्राचुर्येण प्रायोजि। नवममण्डलस्य मन्त्रेषु प्राय एव सोमो हरिनाम्ना संस्तुतः। नैरुक्तव्याख्यानानुसारं हरितवर्णत्वात् सोमो हरिसंज्ञया व्यवह्रियते—**हरिः सोमो हरितवर्णः** (निरु. 4. 44)। स्कन्दस्वामि-वेंकटमाधव-सायण-मुद्गलादिभिरपि यत्र तत्र हरिः हरितवर्ण इति व्याख्यातम्[6]। मनोहरत्वादपि सोमो हरिः[7]। हरिशब्दः क्वचित् स्वन्त्रतया सोमपर्यायत्वेन प्रयुक्तः, क्वचिच्च सोमविशेषणत्वेन। स्वातन्त्र्येण यथा—

विशेषणत्वेन यथा—

पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः।
परि गव्यान्यव्यत[8]॥ ऋग् 9.8.6

विशेषणत्वेन यथा

असावि सोमो अरुषो वृषा हरिः॥ ऋग् 9.82.1

सोमः पुनानश्चम्वोर्विशद्धरिः॥ ऋग् 9.103.4

---

6. यथा ऋग् 1.121.8 मन्त्रस्य स्कन्दभाष्यं वेंकटभाष्यं च। ऋग् 9.3.9; 9.5.4; 9.7.6, 9.8.6 मन्त्राणां सायणभाष्यम्। ग्रिफिथः प्रायेण पिङ्गलवर्णः (Tawny) इत्यर्थं गृह्णाति।
7. हरिं मनोहरम् ऋग् 1.21.8 सायणभाष्यम् मुद्गलभाष्यं च।
8. "पुनानः पूयमानः कलशेषु कुम्भेषु निषिच्यमानः अरुषः आरोचमानः हरिः हरितवर्णः सोमः गव्यानि दध्यादीनि वस्त्राणि वासांसीव परि अव्यत पर्याच्छादयति" इति सायणः। When purified within the jars, Soma, bright-red and golden-hued, hath clothed him with a robe of milk. —Griffith

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्द्रम् ॥

ऋग् 9.109.12

इन्द्राय सोमा हरयो दधन्विरे ॥ ऋग् 10.96.6

अद्रयः

अद्रयोऽपि हरय उच्यन्ते । अद्रयश्च सोमाभिषवणसाधनभूता ग्रावाणः । सोम-पेषण-जनितहरितवर्णत्वात् तेषां हरित्वम्, यथोक्तम्—अभिक्रन्दन्ति हरितेभिरासभिः (ऋग् 10. 94. 2) । इति । यद्वा, हरन्ति प्रस्रावयन्ति रसं सोमांशुभ्य इति हरयः । तेषामेषा भवति ।

अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः ।
जुषाण इन्द्र हरिभिर्न आगह्यातिष्ठ हरितं रथम् ॥

ऋग् 3. 44. 1

'अयं तव अस्तु पानाय प्रेप्सतः सोमः, आकारः पूरणः, ग्रावभिः सुतः । तमिमं सेवमानस्त्वम् इन्द्र अस्मान् अश्वैः आगच्छ । तदर्थं हरितवर्णं रथम् आतिष्ठ' इति वेंकटः[9] ।

तेषामेषाऽपरा भवति—

इन्द्रो हर्यन्तमर्जुनं वज्रं शुक्रैरभीवृतम् ।
अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत ॥

ऋग् 3. 44. 5

'सोऽयम् इन्द्रः हर्यन्तं कमनीयम् अर्जुनं शुभ्रम् । शुभ्रत्वमुपपादयति शुक्रैः शुभ्रैः क्षीरादिभिः अभिवृतं व्याप्तं, वज्रं वेगवन्तं, हरिभिः हरन्त्येभिः सोमरसानिति हरयः तैः अद्रिभिः ग्रावभिः सुतम् अभिसुतं सोमम् अपावृणोत् आवरणरहितमकरोत् । ....तथा गाः पणिभिरपहृता गाः हरिभिः अश्वैरुपेतः स इन्द्रः उदाजत बिलात् निरगमयत्' इति सायणः[10] ।

वज्रः

इन्द्रस्य वज्रोऽपि हरिरुच्यते शत्रूणां प्राणहर्तृत्वात् हरिद्वर्णत्वाद् वा । तस्यैषा भवति—

---

9. "हे इन्द्र, हरिभिः हरन्ति सोमरसानेभिः इति हरयो ग्रावाणः तैः आसुतः सर्वतोऽभिषुत' हर्यतः कमनीयः जुषाणः प्रीतिविषयः अयं सोमः ते तुभ्यम् अस्तु" इति सायणः । May the delightsome Soma be expressed for thee by tawny Stones, —Griffith.

10. हरिभिः अद्रिभिः सुतम् Pressed out by tawny Stones. —Griffith

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जज्ञानो हरितो वृषा विश्वमाभाति रोचनम् ।
हर्यश्वो हरितं धत्त आयुधमा वज्रं बाह्वोर्हरिम् ॥

ऋग् 3 44. 4

'वृषा कामानां वर्षकः हरितः हरिद्वर्णोपेतः जज्ञानः जात इन्द्रः विश्वं सर्वं रोचनं दीप्यानं लोकम् आ भाति सर्वतः प्रकाशयति । तथा हर्यश्वः इन्द्रः हरितं हरिद्वर्णोपेतम् आयुधं धत्ते बाह्वोधत्ते । तथा हरिं शत्रूणां प्राणापहारकं वज्रं बाह्वोः आधत्ते इति सायणः[11] ।

तस्यैषाऽपरा भवति—

सो अस्य वज्रो हरितो य आयसो ।
हरिर्निकामो हरिरा गभस्त्योः ॥

ऋग् 10.96.3

'अस्य इन्द्रस्य स वज्रः हरितः हरितवर्णः य आयसः अयःसारभूतोऽस्ति निर्मितः । स च हरिः हरितवर्णो वज्रः निकामः नितरां कमनीयः । स आ हन्ता शत्रूणाम् । तादृशो वज्रः गभस्त्योः हस्तयोर्वर्तत इति शेषः' इति सायणः ।[12]

सूर्यः

सूर्योऽपि हरिरुच्यते, तमोमालिन्यरोगाद्यपहरणाद् रसहरणाच्च । तस्यैषा भवति—

आ रोदसी हर्यमाणो महित्वा नव्यं नव्यं हर्यसि मन्म नु प्रियम् ।
प्र पस्त्यमसुर हर्यतं गोरा विष्कृधि हरये सूर्याय ॥ ऋग् 10.96.11

अत्र 'हरये उदकस्य हर्त्रे सूर्याय' इति सायणः ।

तस्यैषाऽपरा भवति—

हरिः सुपर्णो दिवमारुहोऽर्चिषा ये त्वा दिप्सन्ति दिवमुत्पतन्तम् ।
अव तां जहि हरसा जातवेदोऽबिभ्यदुग्रोऽर्चिषा दिवमारोह सूर्य ॥

अथर्व 19.65.1

---

11. "हरितवर्णाश्वः हरितवर्णम् आयुधं धारयति बाह्वोः वज्रसंज्ञं शत्रूणां हरणशीलम्" इति वेंकटः । वज्रं हरिम् the golden thunder. —Griffith.

12. His is that thunderbolt, of iron, golden-hued, golden-coloured, very dear and yellow in his arms. —Griffith

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे सूर्य, हरिः राव्यन्धकारस्यापहर्ता, सुपर्णः शोभनकिरणोपेतस्त्वम् अर्चिषा ज्योतिषा साकं दिवम् पूर्वाकाशम् आरुहः आस्थितवानसि । दिवम् उत्पतन्तम् आकाशे ऊर्ध्वं गच्छन्तं त्वा त्वां ये दिप्सन्ति दब्धुमिच्छन्ति तान् त्वं हे जातवेदः जातं वेदयते प्रकाशयतीति तादृश हरसा तेजसा जहि विनाशय । उग्रः उद्गूर्णकान्तिस्त्वम् अर्चिषा ज्योतिषा सह दिवं मध्याकाशम् आरोह अधिगच्छ ।

सूर्यस्याश्वाः

सूर्यस्याश्वा अपि हरयः उच्यन्ते, रथहरणशीलत्वात् । तदभिवादिन्येषाऽऽथर्वणी ऋग्—

सूर्यस्याश्वा हरयः केतुमन्तः सदा वहन्त्यमृताः सुखं रथम् ।
घृतपावा रोहितो भ्राजमानो दिवं देवः पृषतीमा विवेश ॥

अथर्व 13.1.24

सूर्यस्य अश्वा हरयः हरिसंज्ञकाः, केतुमन्तो ज्योतिर्मयाः, अमृता अमरणधर्माणः सदा रथं सूर्यस्य स्यन्दनं सुखम् अनायासेन वहन्ति । घृतपावा घृतम् उदकं पिबतीति, पा पाने धातोः **'आतो मनिन् क्वनिब्बनिपश्च'** पा. 3.2.74 इति वनिप्, भ्राजमानः प्रकाशमानः देवो रोहितः सूर्यः पृषतीं नानावर्णां दिवं द्युलोकम् आविवेश इति ।

तेषामेषाऽपरा भवति—

शुक्रं वहन्ति हरयो रघुष्यदो देवं दिवि वर्चसा भ्राजमानम् ।
यस्योर्ध्वा दिवं तन्वस्तपन्त्यर्वाङ सुवर्णैः पटरैर्विभाति ॥

अथर्व 13.3.16

रघुष्यदो लघुजवाः हरयः सूर्याश्वाः शुक्रं पवित्रं वर्चसा तेजसा भ्राजमानं सूर्यं देवं दिवि वहन्ति । यस्य सूर्यस्य उर्ध्वा उपरिमुखाः तन्वः किरणाः दिवं द्युलोकं तपन्ति । अथ च सुवर्णैः पटरैः रश्मिपटलैः अधोमुखैरिति यावत्, स सूर्यः अर्वाङ् अधोमुखं विभाति ।[13]

आदित्य-रश्मयः

आदित्य-रश्मयोऽपि हरय उच्यन्ते, उदकहर्तृत्वात् रोगाद्यपहरणाच्च । तेषामेषा भवति—

---

13. हरयः his tawny coursers. सुवर्णैः पटरैः with beams of golden colours हरयो रघुष्यदः Swift-running yellow horses. सुवर्णैः पटरैः With well-coloured gleems. —Whitney.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन्त्सदनाद् ऋतस्यादिद् घृतेन पृथिवी व्युद्यते ॥

ऋग् 1.164.47

ऋगियं निरुक्ते व्याख्याता—'कृष्णं निरयणं रात्रिरादित्यस्य । हरयः सुपर्णाः हरणा आदित्यरश्मयः ते यदाऽमुतोऽर्वाञ्चः पर्यावर्तन्ते सहस्थानादुदकस्य आदिद् अथ घृतेनोदकेन पृथिवी व्युद्यते । घृतमित्युदकनाम जिघर्तेः सिञ्चतिकर्मणः (निरु. 7.3) ।'

अथापि ब्राह्मणं भवति—युक्ता ह्यस्य हरयः शता दशेति (ऋ. 1.164,47) । सहस्रं हैत आदित्यस्य रश्मयः । तेऽस्य युक्ताः, तैरिदं सर्वं हरति । तद् यदेतैरिद् सर्वं हरति, तस्माद्धरयः । (जै. उ. ब्रा. 1.14,3,5) ।'

अग्नयः

अग्नयोऽपि हरय उच्यन्ते, हविषां हरणाद्, मालिन्यादेरपहरणात्, कान्तिमत्त्वाद् वा । तेषामेषा भवति—

हरयो धूमकेतवो वातजूता उप द्यविं ।
यतन्ते वृथगग्नयः ॥ ऋग् 8.43.4

'हरयःहरणशीलाः वातजूताः वातप्रेरिताः, धूमकेतवः धूमध्वजाः अग्नय उप द्यवि अन्तरिक्षे पृथक् पृथक् यतन्ते गच्छन्ति' इति सायणः ।

अथाप्याह—

किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामविद्वान् ।
अक्रीडन् क्रीडन् हरिरत्तवे दन् वि पर्वशश्चकर्त गामिवासिः ॥

ऋग् 10.79.6

हे अग्ने देवेषु यजमानेषु किं कस्माद्धेतोः त्यजः क्रोधं, **त्यज इति क्रोधनाम** (निघं. 2.13), एनः पापं दुर्गतिमिति यावत् चकर्थ करोषि इति अविद्वान् अजानानोऽहं त्वां पृच्छामि । हरिः हरिसंज्ञोऽयमग्निः अक्रीडन् कदाचिल्लीलामकुर्वन् कदाचिच्च क्रीडन् लीलां कुर्वन् अत्तवे पूर्णतया अत्तुं निगरितुम् अदन् गृहादिकं भक्षयन् पर्वशः खण्डशः विचकर्त विचिच्छेद, गाम् इव असिः भूमिं यथा लाङ्गलसम्बद्धः फालः कृन्तती-त्युपमा । कदाचित् स्वगृहादौ अग्निसाद् भवति कश्चिदेवमाह ।

वायोः अश्वाः

वायोरश्वा अपि हरय उच्यन्ते, हरणशीलत्वादेव । तदभिवादिन्येर्षग् भवति—

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वायो शतं हरीणां युवस्व पोष्याणाम् ।
उत वा ते सहस्रिणो रथ आ यातु प्राजसा ॥

ऋग् 4.48.5

'हे वायो, त्वं पोष्याणां पोषणीयानां हरीणां शतं युवस्व योजय रथे । उत वा अपि च सहस्रिणः सहस्रसंख्यापूरकाः अश्वाः तैर्युक्तः रथः पाजसा बलेन आयातु आगच्छतु'–इति सायणः । पूर्वेषु मन्त्रेषु 'वायवा चन्द्रेण रथेन याहि सुतस्य पीतये, इति वायुराहूयते, तस्यायमुपसंहारः ।

ननु, इन्द्रस्यैवाश्वा हरयः प्रसिद्धाः,वायोस्तु नियुतोऽश्वाः । उक्तश्च' वहं वायो नियुतो याह्यस्मयुः (ऋग् 1.135.2), नियुत्वान् वायवागहि (ऋग् 2.41.2), अधं वायुं नियुतः सश्चत स्वा (ऋग् 7.90.3), सहस्रं ते नियुतो विश्ववार (ऋग् 7.92.1) इत्याद्यनल्पेषु मन्त्रेषु वायोर्नियुद्भिरश्वैः सम्बन्धः । तत्कथमत्र वायोरश्वा हरय उच्यन्ते ? सत्यम्, वायोरश्वा नियुतः, ये सदा रथे नियुक्तास्तिष्ठन्ति, वायोः सदैव प्रवहमाणत्वात्, ते कदाचिद् हरयोऽप्युच्यन्ते वेगेन रथहरणात् । सायणस्तु समाधत्ते **'अत्र हरिशब्दोऽश्वसामान्यवचनः**[14] इति ।

कदाचिद् इन्द्रसहचरो वायुर्हरिनियुक्तेन रथेनोह्यमान आहूयते—

आ वां सहस्रं हरय इन्द्रवायू अभि प्रयः ।
वहन्तु सोमपीतये ॥ ऋग् 4.46.3

इति । कदाचिच्च वायुरिन्द्रश्चोभाविमौ देवौ एकस्मिन्नेव रथे नियुतोऽश्वान् नियुज्य सभागच्छतः—

वायविन्द्रश्च शुष्मिणा सरथं शवसस्पती ।
नियुत्वन्ता न ऊतय आयातं सोमपीतये ॥

ऋग् 4.47.3

सोऽयं पारस्परिकः सम्बन्ध उभयोरपि । कदाचिद् वायुरिन्द्रसहचरो हरिभिरुह्यमानं तद्रथं समारुह्य समायाति, कदाचिच्च स इन्द्रं नियुत्वति स्वकीये रथे समुपवेशयति ।

चन्द्रः

चन्द्रोऽपि हरिरुच्यते, हरति मनः, आहरति प्रापयति चन्द्रिकामिति वा । तस्यैषा भवति—

---

14. 4.63.3 भाष्ये ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्रेगो राजाऽप्स्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥

ऋग् 9.86.45

अग्रेगः अग्रगामी राजा राजमानः अप्यः अप्सु अन्तरिक्षे भवः, **आप इत्यन्तरिक्ष नाम** (निघं. 1.3), अह्नां विमानः[15] तिथीनां निर्माता भुवनेषु लोकेषु अर्पितः स्थापितः हरिः चन्द्रमाः तविष्यते क्रमशो वर्धते । किं च घृतस्नुः प्रसृतोदकः रात्रौ अवश्यायबिन्दु-प्रस्रुतिकरः इति यावत्, सुदृशीकः शोभनदर्शनः, अर्णवः उदकवान् समुद्रजलज्वारकरो वा, ज्योतीरथः ज्योतिर्मयरथः, ओक्यः ओकेभ्यो गृहेभ्यो हितः स हरिः चन्द्रः राये ऐश्वर्याय पवते अन्तरिक्षे गच्छति ।

पर्जन्यः

पर्जन्योऽपि हरिरुच्यते, ह्रियते देशाद् देशान्तरं पवनेन, आहरति प्रापयति वृष्टिजलमिति वा । तस्यैषा भवति—

वातस्य जूतिं वरुणस्य नाभिमश्वं जज्ञानꣳ सरिरस्य मध्ये ।
शिशुं नदीनाथं हरिमद्रिबुध्नमग्ने मा हिꣳसीः परमे व्योमन् ॥

यजु. 13. 42

वातस्य जूतिं वायुना वेगवन्तं वरुणस्य नाभिं वरुणेन सूर्येण सम्बन्धवन्तम्, **नाभिः संनहनादिति** यास्कः (निरु. 4. 47), णह् बन्धने, वरुणो हि पर्जन्यस्य स्रष्टा, तथा चोक्तम्—'नीचीनबारं वरुणः कबन्धं प्रससर्ज रोदसी अन्तरिक्षम् (ऋग् 5.85.3)' इति, अश्वम् आकाशे समश्नुवानं, सरिरस्य सलिलपारावारस्य समुद्रस्य मध्ये जज्ञानम् उत्पद्यमानं नदीनां सरितां शिशुम् अपत्यम्, अद्रिबुध्नं पर्वतेन सम्बद्धं हरिं ह्रियमाणं मेघम्, परमे व्योमन् अत्युच्चे आकाशे हे अग्ने माध्यमिकविद्युदग्ने त्वं मा हिंसीः मा वधीः इति कशयेव तडिल्लतया मेघं ताडयन्तं विद्युदग्निं दृष्ट्वा कश्चिदाह ।

उवट-महीधरौ मन्त्रमिमम् अश्वपरं व्याख्यातवन्तौ । स्वामिदयानन्दस्तु मेघपर-मेव व्याचष्टे । तत्तदर्थस्तत्तद्भाष्येऽवलोकनीयः । तस्यैषाऽपरा भवति—

चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहꣳ हरिरेति कनिक्रदत् ॥

यजु. 33. 90

---

15. अह्नां दिनानां विमानः निर्माता, चन्द्रकलाह्रासवृद्धचधीनत्वादहर्व्यवहारस्य—सायणः । अह्नां विमानः As measure of days : Soma being identified with the Moon.
—Griffith.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपर्णः शोभनकिरणोपेतः चन्द्रमाः चन्द्रः दिवि सूर्यप्रकाशे वर्तमानः सन् अप्सु अन्तः अन्तरिक्षस्य मध्ये, **आपः इत्यन्तरिक्षनाम** (निघं. 1. 3), आ धावते आ समन्तात् चलति, स्वधुरं परितः सूर्यं परितश्च यातीत्यर्थः। पिशङ्गं पीताभं बहुलं नानाकारं प्रत्यहं नूतनत्वेन जायमानत्वात्, तथा च मन्त्रवर्णः—**नवो नवो भवति जायमानः** (ऋग् 10. 85. 19)' इति, पुरुस्पृहम् अतिशतस्पृहणीयं रयिं सुवर्णं चन्द्रं तं प्रति हरिः पर्जन्यः कनिक्रदत् गर्जन् सन् एति गच्छति। द्रुतगत्या गगनेधावन् पर्जन्यः चन्द्रं प्राप्तुमिव तं प्रति गच्छतीति भावः।

उवटो महीधरश्चेमां कण्डिकां सोमपरत्वेन व्याचक्षाते व्याचक्षाते। **'सोम एव दिवी गतः पर्जन्य-रूपमास्थायोदकदानद्वारेण रयिमेति···धान्यभावं प्राप्नोति, व्रीहि-यवाद्यन्नरूपो भवतीत्यर्थः'** इति महीधरः।

अश्वः

हरिशब्दः अश्वसामान्यवचनोऽपि। हरिः अश्वः हरतेः, हरति योद्धारं युद्धे यद्वा हरति देशान्तरं प्रापयति रथम् अश्वारोहं वा। तस्यैषा भवति—

तं सोतारो धनस्पृतमाशुं वाजाय यातवे।
हरिं हिनोत वाजिनम्॥ ऋग् 9.62.18.

हे सोतारः प्रेरयितारः, षू प्रेरणे यूयं वाजाय यातवे संग्रामं गन्तुं धनस्पृतं शत्रुधनस्य प्रापयितारं वाजिनं बलवन्तम् आशुं शीघ्रगामिनं हरिम् अश्वं हिनोत प्रेरयत।

अत्र द्वितीयः सोमपरोऽप्यर्थः पवमानसोमदेवताकसूक्तेऽस्य मन्त्रस्य पठितत्वात्। हे सोतारः अभिषवकर्तार ऋत्विजः, यूयं वाजाय यातवे यज्ञं गन्तुं धनस्पृतं धनानां प्रदातारं वाजिनं बलसंयुक्तम् आशुं वेगवन्तं हरिं सोमं हिनोत इति। अत्र शब्दशक्युद्-भवेन ध्वनिना अश्वसोमयोरुपमानोपमेयभावो ध्वन्यते। सायणोऽप्याह—**'यथा योद्धारो युद्धं गन्तुं बलिनं वेगवन्तमश्वं प्रेरयन्ति तद्वत् यज्ञमभिगन्तुं बलवन्तं सोमं प्रेरयतेति भावः** इति।

परमात्मा

परमात्मापि हरिरुच्यते, आहरति जगत्प्रपञ्चं प्रकृतेर्गर्भात्, हरति प्रलयं करो-तीति वा हरिः। तस्येषा भवत्याग्नेये सूक्ते—

उषो न जारः पृथु पाजो अश्रेद् दविद्युतद् दीद्यच्छोशुचानः।
वृषा हरिः शुचिराभाति भासा धियो हिन्वान उशतीरजीगः॥
ऋग् 7. 10. 1

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उषो न जारः उषसो जारः सूर्य इव पृथु विस्तीर्णं पाजः तेजः अश्वेद् श्रयति । दविद्युतद् दीद्यत् शोशुचानः—त्रयोऽप्येते दीप्तिकर्माणः दीप्तेः भूयस्त्वज्ञापनाय प्रयुक्ताः । अत्यन्तं दीप्यमान इत्यर्थः ।

न तत्र सूर्यो भाति न चन्द्रतारकं, नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं, तस्य भासा सर्वमिदं विभाति ॥ (कठ 6. 15)

इति स्मरणात् । वृषा कामानां वर्षिताः, शुचिः पवित्रः हरिः परमात्माग्निः भासा दीप्त्या आभाति प्रकाशते । स च धियः बुद्धीः कर्तव्यकर्माणि च हिन्वानः अन्तः करणेषु प्रेरयन् उशतीः कामयमानाः प्रजाः अजीगः मोहान्धकारात् निःसारयति ।[16]

जीवात्मा

जीवात्माऽपि हरिरुच्यते । हरति व्यापारयति शरीररथं यद्वा ह्रियते जन्मनो जन्मान्तरं मोक्षलोकं वा स हरिः । तस्यैषा भवति—

सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन् याति भुवनानि विश्वा ॥

अथर्व 10. 8. 18

स्वर्गं सुखमयं मोक्षलोकं प्रति पततः उड्डयमानस्य अस्य हंसस्य हंसतुल्यस्य हरेः जीवात्मनः पक्षौ ज्ञानकर्मरूपौ सहस्राह्ण्यं सहस्रेष्वहःसु वियतौ विततौ भवतः । स सर्वान् देवान् प्राणमनोबुद्धीन्द्रियरूपान् उरसि उपदद्य वक्षसि समारोप्य संपश्यन् कार्यजातं निभालयन् विश्वा भुवनानि सर्वान् प्रदेशान् देहान् वा याति गच्छतीत्यात्मगतिमाहष्टे ।[17] तस्यैषाऽपरा भवति—

विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति ।
अहिर्न जूर्णामतिसर्पति त्वचमत्यो न क्रीडन्नसरद् वृषा हरिः ॥

ऋग् 9. 86. 44

हे स्तोतारः, विपश्चिते मेधाविने पवमानाय पावकाय आत्मने यूयं गायत स्तुतिं कुरुत, यः आत्मा महीॅ धारा न पहती जलधारा यथा अन्धःॅ क्षेत्रेषु विद्यमानं शस्यम् अत्यर्षति अतिगच्छति, तथा अन्धः भोग्यं जगत् अत्यर्षति अतिक्रामति मोक्षमापन्नः । किं च अहिर्न सर्पो यथा जूर्णां जीर्णां त्वचं कञ्चुलिकां तथैव यो जीवात्मा त्वचं देहम्

---

16. अग्निरत्र परमात्मा, 'एकं सद् विप्रा बहुधा वदन्ति ;(ऋग् 1.164,46) इत्यादिप्रामाण्यात् । मन्त्रोऽयं भौतिकाग्निपरोऽपि व्याख्यायते ।

17. मन्त्रोऽयं सूर्यपरः प्राणपरश्चापि योजयितुमर्हः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिमुञ्चति । अत्यो न अश्व इव क्रीडन् हसन् खेलन् आनन्दमनुभवन् वृषा बलवानसौ हरिर्जीवात्मा असरत् मुक्त्यर्थं शरीरादपगच्छति ।[18]

इन्द्रियाणि

इन्द्रियाण्यपि हरय उच्यन्ते, स्वेषु स्वेषु विषयेषु हरन्तीति । तेषामेषा भवति—

रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥

ऋग्. 6. 47. 18

अस्या ऋचो व्याख्याने सायणः प्रथममिन्द्रपरमर्थं प्रदर्श्य ततः परम् **'अन्ये मन्यन्ते'** इत्युक्त्वा परमात्मपरमप्यर्थम् प्रदर्शयति—**"इदि परमैश्वर्ये इत्यस्य धातोरर्थानुगमात् इन्द्रः परमात्मा । स चाकाशवत् सर्वानुगतः सदानन्दरूपः ।...रूपं रूपम्, रूप्यत इति रूपं शरीरादि, प्रतिशरीरं चिद्रूपः सर्वगतः परमात्मा प्रतिरूपः प्रतिबिम्बरूपः सन् सर्वाणि शरीराणि बभूव प्राप्नोत् । तच्च प्राप्तं प्रतिबिम्बरूपमस्य परमात्मनः प्रतिचक्षणाय प्रतिनियताकारस्य दर्शनाय भवति । स चेन्द्रः परमेश्वरो मायाभिर्मायाशक्तिभिः पुरुरूपो वियदादिभिर्बहुविधरूपैरुपेतः सन् ईयते चेष्टते । एतदप्यस्य परमात्मनः प्रतिचक्षणाय भवति । अस्य च दश शता सहस्रसंख्याका हरय इन्द्रियवृत्तयः युक्ता विषयग्रहणायोद्युक्ताः सन्ति । तदप्यस्य वास्तवरूपस्य दर्शनाय भवतीति । एवं स्थूलसूक्ष्मशरीरयोर्वियदादिमहाप्रपञ्चस्य च तत्त्वज्ञानहेतुत्वमनया प्रत्यपादीति ।"**

अद्वैतमाश्रित्य सायणीयं व्याख्यानमिदम् । द्वैतपक्षे तु मन्त्रोऽयं जीवात्मपरो महर्षिदयानन्देन व्याख्यातः—**रूपं रूपं प्रतिरूपः तदाकारवर्तमानः बभूव भवति । तत् अस्य जीवात्मनः रूपं प्रतिचक्षणाय प्रत्यक्षकथनाय । इन्द्रः जीवः मायाभिः प्रज्ञाभिः पुरुरूपः बहुशरीरधारणेन विविधरूपः ईयते । युक्ताः हि खलु अस्य देहिनः हरयः अश्वा इवेन्द्रियाण्यन्तःकरणप्राणाः शता शतानि दश इति ।"**

मनुष्याः

मनुष्या अपि हरय उच्यन्ते । हरन्ति व्यापारयन्ति मनोबुद्धिवाक्कायादीनि यद्वा हरन्ति सद्गुणानाकर्षन्ति ते । तथा च **हरय इति मनुष्यनामसु पठितं** (निघं 2.3.) ।[19] तेषामेषा भवति—

आ न इन्द्रो हरिभिर्यात्वच्छाऽर्वाचीनोऽवसे राधसे च ।
तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥

ऋग् 4.20.2

---

18. ऋगियं सोमपरा गृहीता भाष्यकृद्भिः ।
19. आश्चर्यमिदं यन्निघण्टौ मनुष्यार्थे पठितोऽपि हरिशब्दो भाष्यकारैस्तदर्थे प्रायो न व्याख्यातः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र स्वामिदयानन्दीयं व्याख्यानमुद्धरामः—**आ नः अस्मान् अस्माकं वा इन्द्रः परमैश्वर्यवान् राजा हरिभिः प्रशस्तैर्नरैः सह यातु आयातु प्राप्नोतु, अच्छ, अर्वाचीनः इदानीन्तनः, अवसे अन्नाद्याय, अव इत्यन्ननाम** (निघं 2. 7), **राधसे धनाय च। तिष्ठाति तिष्ठेत् वज्री शस्त्रास्त्रवित् मघवा न्यायार्जितधनत्वात् पूजनीयः विरप्शी महान् इमं यज्ञं प्रजापालनाख्यम् अनु नः अस्माकं वाजसातौ संग्रामे**" इति। तेषामेषाऽपरा भवति—

ब्रह्मन् वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि तूयम्।
अस्मिन्नु षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः॥

ऋग् 7.29.2

अत्रापि महर्षिदयानन्दीयं व्याख्यानं प्रस्तूयते—"**ब्रह्मन् चतुर्वेदवित् वीर, सकलशुभगुणव्यापिन्, ब्रह्मणः परमेश्वरस्य कृतिं संसारं जुषाणः सेवमानः अर्वाचीनः इदानीन्तनः हरिभिः सद्गुणाकर्षकैर्मनुष्यैः सह याहि तूयं शीघ्रम्, तूयमिति क्षिप्रनाम** (निघं 2.15)। **अस्मिन् उ सु सवने सुन्वन्ति निष्पादयन्ति येन कर्मणा तस्मिन् मादयस्व आनन्दयस्व, उप ब्रह्माणि अधीतानि वेदवचांसि शृणवः शृणु इमानि नः अस्माकम्**" इति।

इतरेऽर्थाः

इतरेऽप्यर्थाः केचन हरिशब्दस्य व्याख्यायन्ते। प्राणो हरिरुच्यते—**प्राणो वै हरिः स हि हरति** (कौ. ब्रा. 17.1)। प्राणापानौ हरी उच्येते—**प्राणापानौ वा अस्य हरी तौ हीदं सर्वं हर्तारौ हरतः** (जै. ब्रा. 2.79)। अहोरात्रौ हरी उच्येते—**अहोरात्रौ वा अस्य हरी तौ हीदं सर्वं हर्तारौ हरतः** (जै. ब्रा. 2.79)। बृहद्रथन्तरे हरी उच्येते—**इन्द्रस्य वा एतौ हरी यदुभे बृहद्रथन्तरे** (जै.ब्रा. 1.343)। ऋक्सामे हरी उच्येते—**ऋक्सामे वै हरी** (श. ब्रा. 4.4.3.6)। शुक्लकृष्णपक्षौ हरी उच्येते—**पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी ताभ्यां हीदं सर्वं हरति** (श. ब्रा. 1.1)। द्यावापृथिव्यौ हरी उच्येते—**इमे वै हरी विपक्षसा** (तै. ब्रा. 3,9.4.2)। दर्शपूर्णमासौ हरी उच्येते—**एतौ वै देवानां हरी यद् दर्शपूर्णमासौ** (तै. 2,5.6.2-3)। ऋत्विजोऽङ्गुलयो वापि हरय उच्यन्ते—सम्मृज्य हरिं हरयो मृजन्ति (ऋग् 9.96.2) इत्यत्र सायणः—**हरयः हरन्त्यभिषुण्वन्ति सोमम् इति ऋत्विजोऽङ्गुलयो वा**। पिङ्गलवर्णोऽपि हरिरुच्यते, यथा चन्द्रवर्णनप्रसङ्गे—दिवा हरिर्ददृशे नक्तमुष्राः (ऋग् 9.97.9) इत्याह। अत्र सायणः—**दिवा अहनि हरिः हरितवर्णः ददृशे दृश्यते, न प्रकाशते इत्यर्थः, नक्तं रात्रौ तु अत्रः ऋजुगामी विस्पष्टः**

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशयुक्तो दृश्यते, इति । इन्द्रो हि हरिवर्पा उक्तः—आ त्वा विशन्तु हरिवर्पसं गिरः (ऋग् 10.96.1) । तस्यापि हरितरूपः पिङ्गलवर्णः इत्येवार्थः, यथोक्तम् —इन्द्रे नि रूपा हरिता मिमिक्षिरे (ऋग् 10.96.3) । इति

एवं वैदिकसंहितासु हरिशब्दस्य येऽर्थाः संभवन्ति तेऽत्र विचारिताः । ब्रह्म-विष्णु-यम-सिंह-वानर-मण्डूक-शुक-सर्प-मयूर-कोकिलाद्या अर्था वेदेषु न दृष्टाः । ते परस्ताद् विकसिता इति मन्तव्यम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संक्षेप-सूची

अथर्व	अथर्ववेदः
अमरः	अमरकोशः
आर्या	आर्याभिविनयः
उ.	उणादिकोशः
उ. भा.	उवटभाष्यम्
उ. म. भा.	उवटमहीधरभाष्यम्
ऋग्	ऋग्वेदः
ऐ. ब्रा.	ऐतरेयब्राह्मणम्
कठ.	कठोपनिषद्
काठ.	काठकसंहिता
का. मी.	काव्यमीमांसा
का. श्रौ. सू.	कात्यायनश्रौतसूत्रम्
कौ. ब्रा.	कौषीतकिब्राह्मणम्
कौ. सू.	कौशिकसूत्रम्
गो. ब्रा. उ.	गोपथब्राह्मणम् उत्तरभागः
गो. ब्रा. पू.	गोपथब्राह्मणम्, पूर्वभागः
जै.	जेमिनीयब्राह्मणम्
जै. उ. ब्रा.	जैमिनीयोपनिषद् ब्राह्मणम्
तां. ब्रा.	ताण्ड्यब्राह्मणम्
तै.	तैत्तिरीयसंहिता
तै. आ.	तैत्तिरीयारण्यकम्
तै. उ.	तैत्तिरीयोपनिषद्
तै. ब्रा.	तैत्तिरीयब्राह्मणम्
द. भा.	दयानन्दभाष्यम्
निघं.	निघण्टुः
निरु.	निरुक्तम्, यास्काचार्यप्रणीतम्
पद्म.	पद्मपुराणम्
पा.	पाणिनीयाष्टाध्यायी
पा. शि.	पाणिनीयशिक्षा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्न. उ.	प्रश्नोपनिषद्
बृ. उ.	बृहदारण्यकोपनिषद्
बृ. दे.	बृहद्देवता
भाग.	भागवतपुराणम्
मु. उप.	मुण्डकोपनिषद्
मेदिनी	मेदिनीकोशः
मै.	मैत्रायणी संहिता
यजु	यजुर्वेदः (वा. मा. संहिता)
याज्ञ., आ.	याज्ञवल्क्यस्मृतिः, आचाराध्यायः
लिंग.	लिंगपुराणम्
वायु.	वायुपुराणम्
वैजयन्ती	वैजयन्तीकोशः
श. ब्रा.	शतपथब्राह्मणं माध्यन्दिनीयम्
श्वेता.	श्वेताश्वतरोपनिषद्
साम	सामवेदः
सा. भा.	सायणभाष्यम्
स्क. भा.	स्कन्दस्वामिभाष्यम्
ह. वं.	हरिवंशपुराणम्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्रानुक्रमणिका

मन्त्राः	पृष्ठम्	मन्त्राः	पृष्ठम्
अक्षैर्मा दीव्याः	६३	अश्नापिनद्धं मधु	१००
अग्निमद्य होतार	१०७	अस्तभ्नाद् द्यामसुरो	१७
अग्रेगो राजा	१३४	अस्मे वीरो मरुतः	२२
अचिकित्वाञ्चिकितुषश्	१	अस्येदु मातुः सवनेषु	९६
अच्छा वद तवसं	३७	आचार्य उपनयमानो	३०
अजमनज्मि पयसा	७	आ ते अग्न ऋचा	४६
अजारे पिशङ्गिला	१३	आ ते रथस्य पूषन्	७
अजो अग्निरजमु	१२	आ त्वा बृहन्तो	१२७
अजो न क्षां दाधार	३	आ त्वा सहस्रमा	१२७
अजो भागस्तपसा	३	आ द्वाभ्यां हरिभ्या	१२६
अजो ह्यग्नेरजनिष्ट	५	आ न इन्द्रो	१३७
अञ्जते व्यञ्जते	३७	आनयैतमा रभस्व	४
अद्रिणा ते मन्दिन	४५	आनृत्यतः शिखण्डिनः	७०
अनवद्याभिः समु	६२	आ रोदसी हर्यमाणो	१३०
अनस्वन्ता सत्पतिर्	२२	आवदिन्द्रं यमुना	९
अनु त्वा मही	१०३	आ वात वाहि	१०१
अन्तश्चरति रोचना	८५	आ वां श्येनासो	७८
अपामुपस्थे महिषा	८६	आ वां सहस्रं हरय	१३३
अप्सरा जारमुप	६४	आविंशत्या त्रिंशत्या	११६
अप्सरसः सधमादं	६३	आशीत्या नवत्या	१२७
अप्सरसां गन्धर्वाणां	५३	इदं सदो रोहिणी	५२
अभि गन्धर्वमतृणद्	५३	इदं सु मे जरितरा	९७
अमी ये पंचोक्षणो	३९	इन्द्रश्चकार प्रथमं	२९
अमोतं वासो दद्याद्	१२	इन्द्रश्च मरुतश्च	२४
अयं ते अस्तु हर्यतः	१२९	इन्द्रस्य बाहू स्थविरौ	२९
अयं पुरो हरिकेशः	६८	इन्द्राविष्णू दृंहिताः	२७
अयं मे पीत उदियर्ति	४६	इन्द्रो हर्यन्तमर्जुनं	१२९
अयोजाला असुरा	३०	इमे त इन्द्र	११५
अयोदंष्ट्रो अर्चिषा	८०	इयमग्ने नारी	९३
अर्भको न कुमारको	९०	ईर्मान्तासः सिलिक	१७
अवावशन्त धीतयो	३५	उक्षा महाँ अभिववक्ष	३३

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्राः	पृष्ठम्	मन्त्राः	पृष्ठम्
उक्षा मिमाति प्रति यन्ति	३६	तनूनपादसुरो	२०
उक्षा समुद्रो अरुषः	३८	तमिद्गर्भं प्रथमं	२
उक्ष्णो हि मे पंचदश	४३	तमु त्वा नूनमसुर	१६
उग्रं पश्ये राष्ट्रभृत्	६५	तयोरिद् घृतवत्	५३
उदु त्यं जातवेदसं	१२८	तर्द है पतङ्ग है	८०
उद्भिन्दतीं संजयन्तीं	६६	तव भ्रमास आशुया	७६
उप प्रागाच्छसनं	१२	तव शरीरं पतयिष्ण्वर्वन्	१३
उषो न जारः पृथु	१३५	तं सोतारो धनस्पृत	१३५
उर्ध्वो गन्धर्वो···प्रत्यङ्	५०	तां सवितः सत्यसवां	८७
उर्ध्वो गन्धर्वो···विश्वा	५२	तिग्मो विभ्राजन्	८४
ऋतावानं महिषं	८२	तिस्रः क्षपस्त्रिरहा	७७
एकं पादं नोत्खिदति	१२२	तिस्रो मात्रा गन्धर्वाणां	५६
एतत् त्यन्न योजन	१०३	ते जज्ञिरे दिव	२१
कमेतं त्वं युवते	६३	त्रिरुत्तमा दूणशा	२४
कर्णगृह्या मघवा	१३	त्रिंशद् धाम विराजति	७५
कालो यज्ञं समैरयद्	६७	त्रीणि राजाना विदथे	५८
किं देवेषु त्यज	१३२	त्री यच्छता महिषाणा	९१
कृष्णं नियानं हरयः	१३२	त्वया वयमप्सरसो	७१
गन्धर्व इत्था पदमस्य	५१	त्वं राजेन्द्र ये च	१६
गन्धर्वस्त्वा विश्वावसुः	५५	त्वं विश्वेषां वरुणासि	१७
गन्धर्वाप्सरसो ब्रूमो	६७	त्वामग्न आदित्यास	५५
गिरावरगराटेषु	११३	त्वां गन्धर्वा अखनंस्	६०
गृष्टिः ससूव स्थविरं	३४	दिवि स्पृष्टो यजतः	४६
गोर्मा अग्ने अविमाँ	१८	दिवो नो वृष्टि	१६
घृतमप्सराभ्यो वह	६२	दिवो वराहमरुषं	१००
घृतह्रदा मधुकूलाः	११३	दिव्यो गन्धर्वो भुवनस्य	४६
घृतं मिमिक्षे घृतमस्य	३२	दीर्घं ह्यङ्कुशं यथा	८
चत्वारि शृङ्गा त्रयो	४०	देव सवितः प्रसुव	५०
चन्द्रमा अप्स्वन्तरा	१३४	देवाः पितरो मनुष्या	६७
चित्रश्चिकित्वान्	८४	द्यामिन्द्रो हरिधायसं	१२५
जज्ञानो हरितो वृषा	१३	द्वा सुपर्णा सयुजा	१२४
जानन्तो रूपमकृपन्त	८६	द्विधा सूनवोऽसुरं	२४
जाया इद् वो अप्सरसो	६१	धर्त्तारो दिव ऋभवः	८७
तदद्य वाचः प्रथमं	२८	नकी रेवन्तं सख्याय	११४

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्राः	पृष्ठम्	मन्त्राः	पृष्ठम्
न स स्वो दक्षो	११४	यत् तुदत् सूर	५१
नाना हि वां देवहितं	१०६	यथा मांसं यथा सुरा	११२
निर्यदीं बुध्नान्महिषस्य	८८	यदत्र रिप्तं रसिनः	११०
नि सामनामिषिरामिन्द्र	३४	यदी घृतेभिराहुतो	२४
नीचीनवारं वरुणः	१३४	यदीदहं युधये	४४
पञ्च रुक्मा पञ्च	१२	यद् गिरिषु पर्वतेषु	११३
पतङ्गमक्तमसुरस्य	७३	यद्धस्ताभ्यां चकृम	६५
पतङ्गो वाचं मनसा	५०	यद् भद्रस्य पुरुषस्य	५७
परि द्यामिव सूर्यो	१२३	यद् वाहिष्ठं तदग्नये	९३
पर्जन्यवृद्धं महिषं	५४	यमस्य लोकादध्या	२३
पर्जन्यः पिता महिषस्य	८३	यस्ते गन्धः पृथिवि	६७
पुत्रमिव पितरा	१०९	यस्ते रसः संभृत	१०६
पूनस्त्वा दुरप्सरसः	६७	यस्मिन्नश्वास	४५
पुनानः कलशेष्वा	१२८	यं त्वा पृषती	५२
पृष्ठात् पृथिव्या	६	यः कृष्णः केश्यसुरः	३०
प्र काव्यमुशनेव	९८	यः श्वेतां अधि	५
प्र केतुना बृहता	८३	या अक्षेषु प्रमोदन्ते	६६
प्र तद् वोचेदमृतस्य	५७	या इन्द्र भुज	२७
प्र नू महित्वं	३३	या ते प्राण प्रिया	१०१
प्र पदोऽव	११	याः क्लन्दास्तमिषी	७०
प्र सा क्षिति	२०	युनक्तु देवः सविता	८४
प्र सोमासो विपश्चितो	९०	युवं नरा स्तुवते	१११
प्राग्नये विश्वशुचे	२६	युवं सुराममश्विना	१०८
बीभत्सूनां सयुजं	११९	ये अग्नो जातान्	७१
बृहस्पते तपुषाश्नेव	२६	ये अर्वाङ् मध्य	१२१
ब्रह्मक्षत्रं पवते	१०५	ये गन्धर्वा अप्सरसो	७०
ब्रह्मन् वीर ब्रह्म	१३८	ये रूपाणि प्रति	२८
ब्रह्मा देवानां पदवीः	८९	ये हरी मेधयोक्था	१२६
भोजा जिग्युः सुरभिं	११२	यो अद्रिभित्	३८
मल्वं बिभ्रती गुरुभृद्	१०१	यो मा पाकेन	१०
महां असि महिष	८१	रथजितां राथजितेयीना	६४
महिषासो मायिनश्	८६	रपद् गन्धर्वीरप्या	६०
मा त्वा रुद्र चुक्रुधामा	३९	रुवति भीमो वृषभस्	३६
यच्च वर्चो अक्षेषु	११२	रूपं रूपं प्रतिरूपो	१३७

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्राः	पृष्ठम्	मन्त्राः	पृष्ठम्
रोचसे दिवि रोचसे	७६	समुद्रिया अप्सरसो	६३
वधूरियं पति	६२	समुद्रे त्वा नृमणा	८५
वराहो वेद वीरुधं	६५	समुद्रोऽसि विश्व	२
वातस्य जूतिं वरुणस्य	१३४	स विशोऽनु	१११
वातस्य नु महिमानं	८	सस्मिमवन्दच्चरणे	५५
वातो वा मनो वा	५६	सस्वश्चिद्धि	११८
वायविन्द्रश्च	१३३	सहस्रधारं वृषभं	३६
वायो शतं हरीणां	१३३	सहस्रशृंगो वृषभो	३८
विचिन्वतीमाकिरन्ती	६६	सहस्राक्ष्यं वियता	१२४
विपश्चिते पवमानाय	१३६	सहृदयं सांमनस्य	११२
विश्वकर्मा ह्यजनिष्ट	५४	सिञ्चन्ति परिषिञ्चन्ति	१०७
विश्वावसुरभि तन्नो	४६	सुरावन्तं बर्हिषदं	१०६
विश्वेत्ता विष्णु	८८	सूपस्था अद्य	१०८
वि सुपर्णो अन्तरिक्षा	१८	सूर्यस्याश्वा हरयः	१३१
वृत्रखादो बलंरुजः	६	सूर्यो देवीमुषसं	६४
वृषा ते वज्र उत	३५	सूर्यो मे चक्षुर्	१०
शकमयं धूममारा	४२	सो अस्य वज्रो	१३०
शतमहं दुर्णाम्नीनां	७१	सोमभद्भ्यो	११६
शतं राज्ञो नाधमानस्य	२२	सोमस्य जाया	५८
शतहस्त समाहर	६६	स्तम्भद्ध द्यां स	८२
शं नो अज एकपाद्	७	स्वर्यन्तो नापेक्षन्त	७
शिशुं जज्ञानं	१२६	स्वादुष्किलायं	१०५
शुक्रं वहन्ति हरयो	१३१	स्वाष्टीं त्वा स्वादुना	१०५
शृतमजं शृतया	११	स्वाहाकृतः शुचि	५४
श्वन्वतीरप्सरसो	६४	हरयो धूमकेतवो	१३२
श्वसित्यप्सु हंसो	११६	हरिः सुपर्णो दिव	१३०
श्वेवैकः कपिरिवैकः	७०	हरी नु कं रथ	१२६
स इद् दासं तुवीरवं	६६	हंसः शुचिषद्	११८
स ई सत्येभिः	६६	हंसा इव कृणुथ	११८
सखा सख्ये अपचत्	६१	हंसा इव श्रेणिशो	११७
सप्त स्वसारो	५६	हंसासो ये वां	१२०
स प्रकेत उभयस्य	६५	हंसैरिव सखिभिर्	११८
समानं नीळं	८८	हृत्सु पीतासो युध्यन्ते	११४
समिद्धस्य प्रमहसो	३३		

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्रांशानुक्रमणिका

प्रयुक्ता मन्त्रांशाः	पृष्ठम्
अक्षासो अस्य वितिरन्ति काम प्रतिदीन्ने दधत आ कृतानि ।	११२
अग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ।	५४-६१
अग्निर्गान्धर्वी पथ्यामृतस्य ।	६०
अग्ने त्वचं यानुधानस्य भिन्धि ।	८०
अध वायुं नियुतः सश्चत स्वा ।	१३३
अनड्वान् प्राण उच्यते ।	४६
अनेनासुरान् पराभावयन्मनीषी ।	३०
अपहता असुरा रक्षांसि वेदिषदः ।	२९
अपामुपस्थे अध्यायवः कविमृतस्य योना महिषा अहेषत ।	८९
अपां बिलमपिहितं यदासीद् वृत्रं जघन्वों अप तद् ववार ।	१११
अपो निषिञ्चन्नसुरः पिता नः ।	२४
अप्स्वन्तरममृतमप्सु भेषजम् ।	५६
अभिक्रन्दन्ति हरितेभिरासभिः ।	१२९
अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा ।	२८
अर्वद्भिर्यो हरिभिर्जोषमीयते ।	१२६
अयं सोमो असुरैर्नो विहव्यः ।	२४
अवारयन्त वरुणेन देवा अभ्याचारमसुराणां श्वः श्वः ।	३०
अव स्थिरा तनुहि यातुजूनाम् ।	८०
असावि सोमो अरुषो वृषा हरिः ।	१२८
अस्य सनीळा असुरस्य योनौ ।	२५
आ त्वा विशन्तु हरिवर्पसं गिरः ।	१३९
आ हंसासो न स्वसराणि गन्तन मधोर्मदाय मरुतः समन्यवः ।	१२०
इन्द्राय सोमा हरयो दधन्विरे ।	१२९
इन्द्राय हि द्यौरसुरो अमम्नत ।	२१
इन्द्रे नि रूपा हरिता मिमिक्षिरे ।	१३९
उक्षा बिभर्ति भुवनानि वाजयुः ।	४३
उत त्यं चमसम् ।	२३
उत वा दिवो असुरस्य मन्म ।	२५
उतो न्वस्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु ।	५६
कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः ।	११५
गर्भो भूत्वाऽमृतस्य योनाविन्द्रो ह भूत्वाऽसुरांस्ततर्ह ।	३०

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयुक्ता मन्त्रांशाः

	पृष्ठम्
घसत्त इन्द्र उक्षणः ।	३२
चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ।	५२, ६१
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ।	४
ज्योतिष्मान् पक्षी महिषा वयोधा विश्वा आस्थात् प्रदिशः कल्पमानः ।	७६
तक्षन् हरी इन्द्रवाहा वृषण्वसू ।	१२६
तं वावशानं मतयः सचन्ते ।	३६
ताभ्यो गन्धर्वपत्नीभ्योऽप्सराभ्योऽकरं नमः ।	६१
तिस्रो भूमीर्धारयन् त्रीरुत द्यून् ।	२
त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ।	२३
त्रयस्तस्थुर्वृषभासस्तिसृणां धिषणानाम् ।	३७
त्रीन्त्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन् ।	१६
त्रेधा मूलं यातुधानस्य वृश्च ।	८०
दहाशसो रक्षसः पाह्यस्मान् ।	८०
दिवस्पुत्रासो असुरस्य वीराः ।	२५
दिवा हरिर्ददृशे नक्तमृजः ।	१३८
द्वळहानि पिप्रोरसुरस्य मायिन इन्द्रो व्यास्थच्चक्रवाँ ऋजिश्विना ।	२७
द्वा सुपर्णा सयुजा सखाया ।	९२
न निमिषति सुरणो दिवे दिवे यदसुरस्य जठरादजायत ।	२५
नवो नवो भवति जायमानः ।	१३५
नियुत्वान् वायवागहि ।	१३३
निरुद्धश्चिन्महिषस्तर्ष्यावान् ।	६०
निर्माया उ त्वे असुरा अभूवन् ।	२८
न्यमित्राँ ओषतात् तिग्महेते ।	८०
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।	३
पिता यज्ञानामसुरो विपश्चिताम् ।	१८
पृषद्योनिः पंचहोता शृणोतु अतूर्तपन्था असुरो मयोभुः ।	२१
प्र पिन्वत वृष्णो अश्वस्य धाराः ।	१२
मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ।	५०
महत् तद् वृष्णो असुरस्य नाम ।	२५
मानेनेव तस्थिवाँ अन्तरिक्षे वि यो ममे पृथिवीं सूर्येण ।	५
माप स्थातं महिषेवावपानात् ।	६०
मित्रावरुणौ वृष्टचधिपती ।	२०
यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ।	५५-६१
यत्र देवा अमृतानशानास्तृतीये धामन्नध्यैरयन्त ।	४
यद् वाभिपित्वे असुरा ऋतं यते ।	२५

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयुक्ता मन्त्रांशाः

	पृष्ठम्
यातुधानस्य रक्षसो बलं विरुज वीर्यम् ।	८०
युक्ता ह्यस्य हरयः शता दश ।	१३२
रथिरासो हरयो ये ते अस्रिधः ।	१२६
वह वायो नियुतो याह्यस्मयुः ।	१३३
वाजिनीवती सूर्यस्य योषा ।	६४
वातो गन्धर्वस्तस्यापो अप्सरस ऊर्जो नाम	५४-६१
विध्य रक्षसस्तपिष्ठैः ।	८०
स पर्यगाच्छक्रमकायमव्रणम् ।	२०
स पक्षन्महिषं मृगम् ।	६२
समस्य हरिं हरयो मृजन्ति ।	१३८
समिन्द्र गर्दभं मृण नुवन्तं पापयामुया ।	६६
सम्यक् सम्यञ्चो महिषा अहेषत ।	८६
सहस्रमश्वा हरयश्चमूषदः ।	१२६
सहस्रं ते नियुतो विश्ववार ।	१३३
सिम उक्षणोऽवसृष्टाँ अदन्ति ।	४५
सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः ।	५२
सुसन्दृभिरुक्षभिर्भानुमश्रेत् ।	४०
सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम ।	५१
सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिः ।	५६
सोमं सुतं महिषेवाव गच्छथः ।	६०
सोमः पुनानः कलशाँ अयासीत् सीदन् मृगो न महिषो वनेषु ।	६०
सोमः पुनानश्चम्वोर्विशद्धरिः ।	१२८
सोमो मीढ्वाँ असुरो वेद भूमनः ।	१६
स्वस्ति पूषा असुरो दधातु नः	२१
हत्वाय देवा असुरान् यदायन् ।	२८
हव एषामसुरो नक्षत द्याम् ।	२२

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Acc. 97790
ARCHIVES DATA BASE
2011 - 12

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूल्य 45. रु.

CC-0. Gurukul Kangri Collection, Haridwar